आ त्रण तरंगोनो क्रमांक नवेसरथी न आपतां चालु अपायो छे अेटले के अने ७मा, ८मा अने ९मा तरंग गणेला छे. आ नव तरंग पूर्ण थतां हृद पूरो थाय छे अेवो उल्लेख छे. आ हृद पछी नीचे मुजबना त्रण तरंगो छे :-

(१) क्रियादिगुप्तकरूप विश्वकालनीयव्यापिजिनस्तवाष्टक (श्लो. [१]८). (२) 'जीरापल्ली'पार्श्वस्तवनाष्टक (श्लो. ९). (३) शारदास्तवाष्टक (श्लो. ९).

आ त्रणेना क्रमांक चालु अपाया छे अेटले आ हिसाबे आ दसमाथी [२]बारमा तरंग छे. अेमां पहेलामां क्रियादि गुप्तरूपे छे. बीजानो 'द्वितीय पुटभेद' रूपे निर्देश छे. आ पैकी दसमा तरंग उपर आगमोद्धारके पदच्छेद करवा पूर्वक क्रियापद वगेरे जे अहीं गुप्त छे तेनो स्पष्ट निर्देश कर्यो छे.

आना पछी २५ स्तोत्रोवाळी स्तवपंचविंशतिका छे. १६मा स्तोत्र तरीके 'भुजंग-दण्डक'मां रचायेली चार पद्यनी वीर-दण्डक-स्तुति छे.

गुर्वावली- आ संस्कृतमां रचायेलां ४९६ पद्योनी कृति छे. अे वि.सं. १४६६मां रचायेली छे. अेमां महावीरस्वामीथी मांडीने देवसुन्दरसूरि अने अेमना पट्टधर सोमसुन्दरसूरि (श्लो. ३४५, ३४८-३६३ अने ३९१-४०६) तेमज तेमना शिष्यो सुधीनो क्रमबद्ध वृत्तान्त छे. आम आमां कर्ताना समयनी अनेक विश्वसनीय बाबतो रजू करायेली छे. नवाईनी वात तो अे छे के कर्ताअे पोतानां

---

१. आनी पहेलां मंगलाचरणरूपे बे पद्यो छे.

२. ''कला काचित्''थी शरू थतुं अने 'नमस्कार-मंगल' नामना प्रथम स्रोतना बारमा तरंग तरीके निर्देशातुं नव पद्यनुं शारदास्तवाष्टक भ. स्तो. पा. का. सं. (भा. २)नी मारी प्रस्तावना (पृ. ३३-३४)मां में उद्धृत कर्युं छे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जन्म, दीक्षा अने वाचकपद क्यां अने क्यारे थयां ओ जणाव्युं नथी.

गुर्वावलीना २६३मा पद्यमां कह्युं छे के भीमपल्लीनो (भीलडीयाजीनो) नाश थनार हतो ते जाणी [१]ओओ प्रथम कार्त्तिकमां चातुर्मासिक प्रतिक्रमण करी अन्यत्र विहार करी गया. आम अहीं अधिक मास तरीके कार्त्तिकनो [२]उल्लेख छे.

प्रस्तुत आचार्य 'तपा'गच्छना छे अने आजे केटलाये समयथी आ गच्छना अनुयायीओ अधिक मासमां सांवत्सरिक प्रतिक्रमण जेवी विशिष्ट धार्मिक क्रिया करता नथी तो सोमप्रभसूरिओ केम चातुर्मासिक प्रतिक्रमण कर्युं इत्यादि प्रश्नो में मारा निम्नलिखित [३]लेखमां रजू कर्यां छे :-

" 'अधिक' याने प्रथम कार्त्तिक मासमां चातुर्मासिक प्रतिक्रमण."

(जैन संस्कृत साहित्यनो इतिहास
खण्ड २, प्र. ३३मांथी साभार उद्धृत)

—x—

## आ काव्योमां रजू थयेला शिल्पना केटलाक अङ्गोनो परिचय

**तलपट्ट** - चैत्यभूमि
**भारपट्ट** - भारवट (?)
**सोपान** - पगथियां
**निःश्रेणि** - नीसरणी
**घटा( घण्टा )** - ?
**देवकुलिका** - देरी
**खण्डदेवकुलिका** - ?
**गोमयमण्डली** - ?

---

१. धर्मघोषसूरिना शिष्य सोमप्रभसूरि.

२. आवो बीजो उल्लेख वि.सं. १६५४ने अंगे जोवाय छे. ओनी सविस्तार नोंध में 'अधिक मास' तरीके कार्त्तिकथी फागण तेम ज 'क्षय मास' तरीके कार्त्तिकथी पोष नामना मारा लेखमां लीधी छे. आ लेख "गु. मित्र तथा गु. दर्पण" (साप्ताहिक) ता. ४-८-'५८ना अंकमां छपावायो छे.

३. आ लेख 'जैन" (पर्युषणांक, पु. ५७, अं. ३६-३७)मां प्रसिद्ध थयो छे.

Jain Education International          For Personal & Private Use Only          www.jainelibrary.org

**त्रिलक्षकतोरण** - ?
**चतुष्किका** - चोकी
**गर्भागार** - गभारो
**अन्धारिका** - ?
**आमलसारक** - आमलसारो (शिखरना स्कन्धे चडावातो भाग, जेना पर कलशनी स्थापना थाय छे.)
**द्वारशाखा** - बारसाख
**उम्बर** - उंबरो
**उत्तरङ्ग** - ओतरंग (बारसाखनी उपरनो भाग)
**पद्मशिला** - घुम्मटनी मध्यमां लटकतुं झुम्मर
**शुकनास** - शिखरमध्ये गोखला जेवुं करी उपर सिंह मूकाय छे ते
**पीठ** - जगतीनी उपरनो भाग, जेना पर मंडोवर स्थपाय छे ते.
**जालिका** - जाळी

* * *

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## 'त्रिदशतरङ्गिणी'-अन्तर्गता

# चैत्यषट्कबन्धचित्ररूप-जिनस्तवावलिः ॥

अथ चैत्यषट्कबन्धचित्ररूप-श्रीजिनस्तवावलिनामा [म]हाह्रदः स्वस्वदेव-स्तुतिरूपः सालेखो लिख्यते । तत्र पूर्वं श्रीपत्तनमण्डन-पंचासरश्रीपार्श्वचैत्यालेखः तत्कारयितुः श्रीवनराजस्य तत्प्रतिबोधकस्य श्रीशीलगुणसूरेश्च प्रतिमया युत आलिख्यते । तच्चैत्यचित्रबन्धने श्रीपार्श्वस्तवश्च लिख्यते ॥ यथा —

जयश्रियं सर्वपुरेष्ववाप्य पुण्यर्द्धिभिः **पत्तन**मादधाति ।
चैत्यं जयस्तम्भमिवाऽत्र यस्य स्तवीमि **पंचासरपार्श्व**मेनम् ॥१॥

स्तुतिं त्वदीयां जगताऽप्यशक्यां कथं विधाताऽस्मि जडावतंसः ।
श्रीपार्श्वनाथेति न चिन्तयामि विचारबन्ध्यौ(वन्ध्यो) ह्यतिभक्तिरागः ॥२॥
तलपट्ट[भारपट्ट?]बन्धौ ॥

अमेयमाहात्म्यमयस्वरूप! पराभिभूतान्तरशत्रुचक्र! ।
भवाम्बुराशौ निपतन्तमेनं नतं [वि]भो! मामव पार्श्वदेव! ॥३॥
निश्रेण्याकारसोपानपङ्क्तौ उभयतो दण्डकौ ॥

मेधाविनस्ते स्युरमर्त्यपूज्या ज्यायःशुभश्रीभरसङ्गभाजः ।
जना विभो! येऽनुदिनं भवन्तं तमोपहं नंनमतीद्धभावाः ॥४॥

मारारिवारोत्थपराभवेन न दग्ध[भा]वेषु रतिं भजेत ।
तव स्वरूपस्य विभावनेन नरो दधानो धियमत्र साराम् ॥५॥
द्वाभ्यां प्रथमं सोपानम् ॥

स्वभावतस्त्वं जगतां हिताय यमिन्! प्रवृत्तिं दधसे सदापि ।
पितेव वात्सल्यरमानिधानं रम्योऽसि तद् बुद्धिमतां नितान्तम् ॥६॥

परा[:] समृद्धीस्तनुतेऽप्यधीतं तवाऽभिधानं सकलार्त्तिनाशम् ।
शमीश! कुर्वद् भविकव्रजानां नाथाऽस्ति मन्त्रस्तदतः परो न ॥७॥
द्वितीयसोपानम् ॥

तनोति यस्यांऽशुपतिर्न नाशं शतं मणीनां न न दीपकानाम् ।
नापीन्दुरन्तस्मिरं(स्तिमिरं?) क्षणेन नयेत् तदन्तं तव वाक् प्रकामम् ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शमाय रागादिगदोच्चयानां नाथ! त्वदुक्तानि महोषधन्ति ।
तिरोहितज्ञानदृशोऽपि तानि निन्दन्ति ही! मोहपटेन पापाः ॥९॥
तृतीयसोपानम् ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि-हृदयहिमालयावतीर्ण-श्रीगुरुमहिमपद्महृद-प्रभवायां युगप्रधानावतार-श्रीमत्तपाबृहद्गच्छमण्डनगुरुश्रीदेवसुन्दरसूरिपदपद्म-सौभाग्यार्णवानुगामिन्यां **श्रीमहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां** जयश्र्यङ्कायां द्वितीये गूर्जरावती-तन्नरेश्वर-श्रीपत्तननगरादिश्रोतसि चैत्यषट्कचित्रमहाहृदे श्रीपंचासरपार्श्व-चैत्यबन्धचित्रान्तहृदे स्वदेवस्तुतिरूपे तलपट्ट-भारपट्ट-सोपानत्रिकरूपपीठबन्धनामा प्रथमस्तरङ्गः ॥

विनयं नयनप्रीतिप्रदये त्वयि बिभ्रति ।
कुर्वते ससुरास्तेभ्यः सर्वेऽनघनरा नतिम् ॥१०॥ स्तम्भः ॥
आमं वामतमं पार्श्व भवरूपं हरन्नवक (?) ।
त्वमेव द्वौ पथौ मुक्तिप्राप्त्यै विश्वविभो! विशः ॥११॥ स्तम्भः ॥
सारं पुरवरं विश्वे मान्ये **पत्तन**मेव तत् ।
यत्र त्वं पूज्यसे प्रातर्भव्यैरतरतारकः ॥१२॥ स्तम्भः ॥
श्रितस्य तव तन्त्रोक्तं मार्गं सत्पुण्यवैभवम् ।
लोभवह्निर्नयत्येष न विशः कृशतां शमिन्! ॥१३॥ स्तम्भः ॥
नतं वीतक्षितं यस्य त्वां शिरः परमेश्वरम् ।
लभतेऽसौ न संयोगं प्राप्तशुद्धशुभः शुचा ॥१४॥ स्तम्भः ॥
मुधा मेधा बुधाभ्यर्च्य! तेषां मेधाविनां विभो! ।
त्वयि ये मत्सरं यान्ति परे धर्मेऽन्धताधराः ॥१५॥ स्तम्भः ॥
न स ह्यभिनतिं विज्ञो विश्वेऽप्यन्यस्य कस्यचित् ।
वितनोति गुणानात(?)ज्ञोचितां यः स्तुतिं सृजेत् ॥१६॥ थटा(घण्टा?)बन्धः ॥
स्तोत्राद् भवन्ति भवतो भविनः क्षणेन
तातक्रमाम्बुजविनम्रविचक्षणेन ।
वन्द्या मुदा दिविषदामपि नायकेन
गर्जन्महादितिजभीभरदारकेन ॥१७॥ उभयतो मण्डपौ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परात्मश्रीदपञ्चास्य-स्वर्द्विपा(पा)लिपराभवे ।
श्रीपार्श्व! कृपया पाहि मां नाथ! परमन्थनात् ॥१८॥
श्रीपार्श्वनामगर्भं कमलं शिखरमूलमध्ये ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० स्तम्भषट्क थण्टा(घण्टा?)मण्डप-कमलबन्धनामा द्वितीयस्तरङ्गः ॥

मयि प्रसन्नो भव विश्वबन्धो! त्वदेकसेव्ये महिमैकसिन्धो! ।
विधेहि **पंचासरपार्श्वनाथ**! संसारदुःखाम्बुनिधेः प्रमाथम् ॥१९॥
त्वयि प्रसन्ने जगतामधीश! जन्मादिदुःखान्युपयान्ति नाशम् ।
तैरर्दितस्तत्तव पादपीठं भजन् विदध्यां स्तवनादिपाठम् ॥२०॥
लघुदेवकुलिकाचतुष्कम् ॥

विश्वेश्वरं पार्श्वजिनावतंसं समीहितानन्दकरं नतानाम् ।
**श्रीपत्तन**स्थं खलु वन्दमाना नायान्ति सांसारिकदुःखतापम् ॥२१॥
देवस्य दक्षिणतो बृहती देवकुलिका ॥

अपूर्वमेतत्तव पादपङ्कजं जगत्पते! निस्समशीतिमोदयम् ।
स्मृतेऽपि यस्मिन् भवभीतितापजं जहाति कष्टं भविकः प्रमोदभाक् ॥२२॥
मध्या देवकुलिका बृहती ॥

राजाधिराजो **वनराज**नामा मान्यो न केषां स जगत्प्रधानम् ।
अतास्थपद्योल्ल(द्योऽत्र) भवन्तमीशं शमाय संसारभियां बुधानाम् ॥२३॥
वामतो बृहद्देवकुलिका ॥

त्वं देव! **पंचासरपार्श्वनाथ**! करोषि येषां हृदये निवासम् ।
तेषां सरोगा दुरितोपसर्गा भजन्ति सद्योऽपि जिन! प्रवासम् ॥२४॥
शिखरमध्ये मु(ख?)ण्डदेवकुलिकाकारः ॥

तपोभिरुग्रैर्नहि मुक्तिसम्पदं दमैर्न चित्रैर्न मरुत्प्रसाधनैः ।
जडा लभन्ते विभुना त्वया विना, नानाप्रयुक्तैरपि कायदण्डनैः ॥२५॥
शिखरे उपरितने शीर्षभागे मध्यपङ्क्ती ॥

तपोजपाद्यौपयिकैरनेकशः शमादियुक्तैरपि याऽन्यदर्शनैः ।
न साध्यते मुक्तिरसावपि ध्रुवं वशीभवेन्नाथ! तवांह्रिसेवनैः ॥२६॥
शिखरे उपरितने बहिः पङ्क्ती ॥
एवं त्रिभिः शिखरे सामलसारकोपरितनभागबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिन! तानवकर्ता त्वमघस्तोमस्य सर्वतः ।
तरसारतत्त्वाप्तिं (?) वितरे हितदायक! ॥२७॥ कलशः ॥
यो वक्ति **पंचासरपार्श्वनाथ**! स्तुतिं त्वदीयामिति भावसार(रा)म् ।
अनन्तसातं मतमातनोथि(ति?) महोदयस्याऽस्य जिन(:) प्रसन्नः ॥२८॥
वदामि तन्नाथ! तदर्थिताय वशादहं ते स्तुतिमप्यविद्वान् ।
तन्मे तदारोग्यसुतत्त्वबोधी दत्त्वाऽपि सातं शिवसीम देयाः ॥२९॥
द्वाभ्यां ध्वजबन्धः ॥

**श्रीपंचासरपार्श्वनाथ**मिति यः सर्वेन्द्रपद्मावती-
वैरोट्या**मुनिसुन्दर**स्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥३०॥

इति श्रीपंचासरश्रीपार्श्वजिनस्य तच्चैत्यचित्रबन्धेन स्तवनं श्रीमुनिसुन्दरसूरिकृतम् ॥ इति विनेयलवश्रीमुनिसुन्दरसूरि० **विज्ञप्तित्रिदशतरङ्गिण्यां** जयश्र्यङ्कायां द्वितीये गूर्जरावती-तन्नरेश्वर-श्रीपत्तननगरवर्णनादिश्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे श्रीपंचासरपार्श्वनाथस्तु० तच्चैत्यचित्रान्तर्हृदे युगपत्तृतीय-चतुर्थौ तरङ्गौ ॥

सम्पूर्णश्चाऽयं श्रीपत्तनमण्डनश्रीपंचासरपार्श्वचैत्यबन्धचित्रान्तर्हृदः ॥

श्रीपंचासरपार्श्वेशं द्वैधद्वेषिजयश्रिये ।
स्तुवे गोमयमण्डल्यान्विततोरणचित्रतः ॥३१॥
सारामम्दनदमत्सरसारहीन-पापेति यस्तवगुणालिसुधां मनस्वी ।
देवान्तरेषु स रतिं लभते न काचे लब्ध्वा मणीमिव महेन्द्रनमस्यपाद!
॥३२॥ ता(तो)रणस्तम्भः ॥

निष्कामसन्ततसमग्रसुरासुरार्च्य! श्रीपार्श्व! विश्वजनवत्सल! दुःखिपातः! ।
रागादिरौद्रतमभावरिपुव्रजेभ्यो मां तात! पाहि कृतसर्वहितप्रतानः(न)! ॥३३॥
स्तम्भः ॥

दरकरदम्भशमक्षम! दमसंयममय! समदभवमथन! ।
नवशिवनयनत! हितमत! शिव! मां मां वशितं(नं?) नयविभव! ॥३४॥
अर्द्धाभ्यामुभयतस्तोरणशाखाद्वयोपरिबन्धौ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स शिवं वशिराजो मे देयाद् भुवनभासनः ।
पार्श्वः श्रेयोलतासारो रोगादिहरसंस्तवः ॥३५॥
वदन्ति मदनाद्यैस्ते जितानामपि संस्तवम् ।
न जानन्ति गताऽज्ञान-नरा ये सद्गुणांस्तव ॥३६॥ द्वाभ्यां तोरणम् ॥
शस्तप्रासभवातङ्क! जिन! राजितकान्तिभिः ।
भियां [सं]सर्गभित्! पार्श्व! वितर स्तुत! मे शुभम् ॥३७॥ कलशः ॥
भवन्ति विश्वेऽतिशयाः प्रसिद्धा-स्तवाऽप्रमाणा विहितप्रमादे ।
देवाधिदेवत्वगुणप्रतीत्यै श्रीपार्श्व! देवान्तरनिस्समान! ॥३८॥
नतोऽस्मि पंचासरपार्श्व! नेतस्तव क्रमौ तेन भवार्त्तिभीतः ।
तन्मां कृतार्थीकुरु शक्रवन्द्य! मुक्तिप्रदानेन जिनाऽस्तलोभ! ॥३९॥
द्वाभ्यां गोमयमण्डलीबन्धः ॥
एवं स्तुतो भक्तिभरेण नाथ! मयाऽपि पंचासरपार्श्वदेव! ।
देया ममाऽऽरोग्य-सुबोधिलाभौ प्रसादमाधाय जगच्छरण्य! ॥४०॥
स्तुतिमिति तनुते जिनेन्द्र! यस्ते मघवमहामुनिसुन्दरस्तुतांह्रे! ।
स भवति गुणसम्पदा समस्ते फलमिति तद् वितराऽचिरान्ममाऽपि ॥४१॥

इति विनेयलवश्रीमुनिसुन्दरसूरि ह० श्री... महाविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावती-तन्नरेश्वर-श्रीपत्तननगरवर्णनादिश्रोतसि श्रीचैत्य-षट्कमहाहृदे श्रीपंचासरचैत्यान्तर्हदे सम्पूर्णीभूतेऽग्रतो गोमयमण्डलीयुततोरण-बन्धनामा तरङ्गः पञ्चमः ॥ मूलतश्च सतोरणोऽपि सम्पूर्णश्चायं पंचासरपार्श्व-चैत्यान्तर्हृदः ॥

अथ श्रीशत्रुञ्जयमहातीर्थालङ्कारश्रीयुगादिदेवप्रासादबन्धचित्रनामा गिरिबन्ध-स्वस्तिकतोरणबन्धपूर्वकः श्रीपुण्डरीकशिखरशेखरश्रीऋषभप्रभुस्तवमयो महाहृदः (अन्तर्हृदः?) प्रस्तूयते । तत्र पूर्वं तद्गिरितोरणचित्रतरङ्गौ तद्युगादिस्तवस्वरूपावत्र ज्ञेयौ । तदनु तच्चैत्यचित्रस्तवश्च ॥ तथाहि –

जयश्रीणां प्रदातारं स्थितं शत्रुञ्जयाचले ।
स्तुवे श्रीमद्युगादीशं तद्गिरीन्द्रादिचित्रतः ॥१॥ उपत्यकाबन्धः ॥१॥ ४२
श्रीतीर्थनायक! यशोभृतविष्टपाऽष्टकर्मद्विपद्विपरियो(पो)! जगदकेतात! ।
रत्यै त्वदागमगतार्थविदां न दानिन्! देवान्तरं वितर तन्निजदर्शनं मे ॥२॥ ४३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अर्द्धाभ्यां पूर्वत उपत्यकात आरभ्याऽधित्यकालग्नशिरस्कदण्डकाका-रगिरिशिखरपद्याद्वयबन्धः ॥

चित्तं न मे जिन! जिती(ता?)रितते मते ते ।
सद्धस(?स्त?) लीनमिन! तिष्ठति भीतिभेदिन्! ।
तत्तत्तथा कु[मत?]बोधमहामदारे-
र्न स्याद् भयं मम यथाऽखिलधाम(?) ॥३॥ ४४

तथैव पश्चिमातः शिखरपद्याद्वयबन्धः ॥

जगत्पतिं योऽतिमुदा भवेभ-हरिं भवन्तं भगवन्! स्तवीति ।
महोदयस्याऽयमनन्तसातं करस्थितं सुस्थितधीः करोति ॥४॥ ४५

तथैव मध्यशिखरद्वयबन्धः ॥

भावारिव्रजभीतप्तिं हर त्वं मे निजागमात् ।
तिरस्करोति मत्तान् स मोहादिद्विती हि - -- (?) ॥५॥ ४६

अधित्यकाबन्धः ॥

सुरनरमुनि..... श्रीशत्रुञ्जयगिरिबन्धचित्रम् ॥

दधाति दर्पं त्रिजगज्जयश्रियं य एव संप्राप्य युगादिनायक! ।
दत्से त्वमेवामुमपि..... यदर्थितं श्रीविमलाद्रिमण्डन! ॥६॥ ४७
दमीश! तेनाऽस्मि तवैव संस्तवं वदंस्त्रिलोकीप्रभुतां विदन् ध्रुवाम् ।
ददस्व तन्मे शिवमीहितं फलं लभेत सेव्यस्य बलाद्धि सेवकः ॥७॥ ४८

युग्मम् ॥ - द्वाभ्यां महास्वस्तिकः ॥

जयाऽस्तजन्माधिजराऽजराजताऽचलाऽमलैः स्फारयशोभिरुज्ज्वलाम् ।
सृजंस्त्रिलोकीं सकलारिनिर्जयात् शमिप्रशस्यास्पदमक्षयश्रियः ॥८॥ ४९

त्रिलक्षकतोरणे प्रथमस्तम्भः ॥

क्षमस्तमःस्तोमकमक्षमंदता-प्रदं निहन्तुं सकलं[कल]ङ्कमुग् ।
अनन्तसंविद्धिभवोभयं भवाद् ममाऽज! दत्वेश! दयादमोदयम् ॥९॥ ५०

प्रथमतस्त्रिलक्षकतोरणार्द्धम् ॥

विशिष्टविद्यासु विशां विभो! विना त्वदागमं कः सृजतीह नैपुणम् ।
भवेच्च तत्त्वे तत एव वेत्तृ तदाशु त(तं) मे *वितराचलद्धलम्* ॥१०॥ ५१

त्रिलक्षणकतोरणे परतस्तोरणस्तम्भः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चरद्वरं मारभरं चरान्तरे हरन् प्रदेयाः शिवमेव देव! मे ।
त्वमेव दत्सेऽर्थितमन्तकान्तकृ-ज्जगत्त्रयोन्मीलदमन्दमोद! यत् ॥११॥ ५२
त्रिलक्षकतोरणेऽपरतस्तोरणार्द्धम् ॥

एवं सम्पूर्णं त्रिलक्षकतोरणबन्धचित्रं सस्वस्तिकम् ॥

सुरनरमुनिसुन्दरस्तवौघा दधति जिनाद्यकुशाग्रतां यदन्तः ।
तव तमपि गुणाब्धिचित्रे(त्र)मीश! चित्रैर्मम नुवतो वितरेष्ट सौख्यमाशु ॥१२॥ ५३

इति श्रीशत्रुञ्जयगिरिस्वस्तिकत्रिलक्षकतोरणबन्धचित्रैः श्रीशत्रुञ्जय-श्रीयुगादिजिनस्तवनं श्रीमुनिसुन्दरसूरिकृतम् ॥ इति युगपतद्विनेयलव(?) श्रीमुनिसुन्दरसूरिहृत्तरङ्गिण्यां जयश्र्यङ्कायां द्वितीयगूर्जरावती-तन्नरेश्वर-श्रीपत्तननगर-वर्णनश्रोतसि चैत्यषट्कचित्रमहाहूदे श्रीशत्रुञ्जयगिरिचैत्यबन्धचित्रान्तर्हृदे द्वितीये तद्गिरिवरालङ्कार-श्रीयुगादिस्तवरूपे गिरिस्वस्तिक-त्रिलक्षकतोरणबन्धनामा महातरङ्गः प्रथमः ॥ मूलतश्च [६-७] ॥

अथ चैत्यचित्रम् –

जयश्रियाऽन्तर्द्विषतां महोदयप्रदस्तवं श्रीऋषभप्रभुं स्तुमः ।
गरीयसि श्रीविमलाचले स्थितं तच्चैत्यचित्रैर्भवभीतिशान्तये ॥१॥ ५४
गर्भागारे देवस्य दक्षिणतः पङ्क्तिद्वयेन प्रथमा भित्तिः ॥

समग्रविद्यापुरुषार्थसाधनो-पदेशदानाज्जगतोऽप्यनादिनः ।
य या(आ)दिकर्ता समभूज्जिनागमं युगादिदेवं तमुपास्महे मतम् ॥२॥ ५५
तादृश्येव वामतो द्वितीयभित्तिः ॥

यं रीणदोषं प्रवदन्ति सूरय-स्तत्त्वप्रबोधाऽस्ततमोमयाः ---(?) ।
जगद्धितार्थं च सदोद्यतः प्रभुः कर्माणि धर्मांश्च जनान् शशास यः ॥३॥ ५६
पङ्क्तिद्वयेन तलबन्धः ॥

मयेति निर्द्धूतभवोऽर्थ्यसे प्रभुः सभक्तियोगादधता शिरोनतम् ।
स्तुतक्रमेन्द्रैर्मम मानसालये विधेहि नित्यं जिन! वासमादिम! ॥४॥ ५७
अर्थतो युग्मम् ॥

मयाऽर्च्यतां विश्वपतिर्जिनेन्द्रः स यः पुराणः पुरुषो युगादौ ।
चचार कारुण्यनिधिर्व्यवस्थां स्फुटां समग्रां जगतां हितार्थी ॥५॥ ५८
सतलमण्डपस्तम्भबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तविज्ञानरमानिवास! सदोदितानन्दविलाससार! ।
रतीशजेतर्भगवन्! भयानां नामापि निर्मोशय नाभिजात! ॥६॥ ५९

पीठे उपरितनदण्डकाकारबन्धः ॥

यस्तातकल्पो जगतां हितैककर्ता स्मृतोऽप्यातनुते सुखानि ।
नित्योदितज्ञाननिधिर्जिनेशः शमः स देयाद् भवदुःखभीतेः ॥७॥ ६०

अधस्तनबन्धः ॥

अपारसंसारदरक्षयाय रतीशहन्ता भविनां य एव ।
अशेषजीवाभयहेतुरेकः स एव सेव्यो भगवान् शिवाय ॥८॥ ६१

प्रथमचतुष्किका[का]रबन्धः ॥

समीहिताभावभृतो विशोकचर्या श्रियस्ते मनुजा भजन्ति ।
सदापि येषाममलाननानि रसात् स्तवं ते समकुर्युरेकम् ॥९॥ ६२

द्वितीयचतुष्किकाकारबन्धः ॥

रङ्गच्छिवश्रीतिलकोपमानि तिरस्कृताघानि भवन्ति नूनम् ।
रसान्तरज्यानि कृता मुदेश! नानाज्ञवृन्दानि भवन्नतानि ॥१०॥ ६३

तृतीयचतुष्किकाकारबन्धः ॥

नाथ! प्रमाथं नतनिर्जरेश! नयस्फुरद्भावरिपून् ममारं(र?) ।
नार्हन्त्यु[पे]क्षां वधका यदेते तत्त्वश्रियां देव! कृताघनाश! ॥११॥ ६४

चतुर्थचतुष्किकाकारबन्धः ॥

तव भवदरहतिनिरते तेजोजितदिनकरस्य चरणयुगे ।
नितरां विनतिकरोम्यह-मसमर! शिवसदन! भवविभव! ॥१२॥ ६५

[सो]पानसप्तकबन्धः ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० महापर्व० द्वितीये गूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाह्रदे स्वस्वदेवस्तुतिरूपे श्रीशत्रुञ्जयालङ्कार-श्रीयुगादिचैत्यचित्रान्तर्हृदे श्रीयुगादिस्तुतिमये गर्भागारस्तम्भपीठसोपानबन्धनामा महातरङ्ग महाह्रदेऽयं मूलतश्च तरङ्गः [८] ॥

तत्त्वज्ञानयुत! क्षीणकर्माऽसङ्गाऽतनुप्रभ! ।
प्रभोऽनादितमोध्वंसाज्जगदेतन्नतं तव ॥१३॥ ६६

शिखरे युगादिदेवनामाङ्कितकमलबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जिन! पापारिविध्वंससज्जोद्धततमोहर! ।
विधेहि हितकृत्! काममहशाममोह! मे ॥१४॥ ६७
शिखरे गर्भाङ्गा(गा)रिकाबन्धः ॥
जितमोहमहासेन! नमद्दानवमानव! ।
भगवन्! भवभीतानां नाथ तानव सा तव (?) ॥१५॥ ६८
शिखरे देवाद्दक्षिणतः प्रथमबहिर्देवकुलिकाबन्धः ॥
भवभ्रान्तिभयध्वान्त-तमोरिस्वमहाव्रत! ।
निर्वृति(तिं) तपसा प्राप परां कामामहानितः ॥१६॥ ६९
तादृश्येव वामतो देवकुलिका ॥
बुधसंमतसर्वार्थ! तत्त्वदेशनकोविद! ।
तवाऽऽगमलगच्चित्तो धत्ते प्राणी न को मुदम् ॥१७॥ मण्डपबन्धः ॥७०
तवाऽर्हन्! गोभरैस्तात! तरसा याति संक्षयम् ।
रवेरिव जगत्स्वामिन्! मिथ्यात्वतमसश्चयः ॥१८॥ ७१
शिखरे मध्यदेवकुलिका ॥
जिन! त्रिभुवनाधार! रमानन्दनवारक! ।
करुणाकर! मां नेतं(तः?) पाहि त्वं परमार्थ[तः] ॥१९॥ ७२
शरणं भवभीतानां नाऽपरोऽस्ति त्वया विना ।
नाथं त्वामेव तत् सः (?सन्तः?) श्रयन्त्यभव! तत्त्वतः ॥२०॥ ७३
द्वाभ्यां शिखरे उभयतो द्वितीये खण्डदेवकुलिके ॥
त्वामेव जगतामीशं शरणं भीतभाविनाम् ।
नाथ! ज्ञाः प्रतिपद्यन्ते तेजसामेकमन्दिरम् ॥२१॥ ७४
त्वद्दर्शनरसप्रीतं तत्त्वज्ञानवतां मनः ।
न रतिं लभतेऽन्यत्र त्रस्तमायामदस्मर! ॥२२॥ ७५
द्वाभ्यां शिखरे सर्वोपरितनभागे तथैव मध्यपङ्क्ती ॥
सर्वाभीष्टश्रियां मूलं ललनासङ्गवर्जितः ।
तपनीयरुचिः श्रेयो योगीन्द्रो ददतां परम् ॥२३॥ ७६
स्मरामि जगतां तात! तव पादयुगाम्बुजम् ।
जयं येन लभे भावबलाद् विद्वेषिणां पुरः ॥२४॥ ७७
तथैव बहिःपङ्क्ती ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं चतुर्थ्यां सामलसारकशिखरोपरितनभागबन्धः ॥

भगवन्! गरिमाम्भोधे! विधेय(हि?) विधिसङ्गमम् ।
मतं ततशमं देहि यतः स्यां गतदुस्तमाः ॥२५॥ कलशः ॥ ७८
यस्याऽऽज्ञया नैव विना शिवश्री-र्लभ्याऽप्यलभ्यैव तया बुधैः स्यात् ।
स कान्तसातं विततं तनोतु, युगादिदेवो भविभद्रकर्ता ॥२६॥ ७९
आनन्दसम्पदं पुंसां दत्ते दृष्टोऽपि यो जिनः ।
स विश्वानतपादो नः करोतु शमशं वशम् ॥२७॥ ध्वजबन्धः ॥ ८०
एवं स्तुतः प्रथमतीर्थपतिस्त्रिलोकी-नेत्रोत्सवः सकलमङ्गलकेलिसद्म ।
विश्वार्चनीयविमलाचलमौलि[मौलि]र्देयान्ममाप्यमलकेवलबोधिलक्ष्मीम् ॥२८॥
श्री शत्रुञ्जयमौलिमण्डनमिति श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२९॥ ८२

इति श्रीशत्रुञ्जययुगादिदेवस्तवनं तच्चैत्यबन्धेन ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० श्रीदेवसुन्दरसूरिपदपद्मसौभाग्यार्णवानुगामिन्यां श्रीमहा० द्वितीये श्रीगूर्जरावतीदेश-तन्नरेश्वर-श्रीपत्तननगरवर्णनादि-श्रोतसि चैत्यषट्कचित्रमहाहृदे स्वस्वदेव० श्रीशत्रुञ्जयालङ्कारश्रीयुगादिजिनचैत्य-चित्रान्तर्हृदे श्रीयुगादिजिनस्तुतिमये तृतीयचतुर्थे(र्थौ) या(ला?)घवमागप(?) (युगप?)त्तरङ्गौ। पूर्वतरङ्गद्वयस्य प्रौढत्वादेते त्रयो लघवः। एवमन्यत्रापि ज्ञेयम्। महाहृदे च नवमदशमौ मूलतश्च तरङ्गः(ङ्गौ) ॥ सम्पूर्णश्चाऽयं श्रीशत्रुञ्जयालङ्कार-श्रीयुगादिजिनस्तवरूपस्तच्चैत्यचित्रान्तर्हृदो द्वितीयः । मूलतश्च [९-१०] ॥

अथ श्रीशान्तिनाथचैत्यनामान्तर्हृदः श्रीशान्तिजिनस्तुतिमयः प्रस्तूयते ॥ तथाहि -

जयश्रीजिनानन्तसद्भूतरङ्गद्गुणश्रीनिधे! मुक्तिलक्ष्मीद्धरङ्ग! ।
गतक्रोधलोभादिसंरम्भशान्ते! जगद्वन्द्यपादारविन्दाऽप्रमाद! ॥११॥ ८३

गर्भागारे देवाद्दक्षिणतो द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां प्रथमा भित्तिः ॥

सतां तेऽभितो नाममन्त्रः प्रदत्ते स्मृतेर्गोचरं प्रापितः शर्मसारम् ।
ततस्त्वं जिन! ध्येयवर्गेष्वशेषेष्वसि ख्यातिमानादिमो विश्वनेतः! ॥२२॥

तादृश्येव द्वितीया भित्तिः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जगन्नायकैकान्तिकात्यन्तिकं ते हितं शास्ति सिद्धान्तवाक् तेन सन्तः ।
यतन्ते तदुक्तार्थतत्त्वानि बुद्ध्वा यथावत् स्वनुष्ठानकृत्यैर्नितान्तम् ॥३॥ ८५
तलबन्धः ॥

रमाकृष्टिकृन्नामधेयं नतास्त्वां व्रजन्त्याशु संसारदुःखावसाने ।
गदस्तोमजातीकारतुल्ये-ष्वनल्पेषु सद्भोगसौख्येष्वतः (?) ॥४॥ ८६
उपरितनपद्मशिलारूपभारपट्टबन्धः ॥

तनुश्रीजितोद्दीप्तकल्याणकान्ते! तपस्तेजसा प्रास्तभा! नाथ! भानो! ।
कृतिप्रीतिकृद्भाग्यलभ्यप्रणाम! प्रभो! पाहि मां विश्वतातः सुतन्त्र! ॥५॥ ८७
सतलमण्ड[प]स्तम्भबन्धः ॥

श्रियं त्वं महानन्दसौख्य(ख्यानि) दत्से जिनाधीश! भव्याङ्गिनां भक्तिभाजाम् ।
निबुध्येति तत्त्वं भवं(वन्तं) भजन्ते न के नाथ! विघ्नावलीघातनिघ्नम् ॥६॥
पीठे उपरितनदण्डकाकारबन्धः ॥ ८८

रसायां स्वजन्म प्रबुद्धाः स्तुवन्ति प्रभो! त्वां नमन्तोऽधिकं स्वर्गलोकात् ।
महानन्दसौख्ये समीः हो(समीहा?)वतां यत्, परो नास्त्युपायोऽर्थिताप्त्यै प्रधानम् ॥७॥
पीठेऽधस्तनदण्डकः ॥

परानन्दमयः शान्तिः कर्माम्भोदसमीरणः ।
परमात्मा जयत्यर्हन् प्रशान्तारिजभीभरः ॥८॥ ९०
शुभभावनतामर्त्य! संत्यक्तधनबान्धव! ।
वधवर्जितसिद्धान्त! मम भिन्द्धि तमो जिन! ॥९॥ ९१
द्वाभ्यां जालिकाकार एकादशस्पर्द्धकबन्धः ॥

वृजिनाम्मा(म्भो?)चकाऽधीश! सिद्धानन्तचतुष्टय! ।
श्रितः कस्त्वां विपद्धारं घ्नन्तं शंमय! नो जनः ॥१०॥ ९२
पीठे जालि[का]काशे स्वस्पर्द्धक ऊर्ध्वदक्षिणेतरदण्डकद्वयबन्धः ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० विज्ञप्तित्रिदशतरङ्गिण्यां० श्रीशान्ति-जिनस्तवरूपचैत्यचित्रान्तर्हृदे सपीठस्तम्भगर्भागारबन्धनामा महातरङ्गः प्रथमः । महाह्रदे च एकादशः ११ मूलतश्च ॥

सर्वज्ञ! श्रीन! संप्राप्तभीतिशान्ति समन्ततः । (?)
नमन्ति त्वां सदा के केऽनानाज्ञाः सद्धनाथ! न(?) ॥११॥ ९३
शिखरस्य मूले श्रीशान्तिनाथेति नामगर्भं कमलम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जगन्मोददं दर्शनं नो जिनेदं द(?)मी(मा)प्यते ते महापुण्यहीनैः ।
सदा तेन न प्रार्थयेऽन्यत्ततोऽहं हताज्ञानपापांर्च्य! नैपुण्यपीनैः(?) ॥१२॥ ९४
शिखरगर्भेऽन्धारिकाबन्धः ॥

जना ये स्मरन्ति प्रभो! भावसारं जगत्तात! ते नाममन्त्रं क्षितारम् ।
महानन्दशर्मश्रियां ते विलासं लभन्ते विधायाऽऽशु कर्मप्रवासम् ॥१३॥ ९५
शिखरमूले देवाद्दक्षिणतोऽर्द्धाभ्यां देवकुलिकाद्वयबन्धः ॥
श्रये त्वां जगन्नायकाऽमन्दमोदं समग्रेहितश्रीलताकन्दक[न्दम्?] ।
भवन्तं श्रिता यद्भवापायभीता भवन्त्येव कैवल्यलक्ष्मीपरीताः ॥१४॥ ९६
तथैव वामतो देवकुलिके ॥

प्राणदाने तदा पारापते त्वयेतिषे(?) यथा ।
मयि पाल्ये कृपापात्रे यतस्वाऽद्य ऋषे! तथा ॥१५॥ मण्डपः ॥ ९७
अनन्तदर्शनज्ञाननताखण्डलमण्डल! ।
जगद्ध्येयपदाम्भोज! जय मञ्जुलमङ्गल! ॥१६॥ ९८
तापोत्तीर्णसुवर्णाभ! भग्नभावारिविक्रम! ।
जय कर्ममयस्फीततमोभाररविक्रम! ॥१७॥ ९९
तत्त्वविद्यामहाम्नायं यस्मिंस्ते वचनं विना ।
मोहधूर्तस्य कुर्वीततमां को वञ्चनं हि न ॥१८॥ १००

द्वितीयस्थ(स्त)रे देवाद्दक्षिणत आरभ्य त्रिभिर्मध्यमदेवकुलिकात्रयं क्रमात् ॥

त्वया यो विजिग्ये भवभ्रान्तिभीतिं तिरस्कुर्वता लीलयाऽपीश! मोहः ।
परेऽस्याऽपि देवा गताः प्रेष्यभावं
बभा(प्रभो)ऽतस्त्वमेवाऽर्च्य! एवं ममोहः ॥१९॥ १०१
शिखरे सर्वोपरितनभागे मध्यपङ्क्ती ॥

त्वमेवाऽऽश्रितानां प्रभुर्मुक्त! नूनं नताऽमर्त्य! कर्तुं भवभ्रान्त्यपोहम् ।
निबुध्येति वाञ्छन् महानन्दसातं तवैवांऽह्रियुग्मं शरण्य! श्रयेऽहम् ॥२०॥ २
तथैव बहिःपङ्क्ती ॥

एवं द्वाभ्यां सामलसारकशिखरोपरितनभागबन्धः ॥
अमानमानसं स्तोत्रे तव वीततमोभर! ।
रतिं मम परध्ये (?) लभतां वै भवारसम् ॥२१॥ कलशः ॥ ३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तैर्भवैर्भ्राम्यतो गोचरत्वं त्वमागाद् दृशोर्मेऽद्य भाग्येन तात! ।
ततो रक्ष मां दीनमेनं सुनम्रं नतानन्दन! ध्यानलीनं घनं ते ॥२२। ध्वजः ॥ ४
एवमानुतगुणो मयका श्रीदेवसुन्दरगुरूदितभक्त्या ।
ज्ञानदर्शनसुसंयमशुद्धिं त्वं विधेहि मम शान्तिजिनेन्द्र! ॥२३॥ ५
श्रीशान्तिं जिनराजमित्यमलधीर्यः स्तौति भूपावली-
शक्रालीमुनिसुन्दरस्तुतिपदं चित्रैर्विचित्रक्रमैः ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२४॥ ६५ ६

इति श्रीशान्तिनाथजिनस्तवनं तच्चैत्यबन्धेन भट्टारकश्रीमुनिसुन्दरसूरिकृतम् ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० श्रीमहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वरश्रीपत्तनादिनगरवर्णनश्रोतसि चैत्यषट्कचित्रमहाह्रदे स्वस्वदेव० श्रीशान्तिजिनचैत्यचित्रान्तर्ह्रदे श्रीशान्तिजिनस्तुतिमये द्वितीयतृतीयौ युगपत्तरङ्गौ ॥ महाह्रदे च द्वादशत्रयोदशौ मूलतश्च ॥ सम्पूर्णश्चाऽयं श्रीशान्तिस्तवमयः श्रीशान्तिचैत्यचित्रान्तर्ह्रदः ॥

अथ श्रीरैवतचैत्यबन्धचित्रनामाऽन्तर्ह्रदः श्रीरैवतालङ्कारश्रीनेमिस्तवमयः प्रस्तूयते । तथाहि –

श्रीनेमिं प्राप्तमोहारिजयश्रीकं जिनं स्तुवे ।
नेतारं जगतां स्फीतमोदाद् रैवतदैवतम् ॥१॥ ७

रैवतगिरीन्द्रबन्धचित्रे पूर्वार्द्धेनोपत्यकाबन्धः । उत्तरार्द्धेन च प्रथमपङ्क्तौ पूर्वस्यां प्रथमशिखरबन्धः ॥

मोक्षाप्तिः सुलभा तेषां श्रीनेमे! शुद्धधीजुषाम् ।
श्रीनन्दनजितं त्वां ये स्तुवन्त्यर्कं तमश्चये ॥२॥ ८

अर्द्धाभ्यां तत्रैव मध्यतृतीयशिखरयोर्बन्धः ॥

वत्मि(च्मि?) तानुत्तमान् देव! तेषां कुर्वे च संस्तवम् ।
जुषन्ते ये जगत्तातं त्वां ददानं समीहितम् ॥३॥ ९

रैवतगिरिबन्धचित्रे द्वितीयपङ्क्तावर्द्धाभ्यां शिखरद्वयबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समस्तजगदानन्द-कन्दवारिदसोदर! ।
गलत्तापं श्रुतं राहि पाहि मां सदयादर! ॥४॥ १०

रैवतगिरिबन्धचित्रे सर्वोपरितनशिखरस्याऽधित्यकायाश्च बन्धः ॥

एवं चतुर्भिः श्रीरैवतगिरिबन्धचित्रम् ॥ अथ रैवताद्रौ नेमिचैत्यबन्धः -

जयश्रीश! समासेव्य! नेमे! रैवतमण्डन! ।
कन्दर्पाऽनल्पदर्पाग्नि-नवाम्भोधरसोदर! ॥५॥ ११

देवाद्दक्षिणतः प्रथमभित्तौ प्रथमा पङ्क्तिः ॥

यशसा स्फुरता विश्वे प्रोर्णोनोर्युक्तमीश्वरम् ।
मुधा कामवधख्यातिं वहन्तं सत्यकामभित् ॥६॥ १२

तत्रैव द्वितीया पङ्क्तिः ॥

यतिन्! जय जगत्तात! मोहक्लेशभरोज्झित! ।
भवभीतभवित्रातर्! नमद्विदुरमुक्तिद! ॥७॥ १३
शर्मिस्त्वां यं स्मरस्यान्तकारिणं ..... श्रितम् ।
जगदेतद्धीतं ..... (?) तं स्तुवे दुष्कृतच्छिदम् ॥८॥ १४
हर लोकत्रयीबन्धो! शिवावास! विभो! मम ।
गतातङ्क! महःसिन्धो! दुरन्ताः सकलापदः ॥९॥ १५

त्रिभिर्भित्त्यन्तरालपूरककदल्याकारबन्धः ॥

भगवन्! भवभीमारे! रक्ष मां शरणागतम् ।
यत् त्वं कृतप्रतिज्ञोऽसि रक्षितुं शरणागतान् ॥१०॥ १६
भवन्तं भावतो विज्ञा विनस्य(?म्य?) जगतां हितम् ।
नहि के के शिवं प्राप्ता भङ्क्त्वा कर्ममहावनम् ॥११॥ १७

द्वारशाखाद्वयम् ॥

पारगाऽरिहर! स्फारकान्तसात! गतक्षत! ।
शान्त! दान्त! हतस्फीतकामरामतमः.... (?) ॥१२॥ १८

उंबरबन्धः ॥

गता मम हिताऽमर्त्यै माभार्णववर्णनम्(?) ।
मताप्त्यममतेप्त्यमर्त्यैरशक्यं भावभाजनम् ॥१३॥ १९

उत्तरङ्गबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति विनेयलवश्रीमुनिसुन्दरसूरि० श्रीरैवतकाऽचलालङ्कारश्रीनेमिस्तवमयः श्रीरैवतगिरिश्रीनेमिचैत्यचित्रान्तर्हृदे गर्भागारमूलभित्तिद्वारबन्धनामा प्रथमो महातरङ्गः। चैत्यषट्कबन्धचित्रमहाहृदे च मूलतश्च [१४] ॥

जगतां यो जयं चक्रे लीलयाऽपि महाभटः ।
सोऽपि कामरिपुः स्वामि-स्त्वया भग्नः स्फुरत्प्रभः ॥१४॥ २०
यत्नात् स्तोत्राणि शक्रोऽपि करोत्यविरतं तव ।
एवमेव यतः श्रेयो नीराग! महिमार्णव! ॥१५॥ २१

द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां गर्भागारस्य तलबन्धः ॥ एवमेकादशभिः गर्भागारबन्धः सम्पूर्णः ॥

भदन्तमिद्धातिशयाभिरामं महोदयानन्तसुखं विरागम् ।
गताखिलाज्ञानतमःप्रचारं रवाऽस्तमेघं जिनमानमामि ॥१६॥ २२
वचःसुधा यस्य भवार्त्तितापं पराभवं प्रापयतेऽङ्गभाजः ।
जगत्त्रयीवन्द्यपदारविन्दं दमीश्वरं तं जिनमाश्रयामि ॥१७॥ २३

द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां मण्डपतलबन्धः ॥

महामुने! वीतसमग्रदोषं निरञ्जनं त्वां शिवपुर्यधीशम् ।
योगीश्वरं ध्येयपदं विनम्य बुधाः कृतार्था न परं नमन्ति ॥१८॥ २४
विश्वोत्तर! ब्रह्म - - निधेहि, निरञ्जन! ज्ञानमयाऽनपाय! ।
सम्यग् ममाऽधीशनिजस्वरूपो-पलम्भमज्ञानतमो निहत्य ॥१९॥ २५

समण्डपप्रासादस्य पीठे द्वाभ्यामधस्तनमहापङ्क्तिरूपतलबन्धः ॥

महोदयाध्वानमनादिमोह-ध्वान्तप्रचारेऽपि हि दीपिकेव ।
तवैव वाणी प्रकटीकरोति भव्याङ्गिनं तत्त्वरुचीर्वितत्य ॥२०॥ २६
शमाय वाणी भवतो भवार्त्तिदवानलानां भवति प्रकामम् ।
भव्याङ्गिनां मोदरसप्रवर्षं कादम्बिनीवादधती समन्तात् ॥२१॥ २७

द्वाभ्यां समण्डपप्रासादपीठे उपरितनमहापङ्क्तिरूपतलबन्धः ॥

ममत्वमुक्ताक्षयशर्मधाम! नामामृतप्रास्तभवार्तिदाव! ।
योगस्य कोटिं परमां प्रयात! तिरस्कृताऽनन्यज! नन्द नित्यम् ॥२२॥ २८
विनम्रदेवासुरमानवेश! यशोजितश्वेतरुचेऽस्तकाम! ।
समग्रवेदिन्! जय मुक्तलोभ! त्यक्ताघ! नेमे! शिवशर्मदाता(तः?)! ॥२३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समण्डपप्रासादपीठे प्रतिपादमेकैकभवनेन द्वाभ्यां मध्यगतोद्ध्वर्वदण्डकाकारस्तम्भाष्टकबन्धः ॥

महाज्ञानतपोध्यान! जगज्जनकृतावन! ।
नेमे! विनतनाकीन! जीया घनरुचे! जिन! ॥२४॥

समण्डपप्रासादपीठे मध्ये प्रकारान्तरेणाऽष्टदलं दलादिकमलं प्रथमम् ॥

भवभीतजगत्त्रातः! शमामृतरसाप्लुत! ।
रतिकान्तप्रभाघात! क्रियोद्यत! जगद्धित! ॥२५॥ ३१

तत्रैव तादृगेव कमलं द्वितीयम् ॥

मोहध्वान्तसमूहान्तरवे! प्रीतसुरार्चित! ।
भयोज्झितपदौ तात! नमामि तव सन्ततम् ॥२६॥ ३२

तत्रैव तादृगेव कमलं तृतीयम् ॥

विश्वाधार! गुणागार! निर्विकार! सुखाकर! ।
त्वं संसारभियां पारं देहि धीर! ममाऽचिरम् ॥२७॥ ३३

तत्रैव तादृगेव कमलं चतुर्थम् ॥ एवं कमलचतुष्कबन्धः ॥

एवं रैवतकाद्रिमण्डनमणिं श्रीनेमिविश्वप्रभुं
शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२८॥ ३४

इति श्रीरैवतकाचलमण्डन-श्रीनेमिनाथस्तवनं श्रीमुनिसुन्दरसूरिकृतम् ।

इति युगप्रधानावतारतपाबृहद्गच्छाधिराजपरमपूज्यश्रीदेवसुन्दरसूरिगुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णश्रीगुरुप्रभावपद्महृदप्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वरश्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कचित्रबन्धमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीरैवतकाचलालङ्कार-श्रीनेमिस्तवमयश्रीनेमिचैत्यचित्रान्तर्हृदे समण्डपप्रासादतलबन्धसहितपीठबन्धनामानो युगपद् द्वितीयतृतीयचतुर्था[स्त]रङ्गौ-(ङ्गाः) । चैत्यषट्(ट्क)बन्धचित्रमहाहृदे च [मूलतश्च १५-१६-१७] ॥

जगज्जैत्रस्य मोहारे-र्यमाश्रित्य जयश्रियम् ।
प्राप नेमिप्रभुस्तत्र रैवते तं [जिनं] स्तुवे ॥१॥ ३५

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ददस्व प्रशमं स्वामिन्! भवतापस्य मे रयात् ।
तवाऽऽर्त्तस्वाश्रितोपेक्षा न सङ्गतिव(म)ती ध्रुवम् ॥२॥ ३६
रमायां न ह्यभिप्राय: प्रायस्तेषां भवेन्नृणाम् ।
त्वदर्चनाफलाभिज्ञाः स्युर्ये तात! शिवार्थिन: ॥३॥ ३७

गर्भागारे उपरि पद्मशिलाबन्धः ॥

नष्टकर्मामय! प्रास्ताऽवनम्राङ्गिभवभ्रम! ।
महाज्ञानाद्युपायेन जय प्राप्त! शिवं जिन! ॥४॥ ३८

अर्द्धाभ्यां मण्डपत्रये द्वितीयद्वारशाखात आरभ्य स्तम्भषट्कोपरितन-भारपट्टद्वयबन्धः ॥

श्रीनेमे! नेमुरत्यन्तं तव ये भक्तितः पदौ ।
दौ:स्थ्यमेषां क्षयं यातं तत्त्वज्ञानवतां वशिन्! ॥५॥ ३९

मण्डपे प्रथमस्तम्भः ॥

धामधाम! गुणग्राममय! संसारपारग! ।
गतसर्वविकारेश! शमयाऽघमकाम! मे ॥६॥ तत्रैव द्वितीयः स्तम्भः ॥ ४०
देवा: सेवाकृतो नैव बहुधाऽपि परैः स्तुतां(ताः?) ।
तारयन्ति भवाम्भो[धि] धिग् मूर्खास्तान् श्रितान् श्रिये ॥७॥ ४१

तृतीय: स्तम्भस्तत्रैव ॥

स्स(स्म)रकारस्करे दाव-कर्णनागोचरप्रभ! ।
भगवन्! भवभीपारं रयाद्देहि ममाऽमम! ॥८॥ ४२

तत्रैव स्तम्भश्चतुर्थः ॥

तव भावभृतो जीवा वारवारं नतिं श्रिताः ।
तारयन्ति परं स्वं च चरणादरणे रताः ॥९॥ ४३

पञ्चमः स्तम्भस्तत्रैव ॥

कारंकारं गुणानां ते तेजोऽर्णव! नरः स्तुतिम् ।
तिरस्कृतभवो नूनं न को भवति भीतिमुक् ॥१०॥ ४४

तत्रैव स्तम्भः षष्ठः ॥

इति युगप्रधानावतारतपाबृहद्गच्छाधिराजपरमपूज्यश्रीदेवसुन्दरसूरिगुरु-गुणमहिमार्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमवदव० त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्व०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रूपे श्रीरैवतकाचलालङ्कार-श्रीनेमिस्तवमयतच्चैत्यचित्रान्तर्हृदे मण्डपभारपट्टद्वय-स्तम्भषट्कबन्धनामा पञ्चमस्तरङ्गः । चैत्यचि० महाहृदे च मूलतश्च[१८] ॥

संनम्रश्रीश! सन्देहनाशने त्वं समर्थवाक् ।
संयमीद्धसहा जीया नश्वराऽसम्मदारत! ॥(?) ॥११॥ ४५

शिखरमूलमध्ये श्रीनेमीश्वरेति नामगर्भं कमलम् ॥

सुरेशसेव्य! व्यपनीतमोह! हर्यक्ष! दुर्वाररतीशनागे ।
जयाश्रित! प्रप्रहतामिताघ! घनाम्भसार्वेततपोवनागे (?) ॥१२॥ ४६

शिखरे गर्भमध्ये शकु(शुक)नाशनासकाऽन्धारिकाबन्धः ॥

दृष्टे त्वदास्ये घनकायकान्ते! कान्ते भवेद्यः प्रमदो जनानाम् ।
नानार्त्तिकीर्ण[र्णेषु?] भवेषु तेन ते न च(भ्र)मन्त्यम्बुद! मोहदावे ॥१३॥ ४७

शिखरस्य मूले देवाद्दक्षिणतः पङ्क्तित्रयेण प्रथमदेवकुलिकाबन्धः ॥

तावन्मोहविषं नेमे! मेधां हन्ति मनस्विनः ।
वचनामृतमापीतं तव यावदनेन न ॥१४॥ ४८

तत्रैव पङ्क्तिद्वयेन द्वितीयदेवकुलिकाबन्धः ॥

रणेऽपि चरणेऽमाय! यत्त्वया वैरिणो जिताः ।
द्विधा क्षमाभृतस्तात! ततस्त्वां सर्वतो नताः ॥१५॥ ४९

तत्रैव देवदेवाद्वामतः पङ्क्तिद्वयेन तृतीयदेवकुलिकाबन्धः ॥

भवत्पदध्याननतिप्रभावात् पापं विनश्यत्यखिलं जनानाम् ।
विद्धं करौघैर्दिननायकस्य ततं यथा सन्तमसं क्षणेन ॥१६॥ ५०

तत्रैव वामतः पङ्क्तित्रयेण चतुर्थदेवकुलिकाबन्धः ॥

एवं सम्पूर्णः प्रथमः स्थ(स्त)रः ॥

यो लक्षसंख्यं किल संख्यदक्षः क्षणेन वैलक्ष्ययुतं चकार ।
नरेन्द्रवृन्दं समदं ददातु तुष्टिं स सर्वेष्टकृतेरकामः ॥१७॥ ५१

शिखरे मध्यमदेवकुलिकात्रयरूपे द्वितीयस्थ(स्त)रे प्रथमा देवकुलिका ॥

कल्पद्रुमो नेप्सितशर्मदाता ताताऽमराणां मणिरप्यनिष्टः ।
तव प्रभावाम्बुनिधेः पुरोऽत्र त्रपास्पदं कामघटोऽपि नित्यम् ॥१८॥ ५२

तत्रैव द्वितीया देवकुलिका ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिद्धौषधानीव भवद्वचांसि सितांशुकीर्ते! भविमण्डलस्य ।
हरन्ति संसारभयामयौघं घनाञ्जनश्यामतनोऽखिलज्ञ! ॥१९॥ ५३

तत्रैव तृतीयदेवकुलिकाकारबन्धः ॥

कैवल्यानन्दरूपाय यशोजितसितद्युते! ।
तेजसामेकनाथाय यमिंस्तुभ्यं नमोनमः ॥२०॥ ५४
विवशीकृतविश्वास्तारागोपीचटूक्तयः ।
-- तिनो भावतस्तेन नयन्ति स्म मनोभ्रमम् ॥२१॥ ५५

शिखरोपरितनभागे द्वाभ्यां दक्षिणत ऊर्द्ध्वं पङ्क्तिद्वयम् ॥

भवतृष्णामहातापपरिहाणेः सदोदितम् ।
तवानन्दमयं शैत्यं त्यक्तौपम्यमिदं स्तुमः ॥२२॥ ५६
तव स्तुतिरतस्याऽऽशु शुद्धिः सुमलिनात्मनः ।
नष्टाऽदृष्टमलत्वेन नतेन्द्र! भवतान्मम ॥२३॥ ५७

तत्रैव वामतः पङ्क्तिद्वयम् ॥

एवं चतुर्भ्यां सामलसारकशिखरोपरितनभागबन्धः ॥

स्मरज्वरतिरस्कार! प्रभो! क्षिप्रं महोदयम् ।
यमिन्! मम शयप्रासं कुरुष्व करुणाकर! ॥२४॥ ५८
नतेन्द्र! कुरु रङ्गं मे यशोमय! तवाऽऽगमे ।
ज्ञात्वेदं विदधे मन्दं येन भावद्विषां मदम् ॥२५॥ ५९

अर्द्धाभ्यां बृहन्मण्डपादुभयतो लघुमण्डपद्वयबन्धः ॥

अथ बृहन्मण्डपः –

प्राप्तानन्तशिवश्रीक! करुणाक्षीरसागर! ।
रतीशद्विपसिंहाभ! भद्रं देहि महोदय! ॥२६॥ ६०
महद्भिर्यैर्विभो! पीतं तवाऽऽगमरसायनम् ।
न तान् विबाधते भीमो मोहाह्वो हि महामयः ॥२७॥ ६१

महामण्डपे द्वाभ्यां मध्यपङ्क्ति ॥

यतमानास्त्वदर्चायां यान्ति नैवाऽधमां गतिम् ।
तिरस्कृतभवाः किन्तु तुष्यन्ति शिवसम्पदा ॥२८॥ ६२
ज्ञाता(त)निःशेषविज्ञेय! यशोभृतजगत्त्रय! ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत्याचारस्य --- देह्या शुद्धिं वशिप! मे सदा ॥२९॥ ६३

महामण्डपे बहि:पङ्क्ती ॥ एवं चतुर्भ्यां सकलशमहामण्डपः ॥

यत्नः शिवश्रीसुखसङ्गमाय यस्य स्तुतौ स्यात् त्वमयं विधेहि ।

हितं ममाऽनन्तमतन्द्रतत्त्व! तन्त्रेभवीतक्षतसात नेतः! ॥३०॥ ध्वजः ॥ ६४

एवं स्तुतो रैवतमौलिमौले! मयाऽपि मुग्धोचितसंस्तवेन ।

विधेहि नेमे! मम बोधिशुद्धिं ततो भवेद् येन वशा शिवश्रीः ॥३१॥६५

द्वाभ्यां सदण्डध्वजबन्धः ॥

एवं रैवतकाद्रिमण्डनमणिं श्रीनेमिविश्वप्रभुं

शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।

आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो

मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥३२॥ ६६

इति श्रीरैवतकालङ्कार-श्रीनेमिनाथस्तवनं श्रीमुनिसुन्दरसूरिकृतम् ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्य-श्रीदेवसुन्दरसूरिगुरु-गुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णश्रीगुरुप्रभाव-पद्महृदप्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वरश्रीपत्तननगरादिवर्णनस्रोतसि चैत्यषङ्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीरैवतकाचलालङ्कारश्रीनेमिचैत्यचित्रान्तर्हृदे श्रीरैवतकाचलाल-ङ्कारश्रीनेमिस्तोत्रखण्डरूपे शिखरमण्डपकलशध्वजबन्धनामानः षष्टसप्तमाऽष्टमाः युगपदेव तरङ्गाः । चैत्यमहाहृदे च मूलतश्च [१९, २०, २१] ॥ सम्पूर्णश्चाऽयं श्रीरैवतकाचलालङ्कारश्रीनेमिस्तवरूपश्रीरैवताद्रि-श्रीरैवतकाचलालङ्कार-श्रीनेमिमहा-चैत्यबन्धचित्रान्तर्हृदः । अन्तराले प्रथमस्तोत्रस्याऽन्ते "एवं रैवतकाद्रिमण्डन-मणि"मिति काव्यस्य, द्वितीयस्तोत्रस्य चादौ "जगज्जैत्रस्ये"ति श्लोकस्य चाऽपाठे एकमेव महत् स्तोत्रं भवति ॥

अथ श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यबन्धचित्रनामान्तर्हृदः । तत्र श्रीपार्श्व-स्तुतिरूपः(प)स्तोत्रद्वयेन प्रस्तूयते । तत्र पूर्वं जालिकाबन्धरूपपीठबन्धस्तोत्रम् —

श्रीमत्पार्श्वविभो! वच्मि जीरापल्लिविभूषण! ।

स्तुतीस्ते चैत्यचित्रेण द्वैधद्वेषि जयश्रिये ॥१॥ ६७

प्रस्तावनाश्लोकः, चित्रादधिकः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जय श्रीपार्श्व! दुर्वारि(र)विघ्नोच्चयहतिक्षम! ।
भगवन्! भवनिस्तारकर! भावयुजा(जो?) जिन! ॥२॥ ६८
परमज्ञानविज्ञातसर्वभाव! महाशय! ।
जगदानन्दसन्दोहनिदान! जननादिक! ॥३॥ युग्मम् ॥ ६९

पीठे जालिकाबन्धे देवाद्दक्षिणत आद्योद्धर्वदण्डके मध्यभागकोणादारभ्य ऊद्धर्वाधोगत्या द्वितीयप्रान्तोर्ध्वदण्डकमध्यप्रविष्टप्रान्तपीतवर्णप्रथमपङ्क्तिबन्धः ॥

जगत्तात! परज्ञानदूरीकृततमोभर! ।
जिनेश! तव संसार-भीतोऽहं शरणं श्रये ॥४॥ ७०
पादि(हि?) मं(मां?) तद्दयासत्रधामाऽरीण! हितालय! ।
त्वमेव जगतां येन पालनेऽलमसि प्रभुः ॥५॥ ७१

तत्रैव तथैव तत एवाऽऽरभ्याऽध[ऊ]द्धर्वगत्या नीलवर्णद्वितीयपङ्क्तिबन्धः ॥

विकाररहिताकार! नलिनीदललोचन! ।
निशाकान्तमदप्रान्तकरकान्तगुणानन! ॥६॥ ७२
नीलोत्पलविनीलाङ्ग! जगत्त्राणलसन्मनाः! ।
असंख्यसत्त्वसन्देहहरणक्षमभाषित! ॥७॥ ७३

तत्रैव तथैवाऽऽद्योर्ध्वदण्डके उपरितनभागकोणादारभ्य प्रथमा मूलतश्च तृतीया नीलवर्णा ऊर्ध्वाधोगामिनी पङ्क्तिः ॥

विश्वापापाऽतिदुष्टारिलीलाकृतजयादर! ।
प्राप्त त्रैलोक्यनिष्णात-पूज्यभावगुणोदय! ॥८॥ ७४
सर्वज्ञानरमापात्र! परमः पारगामिनाम् ।
त्वमेव नय मां क्षीणकषायं स्वपदं विभुः(भो!) ॥९॥ ७५
चतुर्भिः कलापकम् ॥

तत्रैव तथैव तत एव कोणादारभ्याधऊद्धर्वगामिनी रक्तवर्णा द्वितीया मूलतश्च चतुर्थी पङ्क्तिः ॥

कर्मसन्तप्तसंसारि-सुधाह्रदसमाऽमम! ।
फणिस्फारफटाटोपमण्डितेश! शिवालय! ॥१०॥ ७६
स्वर्णाचलशिरःस्नात! नम्रीभूतसुरव्रज! ।
जिनराज! जगत्त्राण! त्वं मां रक्ष(क्षाऽ)क्षितारक! ॥११॥ युग्मम् ॥ ७७

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रैव तथैव आद्योद्धर्वदण्डकेऽधस्तनकोणादारभ्योद्धर्वाऽधोगामिनी रक्तवर्णा प्रथमा मूलतश्च पञ्चमी पङ्क्तिः ॥

करोति तव यो ध्यानं सर्वसातस्य साधनम् ।
गताशुभ! न दुष्प्राप-स्तस्य वासो महोदये ॥१२॥ ७८

विहिता[नं]तभीभङ्ग! सत्प्रभावक्रमाम्बुज! ।
त्वदेकशरणं दीनं मां कुरुष्व सुखाश्रितम् ॥१३॥ ७९

तत्रैव तथैव तत एव कोणादारभ्य द्वितीया मूलतश्च षष्ठी नीलवर्णा पङ्क्तिः ॥ एवमूर्ध्वाधोगामिपपङ्क्तिषट्केन द्वादशश्लोकग्रथितेन मिथःसंवलितेनाऽन्तरा स्पर्द्धकानि कुर्वता जालिकाबन्धः सम्पूर्णः ॥

शमामृतरसाचान्तं त्वन्मुखं लोचना[स]मम् ।
वीक्ष्य विज्ञायते तात! मुक्तिर्वशमिता किल ॥१४॥ ८०

पीठे जालिकायामधस्तनी सरलप्रलम्बा पङ्क्तिः ॥

भवनीरधिपाराय नीलतारस्फुरद्वसो ।
वीरपोतनिभं पापाऽपृहं त्वां संश्रयाम्यलम् ॥१५॥ ८१

पीठे जालिकायामुपरितनी सरलप्रलम्बा पङ्क्तिः ॥

भद्राणि वितर व्याज-हीनां धर्मकलां दिशन् ।
गतशोक! सदाप्रीत! भक्त्या ऋभुनतक्रम! ॥१६॥ ८२

पीठे जालिकायामुभयतो अर्धाभ्यामाद्यन्तयोरूद्धर्वदण्डकाकारपङ्क्तिद्वयम् ॥ इति पञ्चदशभिः सम्पूर्णो जालिकाबन्धाकारः पीठबन्धः ॥

एवं **जीरापल्लिका**मौलिमौले! पार्श्व! श्रीमन्! संस्तुतो भक्तियोगात् ।
देयाः स्वामिन्! वारिराशे! महिम्नां सर्वप्रेयः! श्रेयसां मे विलासम् ॥१७॥८३

**श्रीजीराउलिपार्श्वनाथ**मिति यः सर्वेन्द्रपद्मावती-
वैरोट्यामुनिसुन्दरस्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोद द्यो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥१८॥ ८४

इति श्रीजीरापल्लिकामौलिमण्डनश्रीपार्श्वनाथस्तवनम् । तच्चैत्यबन्धेन श्रीमुनिसुन्दरसूरिकृतम् ॥ इति युगप्रधानावतार तपाबृहद्गच्छाधिराजपरमपूज्यश्रीदेवसुन्दरसूरिगुरुगुणमहिमाऽर्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमव०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्व-चैत्यचित्रान्तर्हृदे तत्पार्श्वस्तुतिरूपे पीठबन्धनामकौ प्रथमद्वितीयौ युगपदेव तरङ्गौ ॥ चैत्यष० महाहृदे च मूलतश्च (२२-२३) ॥ सम्पूर्णं च ताभ्यां प्रथमद्वितीयाभ्यां तरङ्गाभ्यां प्रथमं स्तोत्रम् ॥

जयश्रियो मुक्तिपदस्य दातः! पद्मावतीध्येयपदारविन्द! ।
**श्रीजीरिकापल्ल्य**वतंस! पार्श्व! नागेन्द्रसंसेव्य! महाप्रभाव! ॥१॥ ८५
यतः समग्रामरमर्त्यवन्द्यात् स्तुताद् वशीस्याच्छिवशर्मलक्ष्मीः ।
स्तवीमि तं त्वां जगदीश! पार्श्व! समीहितं येन रयाल्लभेयम् ॥२॥ ८६

गर्भागारे देवाद्दक्षिणतो भित्तौ तन्निष्पादकपङ्क्तिद्वयेन शाखाद्वयम् ॥

यतमानस्तव स्तोत्रे क्षिपते कर्मसंकरम् ।
चिनुतेऽपरदेवानां स्तवे त्वनघ! तं नरः ॥३॥ ८७
तज्ज्ञास्तेन चिदां पात्रे त्वय्येव कलयन्त्यरम् ।
स्तुत्याक्षेपमनन्तानां गुणानां नन्दने परम् ॥४॥ ८८
ज्ञमण्डलभवभ्रान्तिभिदोऽर्हन् हेतवः शुभे ।
नीलोत्पलजितो भान्ति तव देहे लसत्प्रभाः ॥५॥ ८९

[त]त्रैव स(म)ध्ये त्रिभिरन्तरालपूरकवल्ल्याकारबन्धः । एवं सम्पूर्णः प्रथमभित्तिबन्धः ॥

भावारिवर्गस्य विजृम्भितं तत् खलायितं विश्वपते! कलेर्वा ।
देवान्तरोपास्तिमदात् परे य-च्छिवार्थिनस्त्वामपि नाऽऽद्रियन्ते ॥६॥ ९०
भदन्तमीशं जगतां हितैककर्तारमानन्त्यधरं गुणानाम् ।
भवन्तमार्याः स्तवयन्ति पार्श्व! भवभ्रमक्लेशविनाशहेतोः ॥७॥ ९१

गर्भागारे देवाद् वामतो भित्तौ तन्निष्पादकपङ्क्तिद्वयेन शाखाद्वयबन्धः ॥ भित्तिद्वयेऽपि मध्यमध्यशाखाद्वयेनोभयतो द्वारशाखाद्वयबन्धोऽपि च ॥

वाणी तव विभो! भेदं नयत्येव भवापदम् ।
दरदावनवाम्भोद-त्रिलोकाऽवनकोविद! ॥८॥ ९२
महोदयरमाभोगो न दूरे तस्य भाविनः ।
यस्ते देव! पदाम्भोजं ध्यायतीभाऽघभूरुहे ॥९॥ ९३

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्येन्द्रियरसत्यागो दुर्लभोऽतत्त्ववेदिन: ।
शृणोत्यवनतज्ञाऽज! त्वदीयां भारतीं न य: ॥१०॥ ९४
त्रिभिस्तत्रैव मध्येऽन्तरालपूरकवल्ल्याकारबन्ध: ॥ एवं द्वितीयभित्ति: ॥
जगत्पतिर्य: सदय: फणीन्द्र-मजीगमत् श्रीपरमेष्टिमन्त्रात् ।
दैवीं श्रियं सोऽस्तु शिवाय पार्श्व: स्फुरत्प्रभाव: फलिनीलताभ: ॥११॥ ९५
य: सर्वदेवेषु सुतत्त्वरूपो नित्योदितज्ञानविलासशाली ।
स्तुतो भवत्येव शिवाय सोऽर्हन् कुर्याद् भवापायभरापनोदम् ॥१२॥ ९६
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां प्रासादे गर्भागारस्य तलबन्ध: ॥
समग्रविघ्नव्रजघातदक्ष: क्षमो जगत्त्राणविधौ धुतार! ।
अनङ्गनज्ञानधर! स्मरश्रीरसारतो रक्ष नतानरं न: ॥१३॥ उंबरबन्ध: ॥ ९७
दमो दया सत्यमलोभता च तप: परं ब्रह्म कषायमोक्ष: ।
इत्यादयो यत्र गुणा विविक्ता वर्ण्या नितान्तं जगतां हिताय ॥१४॥ ९८
भवेत् पुमर्थेषु तथोत्तमस्य धर्मस्य यस्मात् प्रकटो ह्युपाय: ।
त्वदागमोऽयं बहुभि: सुपुण्यैर्जिनाऽऽप्यते सर्वहितोपदेष्टा ॥१५॥ ९९
तथैव महामण्डपस्य तलबन्ध: ॥
वशीबभूवाऽद्भुतयत्त(वृत्त?)धारी यमव्रजे य: परमार्थदर्शी ।
महामना: संश्रितयोगिकोटि: कैवल्यतेज:प्रचयस्य हेतो:(तु:?) ॥१६॥२००
भावद्विषत्सामजभेदसिंह: फणीन्द्रसंसेवितपादपद्म: ।
स चिन्तनातीतसुखप्रदाता पार्श्व: श्रियं रातु रतोऽघदाहे ॥१७॥ युग्मम् ॥ २०१
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां गर्भागारे उपरी(रि) भारपट्टाकारपद्मशिलाबन्ध: ॥ उत्तरङ्गाकारबन्धोऽपि च ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्यश्रीदेवसुन्दरसूरि-गुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहि० श्रीपर्युषणा-महापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश-तन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि० चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदे तदीयश्रीपार्श्वस्तुतिरूपे द्वितीयस्तोत्रे गर्भागारभित्तिद्वयसमण्डपप्रासादतलबन्धगर्भागारद्वारशाखोम्बरपद्मशिलोत्तरङ्गबन्ध-नामकौ तृतीयचतुर्थौ युगपत्तरङ्गौ ॥ चैत्यषट्कबन्धचित्रमहाहृदे च मूलतश्च [२४-२५] ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवन्त्यवश्यं तव नामशून्याः सर्वेऽपि मन्त्रा विफला नराणाम् ।
संस्थाप्यमाना अपि बिन्दवः किमादिस्थिताङ्कैर्विकलाः फलाय ॥१८॥ २०२
गर्भागारादारभ्य मण्डपे प्रथमः ॥

स्मरन्ति रम्यं तव नाममन्त्रं ये सुप्रभाते दृढभक्तिभाजः ।
सर्वेहितार्थान् खलु ते लभन्ते रयादिदं मेऽप्यनुभूतिभूमिः ॥१९॥ ३
मण्डपे द्वितीयः स्तम्भः ॥

स्फुरत्तरस्फारफणालिशाखा बिभ्रन्मणीपल्लवपेशलाग्राः ।
त्वं नाथ! युक्तं कलिकल्पवृक्षः सतां करोषीहितसारसातम् ॥२०॥ ४
तृतीयः स्तम्भः ॥

सुरा हराद्या अपि पादपद्मं ध्यायन्ति ते नाथ! शिवाप्तिकामाः ।
संसारदुःखौघविमोचनाय यदस्त्युपायः पर एष एव ॥२१॥ चतुर्थः स्तम्भः॥ ५
विना जिनाधीश! तवाऽऽगमेन न प्राणिनः कर्ममलो व्यु(व्य)पैति ।
शुद्धिः कुतो वा कतकस्य चूर्णं विना रजोभिर्मलिने वने [स्यात्?] ॥२२॥ ६
मण्डपे पञ्चमः स्तम्भः ॥

एवं मण्डपद्वयस्य स्तम्भपञ्चकबन्धः ॥

तोषं देहि गतद्वन्द्व! हे श्रीपार्श्वविभो! मम ।
अमेयमहिमागार! भक्त्या नम्रनरामर! ॥२३॥ ७
मण्डपद्वये गर्भागारद्वा(रादा)रभ्य पङ्क्तिद्वयररूपभारपट्टखण्डत्रयबन्धः ॥
तव सेवाफलाभिज्ञाः न रमन्ते सुरान्तरे ।
चिन्तारत्नगुणज्ञा हि काचेऽनादरधारकाः ॥२४॥ ८
मेधाविप्रवरा ये त्वां श्रयन्ति शरणं विभो! ।
रागाद्याः शत्रवो नैषां भवन्ति दरकारकाः ॥२५॥ ९
स(म)हामण्डपेऽधस्तनमध्यपङ्क्तौ साधोमुखकमले ॥
गरीयो महिमागारं त्वं नवः कल्पपादपः ।
यः स्मृतोऽपि सदाऽभीष्टततीर्वितनुषेऽङ्गिनः ॥२६॥ १०
महामूढा रता देवान्तरे जानन्ति किं --- ।
असन्मुक्तिः परो मुक्तिं दत्ते स्तुतपदोऽपि न ॥२७॥ ११
महामण्डपे उपरितने बहिःपङ्क्तौ सकलशे ॥ एवं चतुर्भ्यां साधोमुख-
कमल[कल]शमहामण्डपबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महानन्दपदप्राप्ति-र्दुर्लभा तस्य नाऽङ्गिनः ।
गाढभक्त्या प्रभुं स्तौति यस्त्वां सन्त्यज्य रागिणः ॥२८॥ लघुमण्डपबन्धः ॥ १२
भग्नारिश्रीः शुभश्रेणीदातः! पापभरापहृत् ।
श्रीपार्श्व! क्षोभमुक्तस्त्वं सना मे भज नाथताम् ॥२९॥ १३

शिखरमूले तन्मध्ये च पार्श्वनाथेति नामगर्भं कमलम् ॥

शिवार्थिनो नंनमति प्रकामं मनस्विनः संशमिताऽघराशेः ।
न के भवन्तं तरसा ददानं न तेषु मोक्षं क्षमयाऽभिरामम् ॥३०॥ १४

शिखरे मूलशकुनाशेतिशास्त्रप्रसिद्धगर्भागारिकाबन्धः ॥

जगन्मित्र! नवः कोऽपि त्वत्प्रभावप्रभाचयः ।
स्तुतोऽपि हरते विघ्नध्वान्तजालं सुजात! यः ॥३१॥ १५

अर्द्धाभ्यां शिखरमूले देवाद्वामतो दक्षिणतश्च प्रथमे बहिःखण्डदेवकुलिके ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्यश्रीदेवसुन्दरसूरि-गुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णः श्रीपर्युषणा-महापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदे तत्श्रीपार्श्वस्तवरूपे द्वितीयस्तोत्रे स्तम्भपञ्चक-तदुपरितनभारपट्टमहामण्डपसाधोमुखकमलमध्यपङ्क्तिसकलशबहिः पङ्क्तिलघुमण्डपशिखरमूल-तन्मध्यकमलगर्भागारिका-उभयपार्श्वस्थबहिःप्रथम-खण्डदेवकुलिकाद्वयबन्धनामकौ युगपत् पञ्चमषष्ठौ तरङ्गौ ॥ चैत्यषट्कबन्धः महाहृदे च मूलतश्च [२६-२७] ॥

त्वदीयगुणसन्दोहे रमते यस्य भारती ।
भारती दुर्लभे(भा) नैव तस्य सच्छर्मसङ्गिनः ॥३२॥ १६

शिखरे देवाद्दक्षिणतो द्वितीया बहिःशीर्षा खण्डदेवकुलिका ॥

अतुल्यगुणसन्दोह! हताज्ञानतमोभर! ।
रत! संसारविध्वंसे सेवे तव नतः पदौ ॥३३॥ १७

तादृश्येव देवाद् वामतो द्वितीया खण्डदेवकुलिका ॥

जगज्जिनेन्दो! शरणं समाश्रितं तवैव संसाररिपोर्बिभेति न ।
न दन्तिनो हन्ति भयं हि वेतसं समाश्रितः कोऽपि समुल्लसत्क्रुधः ॥३४॥ १८

शिखरे देवाद्दक्षिण[त]स्तादृश्येव तृतीया देवकुलिका ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तसद्दर्शनचारुलोचनं नतो भवन्तं भवभीतिमोचनम् ।
न(त्वां?) नौति नूनं परमर्च्यतां भजन् जगत्त्रयस्याऽपि महत्तमः श्रिया ॥३५॥ १९

शिखरे देवाद् वामतस्तादृश्येव तृतीया देवकुलिका ॥

त्वन्नाममन्त्रो हरते प्रजानां नानामहाविघ्नचयं स्मृतोऽपि ।
वशीकरोता(ती)हितमङ्गलानि निरञ्जनध्येयबुधस्तुतोऽर्हन् ॥३६॥ २०

शिखरे शकुनासोपरि अर्धाभ्यां पङ्क्तिद्वयेन सर्वमध्या देवकुलिका ॥

अनन्तमाहात्म्यमयस्वरूपं पराभिभूतान्तरवैरिचक्रम् ।
क्रमाब्जसेवापरनागराजं जगत्पतिं पार्श्वजिनं महेश! ॥३७॥ २१

अकालकालाब्दपयःप्रवाहहतोऽपि ते ध्यानशिखी दिदीपे ।
पेठुर्बुधास्तेन भवद्यशांसि सितांशुशुभ्राणि सुधाम[धाम!] ॥३८॥ २२

शिखरमध्ये द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां मध्यमा महादेवकुलिका ॥

नीलोत्पलविनीलाङ्ग! गतकर्ममहाभय! ।
यशसामेकपात्रं त्वं त्वरितं वाञ्छितं कुरु ॥३९॥ २३

शिखरे तद्गर्भमध्यमहादेवकुलिका ॥

हतमोहमहायोध! धरणाऽभ्यर्चितक्रम! ।
ममाऽऽनन्दपदं देहि हितसर्वस्वसङ्गतम् ॥४०॥ २४

तत्रैव कुलिकातो वामतः खण्डदेवकुलिका ॥

नमत्फणिफणस्फाररत्नोद्भासिक्रमाम्बुज! ।
जय पार्श्व! जगत्तात! तनुभाजितनीरज! ॥४१॥ २५

शिखरे सर्वोपरितनभागे मध्यपङ्क्तौ ॥

सितमपि वचनं ते नाथ! संसारतापं परिभवति परेषां नैव बह्वप्यराग! ।
गरममृतलवोऽपि प्रापयत्याशु नाशं शतमपि न घटा यद्वारिणः प्राणभाजः ॥४२॥
तव चरणसपर्या देव! सर्वाघवृन्दं दव(ल)यति भवभाजां सर्वतः साध्वसं च ।
चतुरनुतगुणौघ! श्रेयसां चाऽपि पुञ्जं जनयति परितोऽवि स्तोतृदेवाधिराज! ॥४३॥२७

द्वाभ्यां शकुनासादारब्धमूलामलसारकप्रविष्टप्रान्तमध्यगतबहिर्गताद्धार्द्धपङ्क्ति-स्थिताभ्यां सामलसारकः सम्पूर्णः शिखरबन्धः ॥

धरणोरगनाथस्ते भक्तानां भगवन्! वरम् ।
रभसा सादरं दत्ते विहितेष्टहितः सना ॥४४॥ कलशः ॥ २८

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यस्यानर्था(घा?)ज्ञा विमदीकरोति वेतालभूपालफणीभसिंहान् ।
अकालकालज्वलदालयादिभियश्च जेघ्नेति कृतिस्तुतिज्ञा ॥४५॥ २९
अघवल्ल्यां स वह्न्याभो वरज्ञानधनो जिनः ।
भवतानवकारी नः कुर्याद् भयजयं --- ॥४६॥ ध्वजः ॥ ३०
एवं मया स्तुत! जगत्पतिपार्श्वजीरापल्लीवतंस! वितराऽऽशु मम प्रसद्य ।
आरोग्यबोधिविभवौ वरभक्तपद्मावत्यौरगेश्वरशिरोमुकुटायितांह्रे! ॥४७॥ ३१
**श्रीजीराउलिपार्श्वनाथ**मिति यः सर्वेन्द्रपद्मावती-
वैरोट्या **मुनिसुन्दर**स्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥४८॥ ३२

श्रीजीरिकापल्लिमण्डनश्रीपार्श्वनाथस्तवनं तच्चैत्यबन्धेन श्रीमुनिसुन्दर-सूरिकृतम् ॥

इति युगप्रधानावतार तपाबृहद्गच्छपरमपूज्यश्रीदेवसुन्दरसूरिगुरुगुणमहिमा-ऽर्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णश्रीगुरुप्रभावपद्महृद-प्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरा-वतीदेशतन्नरेश्वरश्रीपत्तननगरादिश्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेव-स्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्वजिनचैत्यचित्रान्तर्हृदे तत्श्रीपार्श्वस्तवरूपे द्वितीयस्तोत्रे सालेखे शिखरकलशध्वजबन्धनामानौ युगपत् सप्तमाऽष्टमौ तरङ्गौ ॥ चैत्यषट्कबन्धचित्रमहाहृदे च मूलतश्च [२८-२९] ॥ सम्पूर्णश्चाऽयं तदीयस्तोत्रद्वयेन श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदः ॥

अथ श्रीमहावीरजिनचैत्यचित्रान्तर्हृदस्तदीयस्तुतिरूपः प्रस्तूयते —

जयश्रियं प्राप्य महाभटानां रागादिकानां जितविष्टपानाम् ।
बभूव यः सार्थकनामधेयः प्रभुं महावीरमिमं स्तवीमि ॥१॥ ३३
श्रीवीरप्रासादे तलबन्धः ॥

न शक्यते या सदृशाद्दतैस्ते स्तुतिः सुरेन्द्रैरपि कर्तुमीश! ।
तां संविधित्सन्नहमल्पबुद्धिः स्फुटं ब्रवीमि प्रभुशक्तिमौग्ध्यम् ॥२॥ ३४
गर्भागाराच्छादकपद्मशिलाकारभारपट्टबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रमानिधे! वीर! भवाब्धिपारं ददासि सुध्येयपदारविन्द! ।
त्वमेव संसाधितसिद्धियोगा(ग)! रसाऽर्दितः पारगताऽविकार! ॥३॥ ३५
रतीशदुर्वारविकारभारं(र)संहारहेतुर्वचनं त्वदीयम् ।
तत्त्वावबोधं भविनां तनोति रङ्गद्गुणाधार! विनिर्जिताऽर! ॥४॥ ३६

द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां पीठे प्रथमं सोपानम् ॥

रवाऽपास्तस्फुरद्वार्द! तनुभाजितकाञ्चन! ।
लीलाचलितदेवाद्रे! जय रम्य! सुखाकर! ॥५॥ ३७
रमते यस्य धीरस्य त्वद्गुणस्तवने मतिः ।
पदं स लभते नूनं श्रीवीर! भुवनोत्तरम् ॥६॥ ३८

तथैव द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां द्वितीयं सोपानम् ॥

रयाद् भवभियां पारं रतस्त्वत्पूजने नरः ।
रङ्कोऽपि सुरपूज्योऽरं रङ्गवांल्लभतेऽक्षरम् ॥७॥ ३९

तत्रैवाऽनेन पङ्क्तिस्थितार्द्धद्वयेन तृतीयसोपानम् ॥

स्तुतिं यतिततिस्तुत्य! भगवन्! विदधत्तव ।
लभते भविदोऽभीष्टमकाम! शमधाम! शम् ॥८॥ ४०

गर्भागारे देवाद्दक्षिणतः प्रथमस्तम्भः ॥

वरहारहरक्षीरगौराः कीर्त्तिभरास्तव ।
धवलीकुर्वते विश्वं ज्ञस्तोमस्य महामताः ॥९॥ द्वितीयस्तम्भः ॥ ४१
ये नटा नव्यनव्यस्वावतारैर्मोहका नृणाम् ।
श्रितास्तेऽपि त्वदज्ञैर्ही देवाऽरतिरसे रतैः ॥१०॥ तृतीयस्तम्भः ॥ ४२
रविं भुवि भविस्फूर्ज-न्मोहध्वान्तक्षये विभो! ।
त्वामाश्रित्य जयत्येव न को भव्यो भवं भटम् ॥११॥ चतुर्थस्तम्भः ॥ ४३
स महा(समहा?)मम मङ्गल्यलक्ष्मीलीलागृहं भवेत् ।
यस्ते नाथ! पदद्वन्द्वं स्तौति भग्नभयं भवी ॥१२॥ पञ्चमस्तम्भः ॥ ४४
स्मरवीरतिरस्कारक्षम! नाथैकशोऽप्यहो! ।
नयतस्तेन तं स्वस्य सच्चक्रं शक्रतां क्रमौ ॥१३॥ षष्टः स्तम्भः ॥ ४५

एवं स्तम्भषट्कबन्धः ॥ एवं त्रयोदशभिः सम्पूर्णः सपीठससोपान-गर्भा[गा]रबन्धः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति युगप्रधानावतार० नुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदय० त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावती० स्रोतसि चैत्यट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीवीरस्तवरूपतच्चैत्यचित्रान्तर्हृदे सपीठगर्भागारबन्धनामानौ युगपत् प्रथमद्वितीयौ तरङ्गौ ॥ चैत्यषट्कबन्धचित्रमहाहृदे मूलतश्च [३०-३१] ॥

शमिनां ते श्रयेद्वाणी मुक्तिसौधाधिरोहणे ।
तात! निश्रेणिदण्ड! त्वं सुपदन्यासकारणे ॥१४॥ देवाद्दक्षिणतो मण्डपः ॥४६
वीरनाथ! गुणान् स्तौति या ते वाग्(क्) सैव मे मता ।
मौलयश्चापि धन्यास्ते ये त्वदंह्रियुगे नता ॥१५॥ देवाद्वामतो मण्डपः ॥ ४७
जयति श्रीभुजः कुर्वन् स्वानमज्जा जनान्(स्वमानमज्जनान्?) विभुः ।
सुमहा तेजसां धाम श्रीवीरो जन्तुतारकः ॥१६॥ ४८

शिखरमूले श्रीमहावीरनाथनामगर्भं पञ्चम(द?)लं[कमलम्] ॥

श्रीवर्धमानं नतनाकिराजं जन्मादिहीनं नमतैत्यवन्द्यम् (?) ।
भव्याङ्गिनोऽशंशमि येन मोहहरेण तापः परितो भवस्य ॥१७॥ ४९

शिखरे शकुनासेतिप्रसिद्धगर्भागारिकाबन्धः ॥

अनन्तदर्शनज्ञानपद्मानन! मनस्विनः ।
त्वामेव भुवने देवं प्राहुर्भवदवस्रवम् ॥१८॥ ५०

अर्द्धाभ्यां शिखरमूले उभयतः प्रथमे बहिः खण्डदेवकुलिके ॥

न रोषलेशं दधसे कदापि महामनास्त्वं शमधाम [वीर!(?)] ।
तथाप्यवज्ञादिकृतो विधत्से विभो! महादण्डमकाम! कामम् ॥१९॥ ५१

शिखरमूलेऽर्द्धाभ्यां उभयतो मध्यमे खण्डदेवकुलिके ॥

चकार यः कर्मवनानि भस्मसात् स्वयोगतेजःप्रचयैर्महामनाः ।
कैवल्यलक्ष्मीकलितश्च निर्वृतिं भेजे स जीयाच्चरमोऽरिहाऽघहृत् ॥२०॥५२

शिखरे शकुनासोपरि सर्वगर्भमध्यदेवकुलिका ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्यश्रीदेवसुन्दर-सूरिगुरुगुणमहिमार्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमव० त्रिदशत-रङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तननगरादिवर्णनस्रोतसि चैत्यषट्कबन्धचित्रे महाहृदे स्वस्वदेवस्तुतिरूपे श्रीवीरजिनस्तवरूपतच्चैत्रा(त्या)-न्तर्हृदे मण्डल(प)द्वयकमलगर्भागारिकाप्रथमस्थ(स्त)र-खण्डदेवकुलिकाचतुष्क-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वमध्यदेवकुलिकाबन्धनामा तृतीयस्तरङ्गः । चैत्यषट्कबन्धचित्रमहाह्रदे अन्तर्ह्रदे मूलतश्च तरङ्गः [३२] ॥

अतीतलोकत्रितयोपमान! भदन्त! नाथाऽमृतसातदातः! ।
त्वदंह्रिलीनं मम चित्तमस्तु संसारदुःखोत्करपारगाऽरम् ॥२१॥ ५३
अर्द्धाभ्यां शिखरे द्वितीयस्थ(स्त)रे उभयतो बहिः खण्डदेवकुलिके ॥
यै रोषतोषप्रमुखैश्चरि[त्रै]-र्जडा हरादीन् मुदितान् स्तुवन्ति ।
त्वदागमाज्जा(ज्ज्ञा)तसमग्रतत्त्वास्तैरेव तान् नाथ! परित्यजन्ति ॥२२॥ ५४
शिखरोपरितनभागे सामलसारकेऽर्द्धाभ्यां बहिःपङ्क्ती ॥
निरञ्जनं विश्वहितैकहेतुं त्वामीश्वरं ये शरणं श्रयन्ति ।
नूनं परानन्दपदप्रतिष्ठां ते सर्ववेदिन्नचिराद् भजन्ति ॥२३॥ ५५
अर्द्धाभ्यां तत्रैव मध्यपङ्क्ती ॥ एवं द्वाभ्यां शिखरशीर्षबन्धः ॥
भविनां विश्ववन्द्यस्त्वं ददसे दम्भवर्जितः ।
तरसा सारतत्त्वानि लम्भयन्नभवः शिवम् ॥२४॥ कलशः ॥ ५६
मुनीन्द्र! भक्तत्रिदशेन्द्रवृन्दश्रेयोलताकन्दनवाम्बुवाह! ।
गताखिलाज्ञान! मनस्विरम्य! नमोनमोऽनर्दनतान! ते नः ॥२५॥ ५७
विश्वबान्धव! तव स्त[व]मे[तत्] वीरनाथ! विरचय्य सुभक्त्या ।
मार्गयामि भगवन्! शिवहेतुं बोधिमेव शिवसन्ततिदातः! ॥२६॥ ५८
द्वाभ्यां ध्वजबन्धः ॥

एवं यो मतिमान् स्तुते जिनवरं श्रीवर्द्धमानाभिधं
शक्रालीमुनिसुन्दरस्तुतिपदं तच्चैत्यचित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२७॥ ५९
इति श्रीवीरजिनस्तवनं तच्चैत्यबन्धेन भट्टारकश्रीमुनिसुन्दरसूरिकृतम् ॥
इति स्तवोपसंहारकाव्यम् ॥

इति स्वचैत्याऽभिधचित्रबन्धैः स्तोत्रैः स्तुताः पञ्चजिना मयाऽपि ।
दत्त्वा द्रुतं पञ्चमचिद्विलासं गतिं ददन्तां मम पञ्चमीं ताम् ॥१०॥
इति पञ्चजिनसर्वस्तोत्ररूपमहाह्रदोपसंहारकाव्यम् ॥ इति पञ्चजिनप्रासादबन्ध-स्तोत्राणि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यादिचित्रैर्बुधचित्रहेतुभि-श्चित्रात्मकैः स्तोत्रगणैः समन्ततः ।
प्रतिप्रभातं जिनराजसद्मसु स्तुवन्ति यस्मिन् कवयो जिनाकृतीः ॥१॥ ६१
एवं सदा विज्ञविधीयमानस्तोत्रारवैरुन्नतचैत्यपङ्क्तौ ।
यस्मिन् प्रगे भव्यजनश्रवस्सु भवन्ति पीयूषरसाभिषेकाः ॥२॥ ६२

इति चैत्यषट्कचित्रबद्धपञ्चजिनबहुस्तोत्ररूपमहाहृदस्य नगरवर्णनसम्बन्ध-करणकाव्यद्वयम् ॥ इति युगप्रधानावतार-तपाबृहद्गच्छाधिराजपरमपूज्यश्रीदेवसुन्दर-सूरिगुरुगुणमहिमार्णवानुगामिन्यां तद्विनेय-श्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णश्रीगुरु-प्रभावपद्महृदप्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीवीरचैत्यचित्रान्तर्हृदे श्रीवीरजिनस्तवरूपे शिखरकलश-ध्वजबन्धस्तुत्याद्युपसंहारनामा चतुर्थस्तरङ्गः ॥ चैत्यषट्कबन्धमहाहृदे च अन्तर्हृदे मूलतश्च [३३] ॥ सम्पूर्णश्चाऽयं श्रीवीरजिनस्तुतिरूपस्तच्चैत्यचित्रान्तर्हृदः ॥ तत्सम्पूर्तौ च सम्पूर्णोऽयं चैत्यषट्कबन्धचित्रनामा महाहृदः स्वस्वजिनस्तोत्ररूपः ॥

—x—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ( २ )

# पत्तननगरे श्रीहीरविजयसूरिं प्रति महेवानगरतः विजयहर्षमुनिना लिखितो विज्ञप्तिलेखः

**– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय**

जगद्गुरु श्रीहीरविजयसूरि महाराज ए जैन इतिहासना प्रसिद्ध अने पवित्र धर्मपुरुष छे. शाह अकबर तेमना धर्मचरणथी अतिप्रभावित हतो, अने तेने कारणे तेणें पोताना राज्यमां अहिंसापालननी घोषणाओ वगेरे अनेक सत्कार्यो करेलां ते बधुं पण ऐतिहासिक तथ्य छे. सं. १६३०मां तेमनुं चातुर्मास 'पत्तन'[१] (पाटण) शहेरमां हशे त्यारे, तेमनी शिष्यपरम्परामां वर्तता मुनि विजयहर्षे 'महेवा' (महोवा-महोबकपुर)थी आ पत्र लखेल छे.

पत्र सम्पूर्णतः पद्यात्मक छे. २२२ पद्योमां व्याप्त आ पत्रमां लेखके प्रयोजेल छन्दोवैविध्य-विचित्र छन्दोना प्रयोग सुज्ञ भावकने अचंबो पमाडी जाय तेम छे. विविध चित्रबन्धो, द्व्यक्षर काव्य, त्रिपदी-द्विपदी-एकपद प्रकारनुं काव्यगुम्फन तेमनी विद्वत्ताना प्रकर्षनो संकेत आपी जाय छे.

प्रथमना ४६ श्लोको मङ्गलाचरणरूप जिनवन्दनाना छे. ऋषभदेव-विमलनाथ-कुन्थुनाथ आदि विविध जिनोनी, १ थी २४ जिनोनी, छेल्ले वर्धमानजिननी कर्ताए स्तुति करी छे. ४७ थी ६१मां नगरवर्णन छे. ५६मा पद्यमां 'हेमराज' नाम आवे छे, ते त्यांनो शासक हशे के मन्त्री? स्पष्ट थतुं नथी. ६२-१८२ सूरिवर्णन छे. १८३मां महेवानो उल्लेख मळे छे. त्यां हरपाल राजा, तेनी धन्यवती नामे राणी, तेमनो मेघराज नामनो पुत्र - आ ३नो उल्लेख १८४-८५मां थयो छे. १९१मां पत्रलेखकनो नामनिर्देश छे.

पत्रलेखक महानिशीथसूत्र नामे आगमना योगोद्वहन कर्या पछी कल्पाध्ययनना जोग वही रह्या होवानो उल्लेख धार्मिक दृष्टिए महत्त्वनो गणाय तेवो छे (१९३).

१. ४८मा श्लोकमांना 'पत्तन' शब्दने आधारे आ कल्पना करी छे. तेने बदले बीजुं कोई गाम होय तो नकारी न शकाय. इतिहास जोवो पडे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ते सिवाय क्षमापना, पर्युषणनां कृत्यो, अध्ययन आदिनो कशो ज निर्देश आमां नथी मळतो.

२०० थी वाचक कल्याणविजयादि साधुवर्योनां नामो २१५ सुधी वांचवा मळे छे, जेओ गच्छपतिनी साथे हशे. २१५मां साध्वीओनो नामोल्लेख पण थयो छे. २१६ थी २१८मां महेवास्थित मुनिगणनां नामो छे. पत्रना प्रान्ते पुष्पिका वांचतां सं. १६३०मां पत्र तथा आ प्रति पण लखायेल होवानुं जाणी शकाय छे. १८ मोटी साईजना जे पत्रोमां पथरायेलो पत्र मूलतः एक ओळिया (Scroll) रूपे हशे.

पत्रमां अशुद्धिओ तथा छन्दोभङ्गनुं प्रमाण प्रचुर मात्रामां जोवा मळे छे.

*

॥ ८० ॥

स्वस्तिश्रीजिनपाणिपद्मयुगलं भेजे प्रवालप्रभं,
मन्येऽहं कृपणैः खलैश्च निबिडं सन्तापिताङ्ग्योत्तमा(?) ।
नित्याऽहर्मणिना दिने निजलसत्पादैः सहस्रैः पुनः,
ज्ञात्वा सज्जनतां जिनेन्द्ररुचिरं श्री**नाभिभूपाङ्गजे** ॥१॥

वीणां वादयते जिनेन्द्रपुरतो ब्राह्मीः(ह्मी) प्रतापाकुलाः(ला),
गीतं गायति नित्यमर्चिरुचिरा विज्ञानसम्पूरिताः ।
किं चित्रं पठति प्रभो! मुनिपते! शास्त्रं निजेच्छां पुनः,
प्राप्तुं केवल[बोध]मर्घ्यममलं मार्त्तण्डकान्तिप्रभम् ॥२॥

कान्तारङ्गाकुलो यो मनुजसुरगणे वीतरागेषु मुख्यः,
प्रख्यातो विश्वपूज्यः परमसुखमयो मानहीनो मुनीशः ।
भास्वन्मार्तण्डकान्तिर्नयनसुखकरो विश्वचित्रं बभूवा-
ऽसौ पातु ब्रह्मयुक्तः कुमतिहरिगणे नागशत्रुर्जिनेन्द्रः ॥३॥

चापल्यं निजबान्धवस्य सवितुः क्षारं कलङ्कं पुनः,
शीघ्रं नाशयितुं प्रभो! तव रमा भक्त्या श्रिता भानुभाः ।
नित्यं कोकनदप्रभं पदयुगं दम्भोलिभाराकुलं,
स्पर्द्धां त्यक्तुमलं विरोधमनिशं विद्वज्जनन्या सह ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

माया-मान-यम-प्रमाद-मदन-क्रोधालिलोभारयः,
सर्वे ते तव भूघनाद् गुणयुतात् सुध्यानलीलाद् गताः ।
सर्पिण्यां(ण्या) हृदये च रावणमहीनाथे निगोदेष्वपि,
सारांशे खलु कुम्भकर्ण-वसुधानाथे हरे चोरगे ॥५॥

मन्ये मनुष्या(?) यशसि प्रभो! ते, नित्यं शशाङ्कं शितशर्कराभम् ।
मृगेन्द्रसूनोर्गज[चक्र]वालं, यथा समुद्रान्नलिनाकरं सत् ॥६॥

पञ्चाननस्य मृगनागगणस्य चैव, प्रद्योतनस्य हरितारकमण्डलानाम् ।
साम्यं न यातमभिभूघन[रत्न?]कान्तेः मर्त्यामरप्रणतमौलि[मणि]प्रभाणाम् ॥७॥

यूयं भजध्व(?) कमलासुतनाशकं द्राग्, हर्यक्षशौर्यकलितं कुमतिद्विपेन्द्रे ।
जन्तुव्रजस्य निजनन्दनपालकं सत्, सूर्यप्रभं दलितदुर्गतिदुःखमूलम् ॥८॥

युद्धे नदीश-वन-दुर्गभये त्वरण्ये, ये यान्ति भाग्यरहिताः सुखमाप्नुवन्ति ।
दीनत्व-दौस्थ(स्थ्य)-घनजर्जरदेहयुक्तास्त्वन्नामतो हरिभयाद्धरिचक्रवालम् ॥९॥

इति श्रीऋषभदेववर्णनाष्टकम् ॥

अपारिजातो भुवि पारिजातः, महोदयं देहि महोदयोदय! ।
शशाङ्करूपो जिननायकोऽ**जितः**, महोदयं देहिमहोदयोदयः ॥१०॥

**श्रीसम्भवं** भयहरं जनरत्नहारं, नीहारमुक्तममलं सुमतं हि वन्दे ।
देवं हिताय यमहं गतकाममोहे, भक्त्या सदैव भवसागरपोतवाहम् ॥११॥

ईडेऽ**भिनन्दन**जिनं नरदेवरूपं, सूरं प्रभावविशदं कमला धरन्तम् ।
सारङ्गनेत्रविमलं भवनं रमायाः, सूरं प्रभावविशदं कमलाधरं तम् ॥१२॥

पुष्करपुष्करपुष्करचित्त! **सन्मति**सन्मतिसन्मतिसार!
दुष्करदुष्करदुष्करचाव! दुर्गतिदुर्गतिदुर्गतिमुक्त! ॥१३॥

**पद्मप्रभो** रक्षतु नो हरिप्रिया, यं प्राप्य तुष्टा इव तातपादम् ।
सत्केवलज्ञानविराजमानं, मयूरचक्रं(क्रे) जलदं मनोज्ञम् ॥१४॥

कुर्वन्ति नृत्यं रवि-सोम-तारकाः(का), यं प्राप्य नाथं गगने भ्रमच्छलात् ।
त्वत्सौम्यतामेत्य यथाहमङ्ग, नीलोत्पलं कैरवबान्धवं च ॥१५॥

**चन्द्रप्रभ**श्चन्दनचन्द्रगन्ध(न्धो), निजस्य कान्त्या जितपुण्डरीकः ।
ददातु मोक्षं यशसश्च पिण्डो(ण्डः), कृतो विधात्रा दधितुल्यमांसः ॥१६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्रीपुष्पदन्तो** जितपुष्पदन्तौ(न्तो), सुपुष्पदन्तव्रज एव देयात् ।
महोदयं पुष्पगणांशुचक्रं, पुष्पौघगन्धो वरपुष्पकायः ॥१७॥
**श्रीशीतलः** शीतलवाक् विभाति, शीतद्युतेस्तुल्यमुखः शिरोमणिः(?) ।
शिवालयाश्शीलधरो भवौघ-तापे लसच्छीतलवायुतुल्यः ॥१८॥
**श्रीश्रेयांसः** श्रेयसा राजमानः श्रेयःकामी कीर्त्तिगङ्गाहिमाद्रिः ।
श्रेयःपिण्डो(ण्डः) श्रेयसो दायकोऽसौ, जीयाद् यावद् भानु-चन्द्रौ ह्यनन्ते ॥१९॥
**श्रीवासुपूज्यो** जनदेवपूज्यः, पूज्येषु पूज्योऽमरपूज्यबुद्धिः ।
बालार्कदेहो गतबालबुद्धिः बालेन्दुभालो बलदेववक्त्रः ॥२०॥
जयतु **विमलनाथो** निर्मलं लोकचक्रं घनघनमलवारं कुर्वनङ्गं सुवर्णः ।
हरिहरिहरिसेव्यः सौ(शौ)र्यपञ्चाननाभो, गज-वृषभ-सुहंसप्राग्रगत्याऽभिरामः ॥२१॥
मोक्षार्थं मानवानां भवतु वरगुणक्षीरपूर्णाम्बुवाहः;
स्वीकाय(?) स्वर्णशैलो नयनसुखकरः श्लोकसद्वक्त्रसोमः ।
भास्वद्भालिप्रतापग्रहपतियुगलो गौरमासारगानः(नो)
विज्ञानज्ञानभाग्यौषधिततिविततो लब्धिसन्नन्दनार्घ्यः ॥२२॥
मार्त्तण्ड-सोम-तपनीय-रसोद्भवालि-रत्नाऽग्नि-चारु-चपलाद्युतिसाररूपम् ।
किं वर्णितेन बहुना क्षितिमोहनीयं, विभ्राजते सकलदैवतचक्रवज्रिणः ॥२३॥
क्व पद्मबन्धुः क्व च तातपादो नित्यं त्रिलोकीविजयी न रोषवान् ।
स्तोकेन धाम्ना कुवरोषयुक्तः (?) मर्त्योत्तमस्त्वत्पदपद्मसेवकः ॥२४॥
कर्पूरगन्धस्तव शोभते ते, प्रीणाति लोकभ्रमरस्य मण्डलम् ।
दौस्थस्य चित्ते द्रविणं यथाऽर्घ्यं, मुनिव्रजानां तव दर्शनं द्राग् ॥२५॥
श्रीनन्दनो येन हतः स्वलीलया, चित्रं न जातं भुवने तथाऽपि ।
रम्भावनं सामजबालकेन, उन्मीलितं प्राणविना(?) यथा च ॥२६॥
अस्त्वस्तु साम्यं तव भूघनस्य, प्रद्योतनस्य प्रियपीतकान्तेः ।
परं प्रतापाद् घनकम्पितोऽसौ, नष्ट्वा गतः सन्नभसि ग्रहेशः ॥२७॥
समानासमानारिमानारिमाना, जिताजाजिताजातिमायातिमाया ।
सुभाषाः सुभालिः त्रिकामा विकामा विचित्रावमादा मनोज्ञा मनोज्ञा ॥२८॥
॥ इति श्रीविमलनाथवर्णनाष्टकम् ॥श्री॥
**अनन्त**विज्ञानधरस्त्वनन्त-दिनेश्वराभो गतपापपङ्कः ।
अनन्तसंसारहरो हराभः, अनन्तसर्पभ्रकुटिद्वयाच्च(?) ॥२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**श्रीधर्मनाथो** मकरध्वजाभ(:), पुनीहि लोहोत्तमदेहसार! ।
सुधर्मचक्रैर्भुवनत्रयं च, जयन् मनोज्ञांऽह्रियुगो मनोज्ञः ॥३०॥
**श्रीशान्तिनाथो** जनशान्तिमूर्तिः, सत्सार्वभौमो निजसद्ध्वजाभ्याम् ।
यः साधयामास हिमाचलान्तं चतुःसमुद्रं जयताज्जिनेन्द्रः ॥३१॥
यो भूपो भुवनत्रयस्य भगवांश्चन्द्रश्रिया भासुरः(रो)
मोहाजानकुचौ रहो जिनपतिर्गुप्त्या युतश्शक्तिमान् ।
शत्रौ मित्रसमः प्रमादरहितो राजायते सर्वदा,
औदार्यप्रभुता-विवेक-विनय-प्रज्ञा-प्रतिष्ठाकुलः ॥३२॥
मूर्त्तिर्यदीया कमलाकराभा, हस्तद्वयाम्भोजधराक्षयांशुः ।
शान्ता यशस्वी भवचक्रवालं लुनीहि शीघ्रं मम मोहनिद्राम् ॥३३॥
चित्रीयते मानवचक्रवालं, ज्ञात्वा स्वरूपं तव वज्रतुल्यम् ।
संसारसिन्धौ वरयानपात्रं, अनन्तकामो गतकामलेशः ॥३४॥
अपूर्वमेघो जिनवाक्यरूपः(पो), न प्लावयत्येव गुणैश्च वर्षति ।
तापेन मुक्तोऽखिललोकतुष्टिदः, शब्दायमानो न तु निष्फलोऽसौ ॥३५॥

॥ इति श्रीशान्तिनाथवर्णनपञ्चकम् ॥

यस्य प्रभावाद् रिपुचक्रवालं, **कुन्थु**प्रभं जातमहो! जिनस्य ।
सुरेन्द्र-कुन्थौ समलोचने वः (नो यः?) मां पातु मर्त्यामरसार्वभौमः ॥३६॥
**अराभिधानो** जिननायकोऽसौ, जितार(रि?)चक्रः कनकाभिरामः ।
अम्भोजनेत्रे गुणचन्द्रपेटकः, मार्त्तण्डकान्तिस्त्वरितं च रक्षतु ॥३७॥
**श्रीमल्लिनाथं** नलिनं नमामि, सदोदयं हंसविराजितं तम् ।
वराङ्गुलीव्यूहसुपत्रसुन्दरं, लक्ष्मीनिवासं जनदृष्टितृप्तिदम् ॥३८॥
**श्रीसुव्रतं** सुव्रतशोभिताङ्गं, स्तोष्ये घनाभं जनचित्तचक्रे ।
अरिष्टरत्नव्रजसाररश्मि-मरी(रि)ष्टमर्तिव्रजनाशकं तम् ॥३९॥
**नमिजिनो** नलिनाङ्कमनोहरो, भवसमुद्रजले वडवानलः ।
सुघृतसिञ्चितवह्निसमद्युति-र्जयतु वाञ्छितदानसुरद्रुमः ॥४०॥
**शङ्खो** येन तु पूरितो निजभुजायासव्रजैः सद्धनुः,
शब्दाद्वैतमहो कृतं च विशदं चक्रं घनं भ्रामितम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कृष्णस्याऽद्भुतविक्रमं मृगसमं लीलागणैः सत्वरं,
कामो येन हतः शिवाध्वनि वरे **नेमिप्रभो**र्नेमिभाः ॥४१॥
यत्पादवारिस्सु सुधायते हि, मुदा लसत्कृष्णचमूं त्वजीवयत् ।
यस्य प्रभावाद् भुजगो द्विजिह्वपतिर्बभूवाऽवतु **पार्श्वनाथः** ॥४२॥
अशोकवृक्षो जिनवाक्यरूपः शान्तारसैः सिञ्चितसारमूल[:] ।
संसारतापैर्घनपीडितानां, शान्तिप्रदो राजति पापपङ्कः ॥४३॥
श्रियैश्च(यै च) मूर्त्तिः बहुराजयाध्यां, सुखप्रदा सद्बहुराजयो स्तात् ।
आयुष्यमस्तु(?) जिनशासनाय, मानैर्युता यस्य लसत्प्रभावात् ॥४४॥
विद्याचतुर्दशमणिव्रजराजमानः(नो), वाक्यार्णवो जिनपते! तव चित्रसिन्धुः ।
अर्थाद्रिनीतिनिकरोर्मिरसैर्मनोज्ञ-मृज्ज्याहिमोहभयशोकगणा(न्) जिनेन्द्रः ॥४५॥
कम्पायमानस्तपनीयशैलो निजौजसा दुस्तपराशिकर्त्ता ।
परीसहे नागगणे मृगेन्द्रः, **श्रीवर्द्धमानो** जयताज्जिनेन्द्रः ॥४६॥
एवं प्रणम्य जिनमण्डलसूर्यतुल्यान्, विघ्नौघपद्महरिभान् गतमोहरोगान् ।
दुर्ध्यानपङ्करहितान् करितुल्यदेहान्, छत्रत्रयेण विशदान् गुणरत्नवारान् ॥४७॥
श्री**गुर्जरे** देशगणावतंसे, तत्राऽस्ति सारं नगरेषु शेखरम् ।
**श्रीतातपादैर्गणि-वाचका**भ्यां, पवित्रितं स्वर्गसमान**पत्तनम्** ॥४८॥
विभ्राजते यत्र विशालवप्रो, अनीतिसिन्धूज्ज्वलनैरभेद्यो(द्यः) ।
यया श्रिया निर्जित एव गोचयः(यो), निष्कासितोऽगाद् दिवि मर्त्त्यलोकात् ॥४९॥
चयाग्रचक्रं निजकान्तिराजिभिः वराङ्गुलीभिः सुरकुट्टिमं च ।
सन्तर्जयन् राजति विद्रुमाभं, विचित्रचित्रप्रविराजमानम् ॥५०॥
प्रासादचक्रं वरुणप्रभाधरं, दीव्यत्यहो जन्तुगणस्य सिद्धः ।
प्रासैश्च सोपानगणो विधात्रा, कृतः किलाहं भुवने मनोज्ञम् ॥५१॥
यत्रालयः सद्रविमित्ररूपः, पुण्यप्रभो दुन्दुभिचक्ररूपः ।
विमानतुल्यो मुनितातपादैः, पवित्रितो देवगणैनि(र्नि)षेवितः ॥५२॥
यो गोविन्दपराक्रमो निजभुजोत्पन्नश्रिया दायकः(को)
नीत्या रामसमो रिपुं निजलसत्कुन्ताग्रचक्रैर्जयन् (?) ।
दण्डं मर्त्त्यगणे मुमोच सततं मर्त्त्या(र्त्त्य)व्रजं वर्द्धयन्,
सोमः सागरसत्तरङ्गनिकरं नित्यं यथा नन्दतात् ॥५३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सौधालिहट्टालिविमानचक्रैः पुरन्दराभः प्रविराजति ध्रुवम् ।
यया श्रिया निर्जित एव भूभुजः(जो), भेजुः पदं कोकनदप्रभं वरम् ॥५४॥
वासुदेव(वो) वासुदेव-तेजसा प्राणभासुरः ।
प्रजापतिः प्रजापालः(लो) दीव्यत्येव क्षमापतिः ॥५५॥
यत्र प्रधानो भुवि हेमराजः हेमद्युतिः श्रीगुरुदेवभक्तः ।
गाम्भीर्यचक्रे ह्य युतो(?)विवेकवान्, विचक्षणो बुद्धिधरो विभाति च ॥५६॥
महोत्सवाकीर्णपुरं पुरोत्तमं, विभाति सद्धर्मरसोद्भवाकुलम् ।
दानेन चिन्तामणितुल्यमेवं, सदाऽक्षयं क्षीरसमुद्रनीरवत् ॥५७॥
प्रदीपराजिः प्रवरप्रभाधरा, भूच्छायचक्रं निजकान्तिसूच्या ।
भिन्दन् मणिव्यूहरुचिं मनोहरं शुच्याङ्गुलीभिः(भि)ग्र(ग्रं)हने वसत्वरम्(?) ॥५८॥
विवेक-गाम्भीर्य-विचारमौक्तिकै-यु(र्यु)क्तेन हारेण विभूषिता जनाः ।
वसन्ति मुक्ताफलरत्नराजिभिः पौलस्त्यतुल्या जनराजिपूज्याः ॥५९॥
रम्भासमाना ललना मनोज्ञाः, पतिव्रतापालनतत्परा याः ।
कुरङ्गनेत्रा हि कुरङ्गमुक्ता(क्ता) विभ्राजते(?) शीलधरा विचक्षणाः ॥६०॥
यत्र प्रसन्ना ऋतवः समीराः(रा) भूपादयो मन्त्रिवरा जनावली ।
विहङ्गमा मङ्गलशब्दकारका मेघादयो याचकपूरिताशाः ॥६१॥

॥ इति श्रीनगरवर्णनम् ॥ काव्य १४ ॥

श्रीदायकं कमलमध्यसुकोमलाङ्गं, कल्याणदं सकलमानववन्द्यपादम् ।
सूरीश्वरे मुकुटसन्निभमेव साधुं, विश्वैकमेरुसदृशं जनपुण्डरीकम् ॥६२॥
पीडाम्बुधौ सेतुसमं मुनीन्द्रं, विज्ञानसन्दोहधरं स्तुवेऽहम् ।
कन्दर्परूपैर्विशदं प्रकृष्टं, कल्याणकान्तिं भुवने ललामम् ॥६३॥
सर्वज्ञो ध्यानलीनो मुनिगणमुकुटज्ञानमुक्ताफलौघो,
जीयाद् दन्तालिरत्नैर्गुणगणकुसुमैः(मै)भ्रा(र्भ्रा)जमानो मुनीन्द्रः ।
भ्रूनेत्रद्वन्द्वनीलोत्पलविनयरमादीप्यमानो गरिष्ट-
स्तत्कान्त्या सूर-सोमा-ऽमरपतिनिकरप्रग्रहं तर्जयंश्च ॥६४॥
तवाऽभिधानममलं सुरमर्त्यवाराः, स्वप्नेऽपि सातजयदं हृदये प्रकामे ।
मुञ्चन्ति नो रुचिररत्नमवाप्य लोका रोलम्बजालमयि गन्धधरं मृणालम् ॥६५॥
कूपारबिन्दुनिकरस्य सरिद्वरायाः, पांशोर्गणं गणयितुं गगनस्य मानम् ।
कर्तुं क्षमो न गुरुतुल्यजनो गुणालेः, क्षीरोदधिं तरी(रि)तुमेव लसद्भुजाभ्याम् ॥६६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिशुः प्रभो! तव निजाखिलकम(र्म)चक्रे, किं सन्मुखो न भवति प्रभुतावरेण्य!।
सिंहीसुतः सकलवारणनायके हि, क्षीरोदधेः समेगुणौघसुरत्नराशेः ॥६७॥
काव्यं करोमि जनसंस्कृतजल्पनं च, शास्त्रस्य सत्पठनमेव निजेशमानम् ।
प्राप्नोमि शं सकलमानवपूज्यतां ते, तत्सारचूतकलिकाप्रकरैकहेतुः ॥६८॥
विमलकमलभूघनं निर्मदं शान्तिदं वित्तदं विश्वपं देवदेवार्चितम् ।
सकलवदनमञ्जुलं स्वर्णभं भद्रदं सिद्धिदं स्वर्गदं शङ्करं भास्करम् ।
रुचिरमुकुटसन्निभं सूरिचूडामणिं सर्वशङ्काहरं सोमभं सूरिपं
ममरममु(नु)जसेवितं(?) सर्वशोभाधरं नागगत्या व[रं] साधुमर्त्येश्वरम् ॥६९॥
स्वकीयपादद्वयकान्तिचक्रैर्यस्तोषयामास मनुष्यचक्रान् ।
यः शोषयामास भवौघपङ्कं, स कामरूपो मम पातु मोहात् ॥७०॥
यत्पादवह्निः प्रविराजति ध्रुवं, यत्कामदाज्ञानभवौघधान्यम् ।
जनव्रजानां वरहर्षमोदकं, कुर्वन् कलाशङ्करप्रभाकर ॥७१॥
सूर्येन किं? भविकपद्मविबोधकोऽयं, किं सद्रथेन? शिवमार्गरथाभिरामः ।
अश्वेन किं? यदि च शत्रुगणस्य जेता(?), किं चक्रिणा? यदि जनस्य
सुखस्य दाता ॥७२॥

वरं नमामि प्रवरं प्रमादं, दमप्रदं मानवनागशंदम् ।
दयं वरं नन्दनगन्धसारं, हरं जनौघे गतमोहदुर्मदम् ॥७३॥
दमायं मप्रभं वल्गत्, प्ररङ्गं सारदाप्रदम् ।
वनेभं ज्ञानकूपारं माप्रभं सुमहोदयम् ॥७४॥
ज्ञानदानं मिताहारं, मयनस्य सुखप्रदम् ।
वमाधवं सुरेन्द्रेभगतिसारं मुनिं सना ॥७५॥
नरेन्द्रदेवेन्द्रसुसन्धनंजयं, रङ्गत्समाङ्गं रहितं कुकीर्त्या ।
हर्यक्षसारं द्विजराजवक्त्रं, नाशंबलं ज्ञानविराजमानम् ॥७६॥
रविप्रतापसहितं, देवपद्मालविराजितम्(?) ।
अजन्यनाशकं साधुं, छत्रत्रयविराजितम् ॥७७॥ छत्रम् ॥१॥
चामरप्राजितः सार-रविर्जनगणे गुरुः ।
रङ्गाकुल-क्षमामेरुः, रयान् मां मङ्गलं कुरु ॥७८॥
चामरकान्ते! मुनीशान-नखरायुधसन्निभ! ।
नरालौ कामसत्कुम्भ नक्षत्रे सोमसन्निभ! ॥७९॥ छत्रचामरकाव्य ॥ ७ पश्चात्(?) ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुसुधाधामविमलं, ज्ञाननीरधरं परम् ।
रक्षकं भवकूपारात्, रामाभं राममण्डितम् ॥८०॥
सुकुम्भं भविके मर्त्ये, मुनिनाथं स्तुवे ह्यहम् ।
हरिभं श्रमणस्तोम-मन्दिरे देववन्दितम् ॥८१॥
कलहंसगतिं शङ्ख-रवं वासवरङ्गभृत् ।
ततनीलोत्पलभ्राजि, विविधज्ञानभासुरम् ॥८२॥
जनमङ्गलदं सर्व-साधौ नालीकमुज्ज्वलम् ।
रमाज्ञाकलितं नीति-सुन्दरं शिवदं वरम् ॥८३॥ पूर्णकुम्भकाव्यम् ॥४॥
विमलसातपवारणवारण!, जनगणे भुवनत्रयभास्कर! ।
रवविराजितदुर्गतिनाशक! विमलचित्त! जगत्त्रयवत्सल! ॥८४॥
रहित! पापभरैर्गुणरोहण! तव मुखं मम चाक्षरमर्त्तिहम् ।
गतमदं दमसागरसामभं, मनुजशेखर! रातु महोदयम् ॥८५॥
विज्ञानगेहं हतमोहदुःखं, खसोमतुल्यं जगदेकमङ्गलम् ।
मन्दारगन्धैः सहितं लसन् मुन् मुमुक्षुसन्दोहनतं ललत्सम् ॥८६॥
लक्ष्मीनिवासं वरसोमबान्धवं, वरेण्यसन्धं भवसिन्धुवाडवम् ।
सारङ्गनेत्रद्वयमंशुकान्त-ततं कलाश्रेणिगणैर्वरायम् ॥८७॥
ततं जनालेः सुरराशिमोहनं, नवीनरूपप्रकरेण मित्रम् ।
पञ्चत्वहं सौम्यगुणालिगेहं, हर्षप्रदं मानवचक्रतुङ्गम् ॥८८॥
वामं गुणाल्याः सुरराशिमोहनं, घनसारसारो.... । (?)
रोमालिसारं कमलासुपङ्कजं, रयात् सुखं रातु विचारपीन ॥
नयालयं पापगणै मुक्तम् (?) ॥८९॥
नवीनचामीकरसत्प्रियङ्गुं, गुप्त्या युतं ज्ञानधरं सदा शुचिम् ।
वामं क्षमामण्डलसद्विचारैः, त्रैलोकपूज्यं घनसारजालम् ॥९०॥
रम्यं शरीरं जनकामकुम्भं भव्यारविन्दे तपनं गतामम्
नम्रेन्द्रमौलिं गुणनीरकूपं परं प्रियाज्ञारुचिरं जने रविम् ॥९१॥
छत्रकाव्यम् ॥ ८ ॥२॥

चामरोज्ज्वलसत्तुण्डं, लब्धिव्यूहविराजितम् ।
ललाटसोमसत्कान्तं, ललद्वाक्यवरामृतम् ॥९२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भव्यालिकुमुदव्यूह-हर्षदं दमसागरम् ।
हंसभं परमं सारं, हरिभांभं पुनात्वरम् ॥९३॥ छत्रचामरकाव्य ॥१०॥
राकाशशीव वदनं घनसारसारं, रत्नाकरध्वनिगणं सकलं कलं शत् ।
रम्भातिनिर्मलशरीर! निशान्तकान्ते!, ते शं विभाति गतमोहविषादपाशम् ॥९४॥
राद्धान्तपेशलसुधाकलितं प्रभो! ते ॥ पदं १ ।
रसाभानारदातिज्ञ, कंसालि ध्वनिकोमल ।
नरेन्द्रसमसंसारा-ध्वधर्मव्रजनीरद ॥९५॥
वराध्वनि नदप्राग्र, देवेशव्रजसेवित ।
गदमुक्त क्षमापीन, रीरीकान्तिप्रमाधन ॥९६॥
वरभाग्यधर ध्वान्त-रवे मिथ्यात्वनाशक ।
सद्वन्दितपदाम्भोज, जननिर्दोषसाधुप ॥९७॥
सुनायकं शीतलवाक्यसारं, नमामि सारद्युतिभासमानम् ।
भवालसं दुर्गतिनाशकं तं, सुरैर्नतं निर्ममतं मुनीन्द्रम् ॥९८॥
गतशोककालरात्रि, जगदानन्ददायकम् ।
तेनेन रहित प्राग्रं, छत्रतुल्यं जगद्गुरो! ॥९९॥
कारुण्यं नयनसुखं सुरेन्द्रलीलाम् ॥ एकपदं छत्रं ॥३॥
अर्कार्करूपसन्दोहं, हरिपूज्यं तमोहरम् ।
हंसमज्ञान ए वारं हविष्यं मानवे वरम्(?) ॥१००॥
वन्दे सारं यतीशानं, नरसिंहं नयाकरम् ।
नलिनाङ्गं चलत्सारं, नवनीतसुकोमलम् ॥१०१॥ छत्र-चामरकाव्य ॥८॥ श्लो.॥
विचक्षणं विबुधदैवतशंदमर्कं, कल्पप्रभं मसदृशं भुवि पद्मबन्धुम् ।
कर्णप्रभं वममलं शितवक्त्रवल्गत्, गन्धाकुलं चन्दनतुल्यमेवं ॥१०२॥
कमनल्पदयाप्रज्ञं, प्रशमं शुभमार्यभम् ॥(?)
तपप्रभावं वरसोमवक्त्रं, देवेन्द्रमन्दारसमं सदैवतम् ।
मनुष्यमं कोमलबुद्धिदृग्धं भृङ्गारगन्धं बलराजमानम् ॥१०३॥
गताशं बुद्धिसन्दोहं, सेवितं शितभास्करैः ।
सूरीशं भुवि हेमाद्रिं, जनानामुचितप्रदम् ॥१०४॥
छत्रप्रभं सत्कविनम्रपादं, रमेश्वरं सद्वदनं महामृगम् ।
अनाथपक्षं परमश्रियाऽऽढ्यं, शशाङ्कवक्त्रं भवसिन्धुसेतुम् ॥१०५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शमालिसोमं चपलप्रभाभृत्, हतप्रमादं वडवानलाभम् ।
क्रोधालिसिन्धौ शिववप्रचित्तं, नमामि वाचंयमसारगङ्गम् ॥१०६॥
सन्तोष-सौभाग्यजले च सद्विधुं ॥१०६॥
मायामुक्तं परब्रह्म मन्मथद्रुमसामजम् ।
मतिमौक्तिकधरं माजं, महिषभ्रकुटिद्वयम् ॥१०७॥
जयदं जनवृक्षे च, चन्द्रवक्त्रमनोहरम् ।
चन्दनाङ्कं कलापूरं, चण्डमुक्तं स्तुवे ह्यरम् ॥१०८॥ छत्र ४ ॥ चामरकाव्य ७
सूर्यप्रभो मानवपद्मवारे, विशालरत्नाकर एव सारः ।
रविप्रभावो भयनाशकश्च, विचारवल्लात्करुणप्रकृष्टः ॥१०९॥
रयात् पुना नुः करमंमलश्च, सुमेरुधीरत्वधरस्त्वमोह ।
...................................... दारिद्र्यपङ्के जलदप्रभश्च ॥११०॥
सूरीश्वरो मङ्गलराशिसत्त्व त्वक् भासमानो मनुजव्रजेष्ट ।
जम्भारिकीर्त्योदकसिन्धुसार रवव्रजो दुर्गतिराशिनाशकृत् ॥१११॥
प्रतापरक्ताङ्घ्रधरो वरोधी, धीरेषु धीरो गुणराशिवप्रः ।
भोगीन्द्रमुख्यः सुगतिर्नमीरुः, रुग्भासमानो जनचक्रनन्दनः ॥११२॥
मानेन हीनो, नयदो हि कामे, मेघो जने केकिगणेऽशुचारुः ।
नरेन्द्रसेव्यः सुखदः प्रियांशुः, सुसेतुतुल्यो भवसागरेकः (?) ॥११३॥
बलालिगाम्भीर्यपयोधरश्च, चञ्चत्कलासाहसपूरितो(ता)ङ्ग(ङ्गः) ।
पयोदशब्दो विनतो महाबलः, लक्ष्मीनिवासो भुवनैकबान्धवः ॥११४॥
मतिप्रधानो गतकर्मचण्डः, ललाटचन्द्रो मुनिराशिशङ्करः ।
वाचंयमोडुव्रजचारुसोम, मन्दारतुल्यो विशदो लसद्रुचा ॥११५॥
रेखानदीशो गुणवाक्यपूरः, रङ्गाकुलो मञ्जुलशुक्रवत्कविः ।
विशालनेत्रे गतपापपङ्कः, करिप्रभो! मर्त्यगणे गुरुश्च ॥११६॥ छत्रम् ॥
धीवरोऽयं सदाऽदीपि, पितुः सत्कुलवासव ।
पितामहसमारावः, पिनाकस्य समो ध्रुवम् ॥११७॥
मनुजव्रजसत्कुम्भ, भव्यकैरवसोमभः ।
भद्रशालवनेभाभ भवमुक्त क्षमाशुभः ॥११८॥ छत्रचामरकाव्य ॥१०॥
राकाशशीव सुमुखं घनबुद्धिचारुः, रुद्राधिपं सकलतापमहोर्विभेत्तुम् ।
रुग्भंसितं मदनसेनगणं ससंघं, धवं सुवाण्या विधिना कृतं सत् ॥११९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रुचाभं द्राग् द्विपे सिंहं, धिग्बुधं विततं जयम् ।
भूपं नमामि सोमश्रीः सर्वसङ्घविचक्षणम् ॥१२०॥
दयायासुकं खर्जू-तुल्यं च वनसन्निभम् ।
सकलं मुक्तिदं वीरं, सारसेतुसमं प्रभुम् ॥१२१॥
ततांशुरचितं वाक्यं, जनानन्दसुखप्रदम् ।
मुनिपं वरताभास्वत्, जननागं गतिप्रदम् ॥१२२॥
छत्रप्रभं समं शीत-सन्निभं भयनाशकम् ।
नतं सुरगणैः कामं, भवहोः सकलप्रभम् ॥१२३॥
माया-मान-मदे सङ्घे, रम्भाचक्रे महामृगम् ।
कविकान्तं क्षमाधीरं, विज्ञानविततं सदा ॥१२४॥
नीलोत्पलाभं जनकामकुम्भं, रामप्रभं सकलवाञ्छितदं सुसन्धम् ।
धर्मप्रदं सकलविश्वरमां विभेत्तुम् ॥ त्रिपदी ॥
निर्मदं दमसङ्घातं तन्दुलव्यूहभद्रदम् ।
ताङ्गं सद्विसच्छन्दं, तरुभं प्रणमाम्यहम् ॥१२५॥
श्लोककर्पूरपूताङ्गं, गरुडप्राणभासुरम् ।
गजसद्गतिरुग्भारं, गरिष्ठं सूरिशेखरम् ॥ १२६॥ छत्रचामरकाव्यश्लोक
राकाशशेः सममुखं घनसं(सा)रपूजां, यादःपतेः ध्वनिगणं सुकलं कलापम् ।
य(या)यावरं शुभकरं गुणतारकामं, मन्दारमेव जनदैवतचक्रवाले ॥१२७॥
या पूजादरमेव -- शमदं रम्यं स्तुतेर्नन्दनं
वांशु व्रातवरं घनाभमिभभं क्षेमङ्करं वः खलु ।
मर्त्यश्रीनिकरं कलाशुभगमुत्तं(त्तुं)गप्रभाभासुरं
ऐश्वर्यं शिवदं न मत्सरमहो श्लोकालिगुप्त्या युतम् ॥१२८॥
मर्त्यामर्त्यसुसङ्घसेवितपदं प्रज्ञानरेन्द्रप्रभो!
ज्ञानैश्चाऽधिकसेतुतुल्यविशदाज्ञासारताभासुर! ।
सन्तोषव्रजभालसद्धयहरं भृङ्गारगन्धैर्वरं ।
हीनाचारमृगे मृगेश्वरककान्तिव्यूहकामप्रदम् ॥१२९॥
मोहे शोके कामे माने, नागे चक्रे सिंह क्षान्त ।
लाराशिसंयुतप्राज्ञ वन्दितामर निर्मम ॥ विध(?) १३०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विबुधबुद्धिधरप्रभुताधिपम् ॥१३१॥ छत्रम् ॥७॥
साम्राज्यकलितस्फार-रत्नाकरसमध्वने ।
रयाद् देहि क्षमाखाने, रङ्गत्कीर्तिधरावने ॥१३२॥
ऐरावतबलव्रात-तपसा विशद प्रभो! ।
ततामरतते! शम्भो! तमोहर सं देहि भो ॥१३३॥ छत्रचामरकाव्य श्लोक ६॥
ततं सिंहासनं भाते, ते साधो! भूरिसातद! ।
आक्रमत् देवभूपाललर्छि(च्छि)हासनं रुचा ॥१३४॥
नतेशदेवमर्त्यालि!, जय मातङ्गसद्गते! ।
ततमेघध्वने! पीन!, मम देहि सदा जयम् ॥१३५॥ सिंहासनश्लोक ॥
भेजे वरा स्थापनिका मनोहरा, मन्येहमेवं परमा दिने दिने ।
सुरालिसेव्या भुवनस्य सन्मुने ॥ ॥ त्रिपदी, ठवणी ॥
ततं मुखं राजति दर्पणाभं, भद्रप्रदं मानवमण्डलानाम् ।
नानासुशोभासहितं सदा शुभं ॥ ॥ त्रिपदी, दर्पण ॥
श्रीवत्सं सततं सूर-रङ्गत्सारभुजान्तरम् ।
रयाद् भेजे परब्रह्म, मन्दारततकोमलम् ॥१३६॥
रहितं त्वधैश्च चञ्चत् श्रीः(च्छ्रीः),
पीनं ज्ञानधनं मानं ध्वानदानजिनं पुनः ॥ ॥श्रीवत्सं त्रिपदी ॥
भेजे मत्सद्वयं सारं, रङ्गत्पादं दयाकरम् ।
चक्रमन्दाररुचिरं, रविसारं रमाधरम् ॥१३७॥
नदः ज्ञानगणस्याऽथ घर्मणे भद्रदो रयात् ।
क्षीरचारुरुचारङ्गत् ॥ त्रिपदी ॥
शीघ्रं रक्षतु सूरीशः, रामहस्ततकीर्त्तिभाक् ।
कूपारः कमलायाश्च, चन्द्रसाररमासुभाक् ॥१३८॥
पूतचित्तधरप्राग्रग्रन्थधीः कमलालयः ।
यशसा सहितः पूतः, तमोहररुचेश्चयः ॥१३९॥ मत्स्ययामलम् ॥२॥
शुभं कुम्भनिभं शोभ-भद्रदं पर्वतप्रभम् ।
भद्रासनं सदा भेजे, जेतुं विश्वत्रयं पुनः ॥१४०॥
वरतीरपरस्फार-रश्मिपूरितभूघनम् ।
शुभं पदयुगं कामं, मञ्जुलं भुवि मण्डनम् ॥१४१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शंदंददमदंमदहं नादं ॥ पदम् ॥ यामलं श्लो. २ ॥
श्रीवर्द्धमानं नवीनाङ्गं गत्या ज्ञानजयाकरम् ।
विगताघं जने दानं, नलिनाङ्गं गदां द्युते ॥१४२॥
वलाज्जयकरं तुङ्गं गदेऽगदमहेऽधिपम् ।
भक्त्या स्तोष्ये मुनीशानं, नगरं ततसद्युतेः ॥१४३॥
सद्रपञ्चाननं विश्वे, श्वेतकीर्तिधरं परम् ।
इभशौर्यधरो दान-नयकल्लोलविश्वपः ॥१४४॥ शरावसम्पुट श्लो. २ ॥
अरुणज्ञाननयव्रात, अर्त्तिपङ्के ललद्रविः ।
अनन्तैश्वर्यजम्बारिः अघहं हंससन्निभः ॥१४५॥ स्वस्तिक ॥
तत्कुम्भं भय(व?)सिन्धुतारकं वक्त्रं राजति हारि विद्यया ।
तन्द्राहं हरितालताकरं, गोविन्दो मुनिराजिमण्डले ॥१४६॥
लेखासिन्धुघनं नतामरं, रङ्गत्कुन्दनिभं भयहं जया ।
जरालिमुक्तो जयतान्महाशयः यतिततिमतिस्तुतिश्रुति ॥१४७॥ (?)
सुकृत्यौघधर प्राग्र-सुधारोगविनाशकः ।
जलदं पापजंबाले जने गोविन्दसन्निभः ॥१४८॥ कलशका० ३॥
अमरपूजितमानववन्दित-प्रभुतया जयराजिजितामर ।
शुभभरप्रददंभगणायुत-विविधबुद्धिधरप्रवरप्रद ॥१४९॥
दमततप्रवराम्बुजसाधुषु । (?)
अस्मिदे फलदे द्रुममङ्गल त्वगददेहहरे विविधौजसा ।
विशददम्भवहं हरिभं धरा-ऽधिपपयोधर रत्नवरालय ॥१५०॥
यतिजयप्रद विष्टपभूषण, दलितदुर्मतिचक्र धनंजय ॥ द्विपदी ॥
अकुलितक्षमया ततमेरुभ, गरुडलब्धिललत्दृढसाहस ।
शरणनन्दनतुल्यमनोहर, रवधनाभविचारहरप्रभ ॥१५१॥
भयहरप्रियकीर्तिसुविस्तृत अरुणसन्निभ! भव्यकुशेशये ।
विविधसत्शमदद्विपपङ्क्तिभ-भयहरभू(भ्रू)कुटिद्वयजन्तुपः ।
सकलदेववरप्रवरानन, सुजयदं वदनं मम रक्षतु ॥१५२॥ नन्द्यावर्तकाव्य ॥४॥
श्रीधरं सन्मुखं शोभते सुन्दरं निर्मलं पुण्डरीकप्रभं भासुरम् ।
शङ्करं भव्यसातप्रदं शेखरं, सूरिचूडामणिं मानवे षेचरम् (शेखरम्?) ॥१५३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवकामप्रदं सुन्दरं भास्करं, विश्वपं कामदं चारुशोभाकरम् ।
देवदेवार्चितं लोकदीपं वरं, चक्रभं शत्रुनाशे सदा शङ्करम् ॥१५४॥
सत्यधर्मप्रदं सर्वलोकेश्वरं, ज्ञानपद्माकरं सारपद्माधरम् ।
भालसोमाङ्कितं चारुरूपं वरं सामजं पापवृक्षे जने भास्करम् ॥१५५॥
मानवारं सुकान्तं स्तुवे सूरिरं, चण्डदं विश्वपं साहसं सत्वरम् ।
कालहं तेजसा भासुरं सत्करं, हर्षसिन्धौ शशाङ्कं कलासङ्करम् ॥१५६॥
श्रीगुरुं निर्मलं शम्भुभं सूरिपं, देवपं वित्तदं देवभं चन्द्रजित् ।
सज्जिनाज्ञाधरं भाकुलं साधुपं, मायतिं चञ्चलाकायभं हर्षदम् ॥१५७॥
सत्वदं पुत्रदं भद्रदं लाभदं, मप्रभं कामितैर्वासवं सत्करम् ।
मन्दिरं माततेर्मानदं पापहं, रङ्गभृत् विक्रमौ तेश्वरं धौततम् ॥१५८॥
शोभाकरं ततं मानैः, सुरुचासु सुलोचनम् ।
सेतोः समं सारचारुं, क्षेमैः ततं सारशुभाशशाङ्कभम् ॥१५९॥
सुधा भाग्यं सेतुं षेशं(?) भासु भारं परं सदा ।
के सद्मालिं परं भाभं सूर्यं शंदं समं सदा ॥१६०॥ षोडशारचक्र काव्य ८॥
श्रीदायकः कल्पतरुर्जिनेश्वरः, हीरालिकान्तिप्रकरेण भासुरः ।
रविप्रभावो भुवनैकशेखरः, विद्याधिक कामित[ला]लसङ्करः(?) ॥१६१॥
जयप्रदो देवगुरुर्गतारिरः, यतीश्वरो दर्पहरो विभाभरः ।
सूरिप्रधानो मम दातु सांसरत्-, रिपुव्रजश्चारुहरिभवेऽनलः ॥१६२॥
श्रीसेव्ये हीरभं रम्यं, भक्तिकान्तं जयालयम् ।
सर्वसूरिरीरीप्रभं ॥ ॥ त्रिपदीकम् ॥१६३॥
श्रीदायकः कामहरो शुभाकर-कल्याणदेहै रुचिरो मनोहरः ।
धाम्ना व्रजैः संयुत एव नायकः ॥ ॥ त्रिपदी ॥
तपोधनः कम्बुरवो वनप्रभः, तया युतो गुप्तिधरो हरिप्रभः ।
मनुष्यसिंहः कमलाभिरामः ॥ ॥ त्रिपदी ॥
नेता भाग्याकुलो सेतुः, शमदः तारभाधरः ।
साजनवेदधरप्रभोः (?) ॥ ॥ त्रिपदी ॥ अष्टारचक्रम् ॥
श्रीनायकः कलासारः, हीनाय रहितः परः ।
रमामालातपः स्फार-विनतः शिवशङ्करः ॥१६४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जनगन्धहरिर्वीर जयराशिर्गताजरः ।
सूरिचूडामणिः सूरः रिपुमुक्तः क्षमाधरः ॥१६५॥
श्रीदाता तपसा सारः, विबुधाधिपभासुरः ।
जन्तुपो भवमुक्तोऽरं यमहः परमेश्वर ॥१६६॥
सेवकानन्ददातारः, नलिनाङ्गो दयाकरः ।
सूत्राम्बुधिः सदाक्रूररिष्टभ्रकुटियामलः ॥१६७॥
आतङ्करहिताऽक्षार-नय गाम्भीर्यसागरः ।
दक्षलोचन तातारः विमलो विबुधेश्वरः ॥१६८॥
मतिभृत् कमलाधारः, लब्धिमण्डलभासुरः ।
सूत्रपुष्पौघभृङ्गारः, रिपुहन्ता सदाऽमरः ॥१६९॥
श्रीतातः परमाचारः, विश्वत्रितयवत्सलः ।
जन्तो रात्वक्षरं वीर यतीशः कमलाधरः ॥१७०॥
दानज्ञानव्रजोदारः नरद्विपसमोऽमरः ।
सूर्यप्रतापरुचिरः रिपुपूज्यः पयोधरः ॥१७१॥ द्वात्रिंशत्पत्रकमलश्लो. ८ ॥
पीतकान्तनतः तार-हितसातयुतः तत ।
शान्तश्चूतगर्तपातः पूतश्वेततनुः तपः ॥१७२॥ षोडशपत्रकमलश्लो० ॥
यायादममदयायाः यातु रोकः करोतु याम् ।
दोरोतोययतो रोद मकयमम यकम ॥१७३॥ सर्वतोभ्रम(भद्र?) ॥
प्रवहणं प्रणमामि ततं शिवेऽध्वनि वरेऽविधिसंशयनाशके ।
ततगुणाश्वयुतं सुगतं वरं ॥ त्रिपदी ॥
वररथाङ्कसुगुप्तिरथाङ्गयुतं गुरुं (?) रुचिरकीर्त्तिपताकमहोनतम् ।
रमाधवं वरमाधं, सततं सततं ततः ॥१७४॥ रथकाव्य १ ॥
नमामि तं नरे मित्रं, दयाकल्पं दयाकरम् ।
वन्दितं शिवसातं च भयहं न भयं हरिम् ॥१७५॥
सद्वारयशसा रङ्गत् कलौ कल्पं कराकरम् ।
विश्ववन्द्यं विभवं च कम्बुशब्दकरं सदा ॥१७६॥
नायकं कर्ममुक्तं च, चन्द्रकान्तिमनोहरम् ।
मर्त्यसाधुमतं सार-घनाभं मेघहं भभम् ॥१७७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिद्धिदं सासितं दक्ष-प्रभं कम्बुप्रभंकरम् ।
हतमोहं हरं मोक्षं सुगुरुं सुसुधारुचिम् ॥१७८॥
निष्कलङ्कं निधिं लक्ष्म्याः मुनिपं सुमुदा परं पदम् ॥
पञ्चाननं नरे वारे, विविधाम्बुजसन्निभ ।
भवहंताररश्मि च, चञ्चत्सद्गुणनन्दनम् ॥१७९॥
भम्भाचारुरवं विश्वे सज्जनं नररक्षकम् ।
नवनीतचलद्देह-हरं मानवमण्डले ॥१८०॥ ॥ हारश्लोक – ६ ॥
भम्भालिहं हंससमं महाबलं चञ्चद्रवैर्भासितचारुवक्त्रम् ।
भद्रप्रदं भाव्रजचञ्चदक्षं कल्पप्रभार्कं कमलाभिरामम् ॥१८१॥
श्रीनायकः कर्महरो मुनीश्वरः, श्रीलालवद् यः परमोदयश्च ।
विशाललक्ष्म्याः(क्ष्म्या) प्रविराजमानः, तुर्यध्वनिर्निर्ममतः तमोहरः ।
रम्भाधरो रोममतिप्रकाण्डः ॥ ॥ त्रिपदी ॥
देयादसौ सौर्यकलं ततप्रभं आनन्ददो दोषहरे जय प्रदः ॥ भंभातुर्य वक्रतुर्य युगलम् ॥
यस्य प्रतापो दिननायकोऽसौ, शरीरमेरुं रुचिरं भ्रमंश्च ।
भव्यालिपद्मं निजकान्तिचक्रैः, सदा मनोजं च विकाशकं जयम् ॥१८२॥ सूर्य ॥
भेजे शशाङ्को मुनिनाथपद्मं, चिह्नच्छलान्मानवचक्रकुम्भे ॥ शशाङ्कचित्रम् ॥ पदद्वयम् ॥
श्रीमन्**महेवाख्य**पुरान् मनोहरान्(त्), श्रिया युतात्(द्) दानयुतात् सुखाकुलात् ।
प्रासादकेतुप्रविराजमानात्(द्), विमानसौधौघसुहट्टभासान्(त्) ॥१८३॥
राजाऽभवत् श्री**हरपाल**नाम्ना, ख्यातो गुणैरानकदुन्दुभिर्यथा ।
राज्ञी पुनर्देवकराद्धुतेव, नाम्ना श्रिया **धन्यवती** सुतस्तयोः ॥१८४॥
राजा महाराजकुलीनशेकरः, श्री**मेघराजा**भिधराजशेखरः ।
भूपालमालानतपादपङ्कजः, सदा जयत्यङ्गरमास्तपङ्कजः ॥१८५॥
यः पालयत्यात्मजवत्प्रजा निजाः(जा) अधःकृताशेषनृपः स्वनीतिभिः ।
धृतावतारः पुनरेव माधवो हर्तुं प्रजानामिव पीडितं कलेः ॥१८६॥
यन्ना(न्न्या?)यमालोक्य हरिः प्रसन्न-श्चकार दुर्गं शतहास्तिकं पुरे ।
कलावहो यन्महिमाऽतिशेते, यायात् कथं तस्य तुलां जनार्दनः ॥१८७॥
गृहाङ्गणे स्वर्गतरुर्विलोकितुं, ह्यवातरद् दानमरिष्टकैतवात् ।
शैलच्छलाद् दिक्पतयो गजैरिव तदीयदानोपमितिः कुय(त?)स्तरा ॥१८८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रकम्प्रभूपः परितस्तदङ्गजो जयी कलावान् सुमतो जिताहवः ।
राजन्ति तस्य व्यवहारिणः श्रिया धर्मार्थकामैरतियुक्तवृत्तयः ॥१८९॥
दुःखित्व-दौर्भाग्य-दरिद्रतादि-भावा विधातुः सृजतो हि विस्मृताः ।
न सन्ति यत्र प्रगुणा गुणावली गुणाय दोषः क्षतितामितीरितः ॥१९०॥
शिष्याणु**विजयहर्षो**, विज्ञपयत्येष मुदितसत्त्वेनाम्(ताः) ।
संयोज्य हस्तयुगलं, स्पृष्ट्वा भूमिं निजोत्तमाङ्गेन ॥१९१॥
सविनयं सप्रणयं, सानन्दं चैव सोत्कण्ठम् ।
यथा कार्यं चाऽत्र सर्वं, पठनं शशधरस्य मे ॥१९२॥
निर्विघ्नविहितयोगः, गुरूपदेशान्**महानिशीथस्य** ।
प्रारब्ध(ब्धः) **कल्पाध्ययन-योगः** पुनः परमभावेन ॥१९३॥
इत्यादि सकलं कार्यं, निर्विघ्नं निर्वहत्यलम् ।
हेतुस्तत्रैव सूरीश! तवाऽऽख्यास्मरणं पुनः ॥१९४॥
नागमन्त्रसमं जन्तोः, सिद्धिदं बुद्धिदं वरम् ।
मिथ्यात्वरोगसन्दोहे, सुधातुल्यं जयप्रदम् ॥१९५॥
त्रिसन्ध्यं वन्दना मे चाऽवधार्या सूरिपुङ्गवैः ।
प्रसाद्या हितशिक्षाश्च, शिशोर्मोदाय सर्वदा ॥१९६॥
**श्रीतातपादे** दिननायके सति, उदेति चाचार्यतमीपतिः सदा ।
विच्छायतामुक्तरजःप्रतापः कलङ्कमुक्तो जनपद्मबोधकः ॥१९७॥
सम्पूर्णवक्त्रं कमलाभिरामं, कमला(कला?)भिरामं हसितं महोदयम् ।
श्रीमत्त**पागच्छ**मरुत्पथे वरं, चङ्क्रम्यमाण ति(स्ति)लको हि दिव्यति ॥१९८॥
आचार्यदन्तावलरक्षयास्त्रौ(?)पुनातु वन्ताबलहंससङ्गतिः ।
मिथ्यात्विलोकं निजसुप्रभावैः मानेन हीनं भुवने च कुर्वन् ॥१९९॥
वाचकेषु शिरोरत्नं **कल्याणविजया**ह्वयम् ।
कल्याणरुचिरं नौमि, सुभाग्यं वसुदेववत् ॥२००॥
अङ्गिरस्वन् महाबुध्या(द्ध्या), शोभते साधुपङ्कजः ।
सुरशैलमहाधीरः(र) आज्ञापालनतत्परः ॥२०१॥
विबुधा **विजयहंसा**ख्या-त(स्त)पोधनविचक्षणाः ।
द्वासप्ततिकलासारा(राः) पण्डितप्रवरा(राः) सदा ॥२०२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विद्याहर्षगणि**श्रेष्ठाः गणयो गुणशालिनः ।
**रुडर्षि गणि**नामानो(नः) साधूनां चित्तपोषकाः ॥२०३॥
शील(ले) गाङ्गेयसदृशाः **कर्मर्षि**गणिपुङ्गवाः ।
परोपकारैकमनाः तपसाधनसन्निभाः ॥२०४॥
**कीर्त्तिहर्षगणि**श्रेष्ठाः कीर्त्ति-हर्षविराजिताः ।
**लक्ष्मीविजय**गणयः(यो) वैयावृत्त्यविचक्षणाः ॥२०५॥
**कृष्णविजय**नामानो [गणयो] गुणभासुराः ।
**पद्मविजयगणयो**(यः) प्रमाणपठनोद्यमाः ॥२०६॥
**चम्पर्षि**गणयश्चाऽपि, चम्पकोमलभूघनाः ।
**लखमसि**नामानो गणयश्चाऽपि, श्रीतातपदसेवकाः ॥२०७॥
क्षुल्लकः **सूरविजयः**(यो) वृद्धः क्षुल्लकमण्डले ।
गणि**र्जयविजया**ख्यश्च विज्ञानगणशोभनः (?) ॥२०८॥
क्षुल्लकः **शुभविजयः** पठनोद्यमकारकः ।
श्रीतातपादस्य सेवकः क्षुल्लकाग्रणीः ॥२०९॥
मुनि**र्धनविजया**ख्यश्च श्रीतातपदसेवकः ।
श्रीवाचकपदे पद्मे भ्रमरो क्षुल्लकाग्रणीः ॥२१०॥
मुमुक्षु**लाभविजयः** विनयादिगुणमञ्जुलः ।
**कर्मदास**ऋषिश्चाऽपि वैयावृत्यविचक्षणः ॥२११॥
लुमाद्यदुर्वाद(दि)मृगान् विनाश्य, खाद्यादिमातङ्गमदं निहत्य ।
जिनेन्द्रसिद्धान्तवनं सुगाहयन्, सिंहायते तातनगाश्रितो यः ॥२१२॥
**उद्योतविजया**ह्वानाः, श्रीतातपदसेवकाः ।
मुनि**र्मतिविजया**ख्योऽसौ, लुमाद्यमदनाशकः ॥२१३॥
मुनि**र्भाग्यविजय**श्च, जिनेन्द्रमतदीपकः ।
मुनि**न(र्न)यविजया**ख्योऽसौ(योऽसौ)सिद्धान्तगणभासुरः ॥२१४॥
मुनिश्च **पुण्यविजयः**(य) आज्ञापालनतत्परः ॥
**मेघश्री-कोडाई-कथू-लक्खाका**दिसाधूनां ।
**चम्पश्री-कनकश्री**साध्वीनामनुनतिर्ज्ञाप्या ॥२१५॥
अत्रत्य**भीमविमलाः**(ला) गणयो गुणशालिनः ।
**जयवन्तर्षि**गणयः(यो) योगोद्वाहनतत्पराः ॥२१६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऋ[षि]**माण्डण**नामानो वैयावृत्त्यादिकारकाः ।
मुनि**र्नयविजया**ख्योऽसौ, आख्यातस्य पाठकः ॥२१७॥
मुनि**र्दक्षविजयः** (य)-त(स्त)पोधनमनोहरः ।
गणयो(यः)**सूरचन्द्रा**ख्याः(ख्या) योगोद्वाहनतत्पराः ॥२१८॥
अत्रत्य(त्यः) सकलसङ्घ-साधु श्रीमल्लोको विशेषेण (?) ।
श्रीतातचरणकमलं, वन्दन्ते गणिवाचकं च भूरिभावेन ॥२१९॥
वन्दना त्वनुवन्दना च ज्ञेया ज्ञाप्या च सर्वदा ।
**जिनदत्त**साधु**योधा-मेहा**जलसज्जनाः सततम् ॥२२०॥
बालेन लिखितं यच्च, यन्नूनमथवाऽधिकम् ।
क्षन्तव्यं तत्क्षमावद्भिः, भूयात् सर्वं पुनः(न)र्मुदे ॥२२१॥
मासे श्रीकार्त्तिके कृष्ण-चतुर्थ्यां बुधवासरे ।
शिशुना **विजयहर्षे**न(ण) लेखोऽलेखीति मङ्गलम् ॥२२२॥ इति **भद्रम्** ॥

संम्वत् **१६३०** वर्षे कार्त्तिकमासे कृष्णपक्षे ४ तिथौ बुधवार(सरे)
लेखः सम्पूर्ण(र्णी)कृतः ।

—*—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ३ )

# देवकपत्तनात् पत्तननगरे श्रीविजयदेवसूरिं प्रति उपाध्यायश्रीविनयविजयगणिलिखितो लेखः

– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय

उपाध्याय **श्रीविनयविजयजी** – जिनशासननी एक विलक्षण प्रतिभा । आगमनुं क्षेत्र होय के साहित्यनुं (काव्यनुं), सर्वत्र एमनुं प्रदान अनन्य छे. **कल्पसूत्र-सुबोधिकावृत्ति, लोकप्रकाश, शान्तसुधारस, इन्दुदूतकाव्य** जेवा संस्कृत ग्रन्थो तेमज **श्रीपालरास** जेवी गुर्जररचनाओ आजे पण जगतमां एमनुं कीर्तिगान करी रही छे.

**देवकपत्तन ( देवपुर-पाटण )**थी **पत्तन** (सिद्धपुर-पाटण) विराजमान **श्रीविजय-देवसूरीश्वरजी** म.ने लखेल प्रस्तुत लेख पण तेमनी ज रचना छे. भाषानुं प्रभुत्व कोने कहेवाय? अेनो प्रत्यक्ष बोध प्रस्तुत कृति करावी आपे छे. पोताना मनना भावोने गाथाना पूर्वार्द्धमां प्राकृतभाषामां, तथा उत्तरार्द्धमां संस्कृतमां, ते पण प्रांजल शैलीए, निबद्ध करवा ते खरेखर कष्टसाध्य कार्य छे.

प्रारम्भना १३ (१ थी १३) पद्योमां कामविजेता **श्रीनेमिजिन**ने नमस्कार कर्या छे. ते समये **देवकपत्तन( देवपुर-पाटण )**मां **नेमिनाथ**प्रभुनुं चैत्य हशे एथी कविए ते प्रभुने नमस्कार कर्या छे. श्लोक ७७मां आज वात कविए पुष्ट करी छे. त्यारबाद श्लोक १४ थी २६मां **पाटण**नगरनुं वर्णन छे. अहीं श्लोक १५मां ब्रह्माना विष्णुनी नाभिपीठ पर करेल निवासनुं कारण दर्शाव्युं छे. श्लोक २०मां प्रयुक्त 'शतबिन्दु' शब्दनो अर्थ विष्णु होय एम लागे छे. आगळ श्लोक २७ थी ३३मां **देवकपत्तन ( देवपुर-पाटण )**नुं वर्णन छे. **श्रीपार्श्वनाथप्रभुना** चैत्यनी नोंध अहीं अगत्यनी छे. पछीना श्लोक ३४-३५-३६मां पोतानुं नाम जणावी विज्ञप्तिरचनानी वात जणावी छे.

हवे आगळनां २ पद्योमां सूर्योदयनुं टूंकमां वर्णन करी श्लोक ३९ थी ४८मां चार्तुमास अने पर्युषणानी आराधना जणावी छे. तेमां **अन्त्यषडङ्गी ( ज्ञाताधर्मकथाङ्गसूत्र-उपासकदशाङ्गसूत्र-अन्तकृद्दशाङ्गसूत्र-अनुत्तरौप-पातिकदशाङ्गसूत्र-प्रश्नव्याकरणसूत्र-विपाकसूत्रना )** स्वाध्यायनी अने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सूत्रकृताङ्गसूत्र** व्याख्याननी वात ध्यानाकर्षक छे.

श्लोक ४९ थी ५९नां दस पद्योमां कर्त्ताए पोतानो गुरुभगवन्त प्रत्येनो पूज्यभाव व्यक्त कर्यो छे. तेमां पण श्लोक ५०मां 'रत्नो तो राजाना घेर ज शोभे' जणावी गुरुभगवन्तना गुणो माटे श्रेष्ठ उपमा मूकी छे. श्लोक ६०-६१-६२मां प्रतिपत्रनी अपेक्षा जणावी श्लोक ६४-६५-६६-६७-६८मां गुरुभगवन्तनी सेवामां रहेला पोतानाथी नाना सर्वे साधुओनां नामपूर्वक अनुवन्दना जणावी छे. साथे पोतानी साथे चार्तुमास रहेला साधुवृन्द-साध्वीवृन्दनी वन्दना पण श्लोक ७०-७१मां जणावी छे. पछीना ७२-७३-७४-७५ना श्लोकोमां **वेलाउल ( वेरावळ ), वणथलि ( वंथली ), धुराजीपुर ( धोराजी )** नगरमां चातुर्मास बिराजमान सर्व साधुभगवन्तनां नाम जणावी एमना वती वन्दना निवेदित करी छे.

श्लोक ७८मां शुभकार्यमां पोताने याद करवानी प्रार्थना सुन्दर शब्दोमां प्रगट करी छे. प्रान्ते श्लोक ७९-८० पूज्यश्रीनी कृपादृष्टिनी अने पत्रगत अविनय बदल क्षमानी याचना करी पत्र पूर्ण कर्यो छे.

प्रस्तुत विज्ञप्तिलेखनी नकल अमने वडोदरा - हंसविजयजी जैन ज्ञान-मन्दिरमांथी प्राप्त थई छे. एक मजानी कृति सम्पादन माटे आपवा बदल ते मंण्डळना व्यवस्थापकोनो खूब-खूब आभार ।

---

॥ श्रीदेवकपत्तनात् । उ. श्रीविनयविजयग.लेख ३५ । श्रीपत्तननगरे ॥ पूज्याराध्येय श्रीवर्द्धमानजिनपट्टपरम्परापुरन्ध्रीतिलकश्रीजिनशासनभृङ्गार ॥ श्रीपत्तननगरे ॥ [आ]राध्यतम श्रीतपागच्छाधिराज-भट्टारकश्री २१ श्रीविजय-देवसूरीश्वरचरणकमलान् ॥ ॐ अर्हं नमः ॥ ऐँ नमः ।

सत्थि सिरिकमलिणीगहणदिणणायगं,<br>
नेमिजिणणायगं सिद्धिसुहदायगं ।<br>
यमतिभक्तिस्फुरत्पुलकदन्तुरतनु-<br>
र्नाकिनिकरो नमत्यमलमतिवैभवः ॥१॥

जेण सुहसीलवम्मेण वम्महभडो, जति(झत्ति) मुसुमूरिओ जइवि अइउब्भडो ।<br>
चित्रमिह किमतनोः परिभवे दोष्मता, बलपरीक्षा विलुप्ताऽच्युतास्यत्विषा ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जेण लीलाइ मुहकमलमउलीकओ, छज्जही पंचजणो(ण्णो) मणुण्णज्जुइ ।
द्विड्ध्रुगुद्दण्डदोर्दण्डवीर्योज्झितः, पीयमानो यशःपिण्ड इव वैष्णवः ॥३॥
सुदुसोहीअडिंडीरपिंडुज्जलो, पंचजणो(ण्णो)मुहे जस्स संलग्ग(ग्गि)उ(ओ) ।
सुप्रसन्नोज्ज्वलं वीक्ष्य यस्याऽऽननं, बान्धवेन्दुभ्रमेणोपगूहन्निव ॥८॥
पंचजणं(ण्णं) गहेऊण कोउ(ऊ)हला, जो अकासीअ सद्दाउलं तिहुअणं ।
भव्यसार्थं भवाटव्युपस्थायिनं, सुप्तमिव शिवपुरं गन्तुमुद्बोधयन् ॥५॥
केसवो जेण कीलाइ जुज्जंतओ, लक्खिओ जी(झी)णथामोयमुज्जंतओ ।
मोह इह मूर्त्तिमान् धर्ममुद्यत्तनुं, तुच्छवीर्योऽपि धैर्याज्जिगीषन्निव ॥६॥
जेण मुत्तीइ रत्तेण राईमई, भवणदारंमि काऊण गमणूसवं ।
दक्षिणत्वं स्वतोऽङ्गीकृतं तदुभयोः, प्रीतिमातन्वता गमनपरिवृत्तितः ॥७॥
रायभरिए वि राइ(ई)मईमाणसे, जो न मणयं पि रत्तो चिरं संठिओ ।
युक्तमकषायपाशस्य तद् यदुपते-स्तादृशं वस्त्रमपि भु(भू)विनयं इज्यते ॥८॥
जस्स मुहपुण(ण्ण)ससिचंदिमासंगओ, ज(झ)त्ति राईमईपिम्मरससायरो ।
अलभतोद्वेलता(तां) युक्तमे(मि)दमद्भुत(तं), भेजुरस्या मुखाक्ष्यम्बुजानि श्रियम् ॥९॥
लोअणा दोवि राईमईपेसिआ, मयणदूअव्व रइतत्तसंदेसिआ ।
यस्य हृदये न वासप्रवेशे स्फुरद्-गुप्तिगुप्ते बलाराल्य(त् प)रावर्तताम् ॥१०॥
दंसणे जस्स रइरत्तराईमई-देहदेसंमि पुलयंकुरा ओसिआ ।
येन हृदयप्रविष्ठे(ष्टे)न बृंहीयसा निरवकाशाः प्रणुन्ना इवेयुर्बहिः ॥११॥
मोहसुत्ताण सत्ताण पडिबोहओ, तहवि राईमईनयणमणमोहओ ।
अद्भुतं यश्च घनकज्जलश्यामल-स्तदपि शरदिन्दुशतगौरलेश्यः प्रभुः ॥१२॥
विणयपणयसीसाऽसेसदेविंद[विंद]-प्पयडमउडहीरंकु(कू)ररस्सीमणुन्नं ।
त्रिभुवनगुरुमिष्टं तं प्रदत्तार्हतेष्टं, सकलगुणगरिष्ठं **नेमिनाथं** प्रणम्य ॥१३॥

॥ इति श्रीजिनवर्णनम् ॥

अथ नगरवर्णनम् –

*विणिम्मियं जं विहिणा सवाणियं, सरं व निच्चं पउमाभिरामं ।*
सराजहंसं समवाप्तजीवनै-रनेकलोकैर्विहितप्रशंसम् ॥१४॥
विणिम्मिउं जं णयरं खु मण्णिमो, ठाही विही केसवनाहिपीढे ।
निरीक्षितुं तज्जठरेऽमरावतीं विलोक्य शिल्पं हि करोति शिल्पी ॥१५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अणेगवण्णं सुपयत्थसत्थं, संपत्तपत्तं ससिलोगवग्गं ।
यद् राजते दक्षनिरीक्षणीयं, प्रशस्तियुक् पुस्तकवत् प्रशस्तम् ॥१६॥
जत्थत्थि वप्पो विलसंतदप्पो, दुप्पिच्छरूवो विसमप्पयारो ।
महानिधानं नगरे समन्ता-दावेष्ट्य तिष्ठन्निव सर्पराजः ॥१७॥
सया अगाहा विमलप्पवाहा, गंगुव्व जंसि फलिहा विहाइ ।
मन्ये हिमाद्रिं समवेत्य दुर्गं, प्रीत्या पितुस्तं ध्रुवमाल(लि)लिङ्ग ॥१८॥
रेहंति जत्थ भवणा य महावणा य, अंतो दुवे बहि हुइज्ज पवालसाला ।
सन्मानवानि सुमनोरुचिराणि किन्तु वर्णाधिकान्यविटपानि किलान्तराणि ॥१९॥
लच्छीहरं ससिरिवच्छमलद्धपारं, कंदप्पकेलिकलिअं ललिअंगणं च ।
एकैकमिभ्यसदनं शतबिन्दुवक्षः-शोभां बिभर्त्ति किल यत्र पुरावतंसे ॥२०॥
चित्तावे(व)चित्तसुहसद्दसमुब्भवेहिं, लोगोवयारनिउणत्थपसत्थमज्जा ।
प्रासाददीप्तिपरिभूततमा विभाति, या प्रक्रियेव वरवीरबलोरुवृत्तिः ॥२१॥
जं रेहए जिणहरेहिं(हि) मणोहरेहिं, उत्तुंगचंगसिहरेहिं(हि) पहासुरेहिं ।
मन्ये विजित्य धनदामृतभुक्पुराणि, सन्त्याजितैर्मणिमयैर्मुकुटैरिवोच्चैः ॥२२॥
जीसे निरिक्खिअ रमं परमं खु मण्णे, मंदक्खमक्खणविलक्खमुही विसन्ना ।
यत्रोन्नतेभ्यसदनध्वजतर्जिता च, लङ्का सुवर्णनिचिताऽपि पपात वार्द्धौ ॥२३॥
संकप्पकप्पतरुणो पउरा जुआणा, दीसंति जत्थ जुसिआ बहुमग्गणेहिं ।
नार्योऽप्यनुभ्रमदनङ्गपदाजिदण्ड-खण्डीकृताङ्गिमनसः शतशो लसन्ति ॥२४॥
सिरिमंते तत्थ पुरे, पभूअमणि-कणग-रयणपडिहत्थे ।
श्रीपूज्यचरणपङ्कज-परागतिलकितमहीमहिले ॥२५॥
उत्तुंगभवणवलही-सुलहीकयरयणि(णि)कंततणुफरिसे ।
**श्रीमत्पत्तननगरे, गुर्जर**नीवृत्तिलकतुल्ये ॥२६॥
जत्थ जिणेसरमंदिर-सुंदरसियकल[स]कंतिपंतीहिं ।
उदितोऽपि निशि सितांशु-र्निर्णेतुं शक्यते नैव ॥२७॥
सड्ढा(ड्ढा) जत्थ सभज्जा, अणवज्जा धम्मकज्जउज्जुत्ता ।
दक्षा न्यक्षगुणाढ्या वीक्ष्यन्ते यक्षपतिविभवाः ॥२८॥
जत्थ जिणेसरधम्मो रम्मो सम्मत्तनाणचरणेहिं ।
विलसति सचिवपुरोहित-परिबर्हो नृपतिरिव निपुणः ॥२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिरि**पासणाह**पमुहा जिणेसरा जत्थ निच्चसुपसन्ना ।
पिप्रति सकलाभीष्टं, भव्यानां भक्तिभव्यानाम् ॥३०॥
जत्थ लवणोअलहरी-पिच्छणगमह(हो)सवाइं पिच्छंति ।
जम्बूद्वीपजगत्यामिव देवा दुर्गशिरसि जनाः ॥३१॥
जत्थुल्लसिरतरंगो जलही गज्जंतवेलपडुपडहो ।
सुप्रातिवेश्मिकाप्ति-प्रमदादुत्सवमिवाऽऽतनुते ॥३२॥
वीरजिणं(णिं)दपरंपर-रत्तासयसद्ध(ड्ढ)सड्ढि(ड्ढी)संघट्टा ।
**श्रीमद्देवकपत्तन**-नगरान् नगराजवसुविभवात् ॥३३॥
हरिसरसवसुल्लसिर-प्पभूअरोमंचकंचुआइन्नो ।
घटितकरद्वयसम्पुट-सण्टङ्कितपटुललाटतटः ॥३४॥
उल्लासवासवासिअ-चित्तो अइदित्तपणयपब्भारो ।
समुदितविनयोत्कण्ठः, सविशेषोन्मिषितभक्तिभरः ॥३५॥
छव्वणनयणपउम-प्पसिआवत्तेहिं वंदिऊण सिसू ।
**विनयविजया**भिधानो विज्ञपयत्युचितविज्ञप्तिम् ॥३६॥
किच्चं जमिह परूढे दिवायरे तिमिरजलहिकुंभसुए ।
पद्मवने च विबुधे सस्पर्द्धमिवाऽङ्गिनेत्रगणैः ॥३७॥
मइलं मइलणसीलं निम्मेरं सुद्धमग्गआवरणं ।
हन्तुमिव तमस्तरणौ रुषाणे दिक्षु विततकरे ॥३८॥
इब्भाइन्नसभाए बहुलपभाए सया सुहम्माए ।
स्वाध्यायेऽ**न्त्यषडङ्गीं** विवृणोम्यङ्गं **द्वितीय**मर्थाच्च ॥३९॥ गीतिः ॥
पढण-पढावण-सोहण-विरयण-लिहणाइएसु गंथाणं ।
पूजाप्रभावनादिषु कार्येऽथाऽऽर्येषु च भवत्सु ॥४०॥
कालकमेणं पत्ते भद्दवए मासि भव्वमद्दमए ।
श्रीपर्युषणपर्वा-ऽनेकसुपर्वार्चितमुपेतम् ॥४१॥
तच्च - मासखवणाइदुक्कर-तवचरणं धम्मकज्जसंभरणं ।
सप्तदशभेदपूजा-विरचनमप्यर्हदर्चानाम् ॥४२॥
बारसदिणाणि जीवा-भयदाणुग्घोसणं सपुरगामे ।
याचकयाचितवितरण-मपराधक्षमणकं च मिथः ॥४३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कप्पिअकप्पतरूवम-**सिरिकप्पसुअस्स** वित्तिवक्खाणं ।
नवभिः क्षणैर्विशिष्ट-प्रभावनैः क्षणशतोपचितैः ॥४४॥
नच्चंतनडं गायंतगुणिजणं विविहसज्जियाउज्जं ।
स्थाने स्थाने जिन-गुरु-गुणगाथकदीयमानधनम् ॥४५॥
एवं परिवाडीए, जिणहरगमणं पभाविअसतित्थं ।
सांवत्सरिकावश्यक-करणं भवभूरिभयहरणम् ॥४६॥
खंड-पुड-सिरिफलाईहिं, पभावणं भावभावणारम्मं ।
अतिमधुरभोज्यभक्त्या, साधर्मिकभोषणं(भोजनं?) भक्त्या ॥४७॥
इच्चाइधम्मकज्जु-ज्जोइयजिणसासणं विगयविग्घं ।
इह वेलाकूलेऽपि च, विहितं पूज्यप्रसादेन ॥४८॥
जो इंदो सहइ मुणीण सुद्धपणो(ण्णो), संपणो(ण्णो) विअसिअपुण्णसेवहीहिं ।
सानन्दं नमदमितक्षितीशमाला-कोटीरच्युतकुसुमावतंसितांह्रिः ॥४९॥
जस्संगे सहइ सया गुणाण वग्गो, नीसेसो निरुवमठाणलद्धसोहो ।
युक्तं तन् मणिनिकरः क्षितीश्वराणां, गेहस्थः श्रियमतुलां यतो लभेत ॥५०॥
कल्लाणुन्नतिकलिओ सुभद्दसाली, सव्वुच्चो वरथिरसाहनंदणो व ।
यः स्वामी भुवि विदितः क्षमाधराणां, भूलोके जयति सुवर्णशैलबन्धुः ॥५१॥
कंदप्पो पयडभुअप्पयावदप्पो निम्मूलं हाणिअहराइगव्ववप्पो ।
येनोग्रश्रुतकरवालकृत(त्त)कण्ठः क्ष्मादी(पी)ठोल्लुठेत(ठत्)तनुः क्षणेन जज्ञे ॥५२॥
कोहग्गि(ग्गी)जणअवयारबद्धकच्छो, दुप्पिच्छो महिअसुरासुरिंदविंदो ।
यस्याऽशु प्रशममहाब्दवृष्टिपातै-रिङ्गालापश(स)ददशामवाप्य नष्टः ॥५३॥
दुग्गज्झो सुकयविपक्खमाणहत्थी, उम्मत्तो सुकयतरूणि संहरंतो ।
यस्योद्यत्तममृदुताचपेटया द्राग्, निर्भिन्नः शुभमतिमौक्तिकान्यसूत ॥५४॥
कवडगरलवल्लरी परूढा, भुवणजणचेअणं [सं]हरंती ।
विकटकटुफला बलाद् विमूला, व्यरचि केन महार्जवायुधेन?(?) ॥५५॥
असुहमइतरंगिणाण कत्तो, तुरियकसायमहो अहा पुरत्तो ।
इय कलशसुतनयेन नुन्न-श्चुलुकदशां प्रतिपद्य हन्त! जीर्णः ॥५६॥
असमपसमनीरसारणीहिं, सुकयतरू तह जेण सुट्ठु सित्तो ।
विविधसुखफलैः पफाल यस्य, प्रसृतयशःकुसुमैर्दिशोऽप्यऽनर्घ्याः ॥५७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिणयरउदयम्मि भत्तिजुत्ता, पयजुयलं सुगुरुस्स जे नमंति ।
प्रणयरसवशंवदा सहेलं, हरिहरिणीदृगिमं वरं वृणीते ॥५८॥
जमिह सुरवरा फुसंति भूमिं गुणदि --- कयावि तं खु मणे(ण्णे?) ।
यदुरुचरणरेणुपुटमेध्या-मतिसम्भावितगौरवं विदन्तः ॥५९॥
तेसिं सिरिपुज्जाणं, संपत्तासेससाहुरज्जाणं ।
विलसत्प्रसादपत्रं, समभिलषत्येष शिशुलेशः ॥६०॥
तम्हा पउरपसायं, सम्मं धरिऊण सेवगस्सुवरिं ।
स्वाङ्ग-परिच्छदकुशल-प्रवृत्तिपीयूषजलदेन ॥६१॥
लेहेण पेसिएणं कायव्वा सीसचित्तसंतुट्ठी ।
न हि सारङ्गं सुखयितु-मलमन्यो जलधरात् कोऽपि ॥६२॥ [युग्मम्]?
[श्लोक ६३ मूळ प्रतमां नथी.]
उववेणवं पणामो, को(का)यव्वो चित्तगोअरे मज्झ ।
बालस्याऽपि गरिष्ठै-र्नमदमितनरेन्द्रततिभिरपि ॥६४॥
किञ्च – अइसयबुद्धिसमिद्धा, सुपसिद्धा **रिद्धिविजय**वरविबुहा ।
पण्डित**विनीतविजयाः**, सचिवोत्तंसा महासुधियः ॥६५॥
सिरि**संतिविजय**विबुहा, बुद्धी(द्धि)पहाणाय महापहाणाय ।
श्री**अमरविजय**विबुधा विबुधाः श्री**रामविजया**ख्याः ॥६६॥
**कप्पूरविजय**विबुहा पसरिअकप्पूरसुरहिजसपसरा ।
सुमतिततिग्रामण्यो, विबुधाः **श्रीमतिविजय**सञ्ज्ञाः ॥६७॥
**नयविजया**भिहविबुहा गुरुसेवामुणिअसयलणयविणया ।
सुगृहीतनामधेया(याः) परेऽपि ये मुनिवरास्तत्र ॥६८॥
तेसिं सिरिगुरुसेवा-रेवासलिलाइकुंजरवराणं ।
अनुवन्दना मदीया, प्रसादनीया प्रसादार्हैः ॥६९॥
एत्थ गणि**कणयविजया** स**नेमिविजया य रयणविजया य** ।
मुनि**रुदयविजय**सञ्ज्ञ-स्तथा मुनी **रूपविजयाख्यः** ॥७०॥
एएसिं साहूणं तिण्हं तह साहुणीण पइदियहं ।
प्रणतिरवधारणीया कृतप्रसादैः परमगुरुभिः ॥७१॥
**जयविजय**णामधेज्जा, **वेलाउल**बंदिरे ठिआ विबुहा ।
**अमरविजयेन** मुनिना, युक्ता मुनि**वृद्धिविजयेन** ॥७२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वणथलि**कयचउमासा, गणिणो जे **कंतिविजय**णामेण ।
**ऋषिभारमल्ल**सहिता-स्तथा **धुराजीपुरे** ये च ॥७३॥
**जिणविजय**क्खा गणिणो, **कुंअरविजयेण पिम्मविजयेण** ।
युक्ता इति ये यत्र स्थिता व्रतस्थाश्चतुर्मासीम् ॥७४॥
ते तत्थ सुहमणुट्ठिअ-पज्जोसवणाई(इ)विविहसुअजोआ ।
प्रणमन्ति विनयविनताः, श्रीगुरुचरणान् भुवनशरणान् ॥७५॥
अवि इत्थ सड्ढसड्ढी-संघो सयलो वि नमइ गुरुचरणे ।
श्री**वीर**पट्टवीथी-कल्पद्रुमसमगुरुप्रह्वः ॥७६॥
अइ(ह?)मित्थ पददिणं चिय सिरिगुरुसमहिट्ठिएण हियएण ।
प्रणमामि जिनाधीशां-**श्चन्द्रप्रभ-नेमि-वीरा**दीन् ॥७७॥
तुम्हाणं मारिसया सीसा बहुआ वि पज्जुवासंति ।
अयमपि शिशुस्तथाऽपि स्मर्तव्योऽर्हत्प्रणामादौ ॥७८॥
जइ वि सिसू सिसुचिट्ठो, अणासवो तह वि होइ अणुगिज्झो ।
सततं स्वीयगुरूणा-मकृत्रिमस्नेहशुचिमनसाम् ॥७९॥
तम्हा मह बालत्तं, कहं पी(पि) अवहीरिऊण सुगुरूहिं ।
अवधार्या भूरिकृपा नृपावलीप्रणतपदकमलैः ॥८०॥
लिहिअं किंचि असुद्धं जं(ज)मिह मए मउअमइपयासेण ।
क्षन्तव्यं तद्गुरुभिः सुरभियशोवासितदिगन्तैः ॥८१॥
**आसोअबहुल**पक्खे धण्णाए **धणतेरसी**इ दिणे ।
**विनयेन** निजगुरूणां लिखिता विज्ञप्तिरिति भद्रम् ॥८२॥ श्रीः ॥ छः ॥

—*—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( ४ )

# महिशानकनगराद् अज्ञातकविलिखिता आनन्दविज्ञप्तिः

**– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय**

५७ श्लोकप्रमाण प्रस्तुत कृति **महिशानक( महेसाणा )**नगरथी लखायेल पत्र छे. पत्र-लेखनस्थलसिवाय ते कया गुरुभगवन्तने? क्यारे? कया नगरे? कोणे? लख्यो छे ते माहिती कृतिमां प्राप्त थती नथी. **आनन्दविज्ञप्ति** नामाभिधान पाछळनुं कोई कारण पण स्पष्ट जाणवा मळतुं नथी. कदाच कृतिकारनुं नाम कृतिना नाम साथे जोडायेलुं होय! कृतिगत समानविभक्तिवाळा धाराबद्ध ९९ विशेषणोनो अने ३२ श्लिष्ट विशेषणोनो प्रयोग सहृदय वाचकने आनन्द आपी पोताना (कृतिना) 'आनन्दविज्ञप्ति' अभिधानने सार्थक तो करे ज छे.

सम्पूर्ण कृतिनुं अवलोकन कर्या बाद कृतिसार आपवो होय तो मात्र एटलुं ज जणावी शकाय के – 'कर्त्ताना चित्तमां वर्ततो पोताना गुरुभगवन्त प्रत्येनो अनन्य भक्तिभाव काव्यस्वरूपे अहीं प्रगट थयो छे.'

कृतिमां गुरुभगवन्त माटे कर्त्ताए प्रयोजेला – 'जिनमतचैत्योरुकेतु, त्रिजगज्जनजित्वरतरमन्मथमथनैकपाद, धर्मगृहावष्टम्भस्तम्भ, सन्मार्गप्रकटनप्रदीप, सुविहित-मुनिशिरोवतंस, सन्मानससन्मानसवासविलासैकराजहंस' जेवा विशेषण – प्रयोगो खूब हृदयङ्गम छे.

ते ज रीते हरि शब्दना शिव, ब्रह्मा, विष्णु, यम, सूर्य, चन्द्र, इन्द्र, प्रकाश, पवन, मनुष्य, मोर वगेरे अर्थ करी करेली तुलनाओ पण मजानी छे.

प्रान्ते पूर्वपत्र लख्यानी जाण करी, सहवर्ती साधुओना कुशल समाचार जणावी, स्वस्वास्थ्यसमाचार-हितशिक्षा-स्वस्वोचित कार्य जणावनार प्रतिपत्रनी आकाङ्क्षा प्रगट करी पूज्यश्रीनी निश्रामां रहेल साधु-साध्वीजीओने वन्दनादि निवेदन करी पत्र पूर्ण कर्यो छे.

पत्र पूर्ण थया पछी शेष रहेल जग्यामां आशीर्वादसम्बन्धी ३ श्लोको छे. कृतिमां केटलाक स्थळे टिप्पणो करी छे जे अहीं कृतिना अन्ते मूकी छे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पत्रगत पद्यो स्रग्धरा, शार्दूल०, शिखरिणी समेत विविध छन्दोमां रचायां छे.

वडोदरा-श्रीकान्तिविजयजी शास्त्रसङ्ग्रहमांथी अमने प्रस्तुत कृतिनी नकल प्राप्त थई छे. ते बदल ज्ञानभण्डारना व्यवस्थापकोनो अमे हार्दिक आभार मानीए छीए.

* * *

॥ ८० ॥ श्रीगुरुभ्यो नमः ॥ ऐँ नमः ॥

**पार्श्वं** पार्श्वप्रणुतं, प्रणिपत्य निरत्यैकविज्ञानम्(?) ।
शिष्यः पद्यरचनया, रचयत्या**नन्दविज्ञप्तिम्** ॥१॥
श्रीप्रभुपादपदाम्भो-जन्मरजोभिः पवित्रिते तत्र ।
श्री**महिशानक**नगरान्-नगराजमनोहरविहारात् ॥२॥
श्रीमत्प्रभुपादानां, हितानुशासनसुधानुवादानाम् ।
निरुपमविशारदानां, बुद्धिलतावृद्धिकन्दानाम्[१] ॥३॥
धर्मद्रुमजलदानां, वादविनिर्जितकुवादिवृन्दानाम् ।
त्यक्ततरार्ष्टमदानां, सुनिरवसादप्रसादानाम् ॥४॥
जगतीजीवातूनां, मोचितमिथ्यात्वभव्यजन्तूनाम् ।
भववारिधिसेतूनां, जिनमतचैत्योरुकेतूनाम् ॥५॥
उपशमरससिन्धूनां[३], निष्कारणविश्वविश्वबन्धूनाम् ।
संविज्जलसिन्धूनां[४], मुख्यानामखिलसाधूनाम् ॥६॥
सर्वज्ञसर्ववाङ्मय-सारपरिज्ञानकोशधनदानाम् ।
भवतापतापितानां, विश्रामच्छायफलदानाम् ॥७॥
जयवादि-प्रतिवादि-स्वा(श्वा)पदमदनाशसिंहनादानाम् ।
भुवनाप्यायकवचनै-र्विधुरीकृतवंशनादानाम् ॥८॥
नवकल्पविहारेणाऽखिलभूतलपावनैकपादानाम् ।
त्रिजगज्जनजित्वरतर-मन्मथमथनैकपादानाम् ॥९॥
लोकत्रयप्रकाशन-कलयाऽल्पीकृतसहस्रपादानाम् ।
समयाम्बुधिवृद्धिकृते, पार्वणपीयूषपादानाम् ॥१०॥

---

१. 'मेघः' इत्यर्थः । २. 'बोधिः' इति वा । ३. 'नदी' इत्यर्थः । ४. 'समुद्रः' इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिष्यजनमनःकामित-दानां हेलाहतप्रमादानाम् ।
सकलक्षितितलसुरभी-कारितरश्लोककुन्दानाम् ॥११॥
पुण्योपदेशपेशल-वचनकलानिर्मितप्रमोदानाम् ।
विद्यानदीनदानां, श्रीमच्छ्रीपूज्यपादानाम् ॥१२॥
मोहभटोत्कटकैटभ-निर्द्धाटनविकटसोमसिन्धूनाम् ।
भविकभविविमलकमला-कमलावलिकमलबन्धूनाम् ॥१३॥
बहिरबहिररिसमापन-केतूनां सर्वशर्महेतूनाम् ।
संसारविषयविषये-न्धनदाहे धूमकेतूनाम् ॥१४॥
उपशमरसाम्भसां वर-कुम्भानां जन्मतो विदम्भानाम् ।
सुमनोमनोमनोरम-कामार्पणकामकुम्भानाम् ॥१५॥
त्यक्ततरारम्भानां, हृदयस्वऽविकारकारिरम्भानाम् ।
धर्मगृहावष्टम्भ-स्तम्भानां विगतदम्भानाम् ॥१६॥
विबुधाधिपत्यपदवी-प्रौढप्रासादहेमकुम्भानाम् ।
विनयादिगुणानुचरी-कृततरवरशातकुम्भानाम् ॥१७॥
सारस्वतरत्नाकर-पारप्रापणसुकर्णधाराणाम् ।
**श्रीचन्द्रगणप्रासाद**-सूत्रणासूत्रधाराणाम् ॥१८॥
भव्यमनोऽवनिमेधा-वीरुधधाराधरैकधाराणाम् ।
सर्वगुणाधाराणां, मायालतिकासिधाराणाम् ॥१९॥
घनसारतरयशोघन-सारैः सुरभीकृतत्रिलोकानाम् ।
सुवचनरचनारञ्जन-विषयीकृतसर्वलोकानाम् ॥२०॥
निजचरणच्छायाश्रित-जनतृष्णाहरणलसदशोकानाम् ।
निरुपमतमसंमसमय(?)-लोकानां विगतशोकानाम् ॥२१॥
निजनिर्जरतरगोभर-प्रमोदितानेकलोककोकानाम् ।
आलोकादपि लोका-तिशायिसुखदाय्यलीकानाम् ॥२२॥
अद्भुततरत्रिभुवन-सेचनकोदाररूपधेयानाम् ।
आश्चर्यकारिविश्वा-तिशायितरभागधेयानाम् ॥२३॥
मन्त्रवदशेषजनता-चित्ते हितदायिनामधेयानाम् ।
जगदभ्यवापिमहिमा-गरिमादिगुणैरमेयानाम् ॥२४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भक्तिपुरस्सरमधुर-स्वरनरनारीगुणौघगेयानाम् ।
धर्मधुरां धौरेय-व्युत्पन्नोत्तमविनेयानाम् ॥२५॥
भवजलधिद्वीपानां, सन्मार्गप्रकटनप्रदीपानाम् ।
प्रणताखिलभूपानां, पुण्याङ्कुरलसदनूपानाम् ॥२६॥
ज्ञानोदककूपानां, विस्मयकृन्निस्समानरूपाना(णा)म् ।
गुणनिष्प्रतिरूपानां(णां) तनुरुचिजितजातरूपाना(णा)म् ॥२७॥
निरुपमस(श)मभावानां, जगतीजनतोत्तमस्वभावानाम् ।
विदिताखिलभावानां, विश्वव्यापिप्रभावानाम् ॥२८॥
कविसुविहितशंसानां, सुविहितमुनिवरशिरोवतंसानाम् ।
हरिवन् निर्घाटिततर-दुर्द्धरसंसारकंसानाम् ॥२९॥
सन्मानससन्मानस-वासविलासैकराजहंसानाम् ।
विशदयशस्तेज:श्री-निर्जिततरराजहंसानाम् ॥३०॥
पदनम्रनरेन्द्राणां, गाम्भीर्याद्यनणुगुणसमुद्राणाम् ।
निजवचनोपन्यासैः, प्रदत्तपरवादिमुद्राणाम् ॥३१॥
भविकैरवचन्द्राणां, मोहमहीधरभिदासुरेन्द्राणाम् ।
पुण्यविधेयविधानो-पदेशविधौ वितन्द्राणाम् ॥३२॥
अप्रतिरूपप्रतिभा-प्राग्भारोपहसितैकजीवानाम् ।
मैत्रीभावप्रापित-सूक्ष्मेतरसर्वजीवानाम् ॥३३॥
सारस्वतसारस्वत-रहस्यनीरावगाहमेरूणाम् ।
ज्ञानादिगुणखगानां, विलसनविलसन्नमेरूणाम्[५] ॥३४॥
अभ्यन्तरवैरिभर-स्थामतिरस्कारसुप्रचण्डानाम् ।
सुप्रणिधानानाश्रित-मनोवचस्कायदण्डानाम् ॥३५॥
ब्रह्माण्डमण्डपश्री-मण्डनसर्पद्यशोवितानानाम् ।
त्रिभुवनजनताचिन्ता-तिथार्ग(तीतार्थ?)दानैकतानानाम् ॥३६॥
आयुष्मतां शुभवतां, भवतां प्रतिभावताम् ।
श्रीमतां विदिताङ्गादि-जिनागमसरस्वताम् ॥३७॥
लेखः शेषः किमेष प्रविलसदसमाकारसद्वर्णशाली?,
ज्योतिर्माली किमूद्यत्सहृदयहृदयाम्भोरुहोल्लासनेशः? ।

(५) 'वृक्ष' इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं वाऽसौ शर्वरीशस्त्रिभुवननयनानन्ददानैकतानः?,
सज्ञानः श्रीप्रधानः किमयमसदृशः शारदासारकोशः? ॥१॥ [३८]
अपूर्वकागदोपेतः, स्फुरदङ्कश्रियाऽऽश्रितः ।
अस्तोकश्लोकलक्ष्मीकः, साक्षात्पुण्यसुदर्शनः ॥२॥ [॥३९॥]
कुमोदकः प्रसादाशी-र्वादः श्रीनादसुन्दरः ।
चित्रमत्र परं लोके, कदाचिन्न जनार्दनः ॥३॥ युग्मम् ॥ [॥४०॥]
हरिरिव विबुधानन्दी, हरिरिव सम्प्रकटपुण्यदानश्रीः ।
हरिरिव सत्कवितायुग्, हरिरिव जगतां विनोदकरः ॥४॥ [॥४१॥]
हरिरिव संवरविभवः, हरिरिव विषयापहाक्षरमणिधरः ।
हरिरिव रजौघहरणो, हरिरिव विनयादिगुणधारी ॥५॥ [॥४२॥]
हरिरिव तमोविनाशी, हरिरिव जातिस्मृतो[६] विबोधमयः ।
हरिरिव सुपदन्यासो, हरिरिव सुमनोम्बुजोल्लासी ॥६॥ [॥४३॥]
हरिरिव गिरीशनन्दी, हरिरिव दुर्वादिकोकशोककरः ।
हरिरिव चित्रे सुषमी, हरिरिव परदर्पसर्पनाशकरः ॥७॥ [॥४४॥]
हरिरिव सुरसार्थयुतो, हरिरिव विलसन्महश्चि(श्रि)या परमः ।
हरिरिव कुमोदकोऽयं, हरिरिव निःप्रति[म]रूपाभः ॥८॥ [॥४५॥]
हरिरिव विमलतररुचि-र्हरिरिव वरशीलभावनाकलितः ।
हरिरिव शितितरवर्णो हरिरिव वृषभासनः सततम् ॥९॥ [॥४६॥]
हरिरिव परिणाहधरो हरिरिव सन्मानसाब्धिवासः- ।
हरिरिव विदुषामिष्टो हरिरिव जाड्यापहारपरः ॥१०॥ [॥४७॥]
[७]हरिरिव नयनोल्लासी, [८]हरिरिव दुर्बोधसंहरणशीलः ।
[९]हरिरिव बहुलोहमयः, हरिरिव गुप्तार्थसार्थोऽयम् ॥११॥ [॥४८॥]
[१०]प्राप प्रसादपूर्वाशी-र्वादो हृद्यपद्यगद्यौघः ।
परिवारेण समं मां, प्रपञ्चयन् प्राञ्चदानन्तम् ॥१२॥ [॥४९॥]

अष्टचत्वारिंशद्भिः कुलकम् ॥

निर्मापितमहजातं, श्रीपर्वाऽत्राऽप्यपूर्वमिहजातम् ।
तदवसरे प्रहितं, तत्स्वरूपमस्माभिरत्रत्यम् ॥१३॥ [॥५०॥]

---

६. 'परभवे जातिं स्मरिष्यति इति क्विपि, तस्य' इति । ७. 'अञ्जनम्' ८. 'धर्मः' इत्यर्थः । ९. 'खड्गः' इत्यर्थः । १०. 'श्रीपर्वपूर्वा' इति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'तद् विज्ञ प्रागपि शिष्येण प्राभृतीचक्रे' इति वोत्तरार्द्धम् ।
वरिवर्त्ति समाधानं, समं च सङ्घेन मेऽत्र सर्वत्र ।
देव-गुरुनाममन्त्र-स्फुटसंस्मरणानुभागेन ॥१४॥ [॥५१॥]
पूर्वारम्भितभाणन-गुणनादिपराः शुभंयवः श्रमणाः ।
सर्वा अपि च श्रमणा, धर्मसमाराधनप्रवणाः ॥१५॥ [॥५२॥]
'श्रीमत्प्रभुपादानां प्रसादतः सुप्रसादानाम्' इति वा ।
श्रीमद्भिस्तत्रत्यं, स्ववपुः-परिवारसम्भवं श्रेयः ।
मदुचितकार्यादियुतं, ज्ञाप्यं मेऽत्र प्रमोदाय ॥१६॥ [॥५३॥]
श्रीवन्द्यैस्तत्रत्यं - - - - - - - - - - - - ।
शिक्षोचितहितशिक्षा-युतं प्रसद्यं प्रसाद्य मे ॥१७॥ [॥५४॥]
गुणगणमणिसिन्धूनां, सन्मानसपद्मपद्मबन्धूनाम् ।
निष्कारणजगतीजन-बन्धूनां सर्वसाधूनाम् ॥१८॥ [॥५५॥]
शीलादिगुणैरखिलैः, साध्वीनां तत्र सकलसाध्वीनाम् ।
ज्ञाप्याऽनुवन्दना मे, सानन्दप्रणयबहुमानम् ॥१९॥ [॥५६॥]
अत्रत्या अपि यत्या-दयः समस्ताः सभक्तिसाध्व्यश्च ।
श्राद्धा श्राद्ध्यश्च सदा वन्दन्ते श्रीमतो भद्रम् ॥२०॥ श्री ॥ [॥५७॥]

* * *

गोष्ठ्यामुद्वेष्ट्यमानः सजलजलदवत् संवरश्रेणिमाविः-
कुर्वाणः पुण्यबद्धोन्नतिरतिनयनानन्ददानप्रवीणः ।
आशीर्वादः प्रसादात् प्रमदभरकरेन्दीवरश्यामवर्ण-
श्चित्रं पङ्कापहारी प्रकटितसकलक्षोणिनानातपश्रीः ॥१॥
प्रसादाशीर्वादो द्विरदवदयं प्राप्त इह मे,
प्रमोदाद्वे(द्वै)तायाऽजनि जनसमाजेन महता ।
स्फुटं नानादानप्रकटनपटुः श्रीगुरुकर-
प्रतिष्ठासम्प्राप्तः प्रवरबहुलोहैः परजयी ॥२॥
शिष्योपरि प्रभूणां, हितवात्सल्यामृतप्रवाह इव ।
मूर्तिमदानन्द इवा-ऽऽन्तरप्रसादानुवाद इव ॥३॥ [युग्मम्]

—x—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ( ५ )
# श्रीविजयप्रभसूरिणा देवकपत्तनात् प्रेषितं प्रसादपत्रम्

– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय

गच्छनायकने के पोतानाथी वडील (पर्यायवृद्ध) गुरुभगवन्तने लखेल पत्रना प्रत्युत्तर स्वरूपे ए पूज्यो द्वारा जे प्रतिपत्र लखवामां आवे ते प्रसादपत्र. विज्ञप्तिपत्रोनी माफक आवा पत्रो पण रसाळ शैलीमां लखायेला होय छे. ऐतिहासिक विगतो पण क्यारेक तेमां वणायेल होय छे.

प्रस्तुत पत्र **विजयप्रभसूरि**जीए **देवकपत्तन**थी कोना उपर कया नगरे लख्यो छे तेनी नोंध कृतिमां क्यांय नथी. परन्तु अनुसन्धान-६०, विज्ञप्तिपत्र विशेषाङ्क, खण्ड-१मां छपायेल विबुध **नयविजयजीए जावालथी देवकपत्तन विजयप्रभसूरिजीने** लखेल विज्ञप्तिपत्रनी संवत् अने ते समये **विजयप्रभसूरिजी**नी निश्रामां रहेल साधुवृन्दनां नामो प्रस्तुत पत्रमां समान छे. तेथी प्रस्तुत पत्र जावाल नगरे विबुध **नयविजयजीने** लखायो हशे तेम जणाय छे. अथवा, ए ज पुस्तकमां छपायेल पण्डित हीरविमलजीए **साहित्यपुर**थी लखेल विज्ञप्तिपत्रना प्रत्युत्तर रूपे प्रस्तुत पत्र लखायो होय तेवी शक्यता पण नकारी न शकाय.

प्रस्तुत पत्रनो महत्तम अंश (खण्ड) जिननमस्कारमां ज रोकायेलो छे. कर्त्ताए १६ पद्योथी **श्रीपार्श्वनाथ** भगवाननी स्तुति करी पुनः गद्यखण्डमां **श्रीदादापार्श्वनाथ** भगवानने वन्दना करी छे.

जिननमस्कार पछी प्रातः व्याख्यानसभा-चातुर्मासिक आराधना-पर्युषणपर्व आराधनानुं वर्णन कर्युं छे. आ खण्डमां 'श्रीपञ्चमाङ्ग-द्विगुणितपञ्चमाङ्गसूत्रवृत्त्यनुक्रमप्रथमद्वितीयमण्डलीमण्डन' शब्द सूत्रमाण्डलीमां पञ्चमाङ्ग **श्रीभगवती सूत्र** अने अर्थमाण्डलीमां दशमाङ्ग **श्रीप्रश्नव्याकरणसूत्रवृत्ति**ना स्वाध्याय अर्थे प्रयोजायो छे. ते ज रीते **'पापिष्ठप्राण्याचीर्णनिकृष्टकर्मवारणपटुपटहोद्घोषण'** जेवा मजाना शब्दप्रयोगो अभयदान-जिनपूजा(महापूजा)-चैत्यपरिपाटी अर्थे प्रयोजाया छे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रान्ते तेमना पूर्वपत्र मळ्यानी नोंध करी, सहवर्ति साधुओना नामोल्लेखपूर्वक वन्दनादि निवेदन करी, सकल संघने धर्मलाभ जणावी, जिनेश्वर भगवन्तने वन्दना करवापूर्वक पत्र पूर्ण कर्यो छे.

प्रस्तुत ग्रन्थनी नकल अमने वडोदरा - हंसविजय जैन ज्ञानमन्दिर तरफथी प्राप्त थइ छे. ते बदल अमे संस्थाना व्यवस्थापकोनो आभार मानीए छीअे ।

------

॥ सं. १७१६ ॥

॥ ८०॥

स्वस्ति श्रियाऽसेवि यदङ्घ्रिपद्मं, सदा प्रफुल्लं प्रणमत्त्रिलोकम् ।
लोकप्रियं **पार्श्व**जिनो जनानां, स पार्श्वपार्श्वो भवताद्धिताय ॥१॥
स्वस्तिश्रियो यस्य पदे पदेऽपि, प्रभोः प्रभावाद् भविनां भवन्ति ।
सद्भाग्ययोगादिव सम्पदस्त-मस्मेय**वामेयजिनं** श्रयामः ॥२॥
स्वस्तिश्रियो यमिह विश्रुतवर्णवादाः, कल्पद्रुमं प्रवरकल्पलता[मि]वोच्चम् ।
सच्चन्द्रिका इव निशाधिपतिं श्रयन्ते, भूयात् समीहितकृते स जिनो जनानाम् ॥३॥
यत्पादपद्मं द्युतिदीप्यमानं निश्छद्मसौन्दर्यगुणैकसद्म ।
साक्षादसेवीत् कमला सदोषं, चन्द्रादिकस्थानमपास्य मङ्क्षु ॥४॥
यदीयपादं विगतप्रमादं, प्रसादपात्रं नतभव्यमात्रम् ।
अभीष्टमन्त्रं शिवसिद्धियन्त्रं, जना भजध्वं जनितप्रमोदम् ॥५॥
वचोऽमृतं यस्य निपीया भव्याः, प्रमोदभव्याःस्त्यक्तपराभिलाषाः ।
सन्तोऽमृतानन्दपदं श्रयन्ते, स्थानं तदेकस्मरणप्रवीणाः ॥६॥
यदीयपादद्वयसन्नखाली चकास्ति दीपावलिकेव दीप्रा ।
तमोपहायाऽङ्गभृतां समन्तात्, स आश्वसेनिर्जयताज्जिनेशः ॥७॥
यत्पादपद्मं नखदीप्तिदीप्तं, नमज्जनानामिव वह्निसाक्षम् ।
व्यनक्ति सिद्धिप्रमदाविवाहं, पायादपायाद् भविनः स **पार्श्वः** ॥८॥
यद्देहभासः परितः स्फुरन्त्यो, विभान्ति नम्राङ्गभृतां शिरस्सु ।
यवप्ररोहा विजयार्थिनां किं, पुष्णातु **पार्श्वः** प्रियमङ्गभाजाम् ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यच्छीर्षसप्तस्फटदम्भतः किं, जैनं वचः सप्तनयीनिगूढम् ।
मन्ये नमल्लोकभयान्तकर्तृ, भूयिष्ठभूत्यै भवतात् स **पार्श्वः** ॥१०॥
मुखेन्दुपीयूषरसैककुण्ड-रक्षाकृते किं सुचिरं फणीन्द्रः ।
यदीयशीर्षे विधिना न्यधायि, **पार्श्वः** प्रभावं प्रथयत्यसङ्ख्यम् ॥११॥
सत्तत्त्वकोटीश्वरताभिमाना-दूद्र्ध्वीकृताः केतुपटाः स्फुरन्तः ।
यस्य स्फटाटोपमिषेण जाने, **पार्श्वः** प्रभुः सिद्धिसमृद्धये स्तात् ॥१२॥
नीलद्युतो यस्य शिरःस्फटाग्र-मणीश्रियो नीरदवार्दलान्तः ।
उद्गच्छदुष्णांशुरुचं दधन्त्यो, मुदं विदध्यादिह **पार्श्वनाथः** ॥१३॥
दूर्वाक्षतांश्चेदनिशं दधीत, दन्तत्विषाराजियदङ्गदीप्तेः ।
साम्यं तदाप्नोतु वृषोपदेशे, **पार्श्व**स्सदा मङ्गलमातनोतु ॥१४॥
यदीयशीर्षे स्फटरत्नभासः, समुच्छिखा विद्रुमकन्दलन्ति ।
सच्चित्रवल्ल्याः किमु पल्लवन्ति, जीव्याच्चिरं **पार्श्वजिनो** जगत्याम् ॥१५॥
चराचरं विश्वमशेषमेवा-ऽमितं प्रमाति प्रतिबिम्ब(म्बि) यस्य ।
चित्रं चिदादर्शतले वलक्षे, सार्वश्चिदानन्दपदं प्रदद्यात् ॥१६॥

तं श्रीमन्तममन्दसम्मदकन्दप्रणमदमरनरवरस्फुरत्तरप्रकटमुकुटकुटनैकरमणीयमणीनिस्सरन्मरीचिशुचिपयोनिचयप्रक्षालितक्रमकमलयमलं सकलकलाधरकरालोकलोकनोत्पन्नहर्षोत्कर्षसमुच्छलदतुच्छस्वच्छक्षीरनीरनिधिलोलकल्लोलप्रचण्डोद्दण्डडिण्डीरपिण्डपाण्डुरास्तोकश्लोककर्पूरपूरसुरभितविश्वविश्ववेश्मान्तरालं फलितफलिनीदलश्यामलकमलकोमलभगवत्कायकमनीयकान्तिकलापामृतकुण्डप्रतिमप्रतिबिम्बोपधिप्रतिदिनतीर्थस्नानकरणोद्भूतप्रभूतनैपुण्यपुण्यप्रचयातिशयसदासम्फुल्लितोत्तुङ्गरङ्गत्कङ्केल्लिसालं जाग्रत्प्रतापतापतापिताशेषसीमालभूपालाश्वसेनाश्वसेनरासनसेनोभयपक्षशुद्धवंशसरसमानससरोवरालङ्कारसारमरालबालं **श्रीदादाभिधपार्श्व**-परमेश्वरनन्दगोपालं प्रणामगोवर्द्धनगिरिशिखरलीलाविलासिनं निर्माय **श्रीदेवक-पत्तनात्** **श्रीविजयप्रभसूरिभिः** सबहुमानमालाप्यते –

यथेहकार्यं प्रातः गगनैकमन्दिराभ्यन्तरावस्थानतरुणतेजस्विजनासहनीयविविधविरुद्धाचरणप्रवणनिशाधिराजसमग्राधिकारनैकखण्डीकरणविकुर्वितकोपाटोपारक्तसहस्रंकरनिकरे क्षपितनिपीतकरिकपोलमूलमदमत्तमधुकरनिकरसमतमोभरे सम्प्राप्तोदयगिरिशिखरसिंहासनाधिपत्येन्दिरे श्रीदिनकरमण्डले सति जीवाजीवादितत्त्व-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विचारचतुरधर्मकर्मालङ्कर्मीणकृतलक्षणलक्षणलक्षितलक्ष्मणपरिषद्यपरिषदि **श्रीपञ्चमाङ्गसूत्र**द्विगुणित**पञ्चमाङ्गसूत्रवृत्त्य**नुक्रमप्रथमद्वितीयमण्डलीमण्डनस्वपरसमयाभ्यसनसोद्योगयोगोपधानोद्वाहन-माङ्गल्यमालारोपणा-ऽऽगमदेशितदेशविरतिदुर्ग्रहाभिग्रहाजिह्म-ब्रह्मव्रतसालापालापकोच्चारणा-दीनाऽसमर्थोद्धृत्यादि सचातुरीतुरीयारकस्पर्द्धि सश्रेयः श्रेयःकार्यं समजंजनीत् समजंजनीति च । पर्यायोपस्थेष्टश्रेष्ठसर्वपर्वशीर्षोष्णीषोपमश्रीसांवत्सरिकपर्वणि प्रायः प्रा(पा)पिष्ठप्राण्याचीर्णनिकृष्टकर्मवारणपटुपटहोद्घोषण-गुणिगन्धर्वजनोद्गीतसङ्गीतगीतसमाकर्णनोत्कर्णसकर्णसमाकीर्णश्रीजिनभवनसप्रभेदसर्वसार्वार्हणाकरण-मासार्द्धमासक्षपणाद्यनेकदुस्तपतपःप्रारम्भणाऽहरहरऽहमहमिकानैपुण्यपुण्यवन्निर्मितामितनवनवक्षणनवक्षणानल्पसङ्कल्पकल्पद्रुकल्प**श्रीकल्पाध्ययना**नुयोगोपक्रमण-नानापक्वपक्वान्नान्नादि[ना] साधर्मिकसम्पोषण-मार्गणगणमार्गितार्थवितरणसन्तोषण-जयजयारवसुवासिनीधवलध्वनिविविधतूर्यनिर्घोषशब्दाद्वैतबधिरितब्रह्माण्डमण्डलाखण्डमहाडम्बरसहकृतसकलजिनभवनविचरणाद्यखर्वपर्वधर्मकर्म सशर्म प्रावरीवृतीत् श्रीमन्महनीयपादनामस्मरणकरणासाधारणाकारणाद् ।

अपरं शुभवतां भवतां भवतान्तिभिदा(दां?) सुधीवराणां धीवराणां सपरिच्छदसौववपुःपाटवादिसूचकं कविकुलवर्णनीयानवद्यहृद्यपद्यगुम्फितं पार्वणं पत्रं प्रासं, प्रातिभप्रमाविषयीकृतं च तदन्तर्गर्भितप्रमेयपटलम् । किं चाऽस्माकं उ. **श्रीविनीतविजयग., पं. रविवर्द्धनग., पं. धनविजयग., पं. जसविजयग., तत्त्वविजयादे**रनुनति र्नतिर्वा समवसेया । तत्र प्राग्(क्) प्रान्त्यावाससमीपस्थायिनां वाच्या सकलसङ्घस्य धर्माशीश्चाऽस्मन्नामग्राहम् । श्रीजिनेन्द्रचन्द्राः प्रणाममहेशानमूर्द्धानमधिरोप्याः । विजयदशम्यामिति श्रेयः ॥ सं. १७१५(६) ॥

—*—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ( ६ )
# वंशपालनपुरे श्रीविजयरत्नसूरिं प्रति उदयपुरतो वृद्धिविजयलिखितो विज्ञप्तिलेखः

**– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय**

१४२ श्लोकोमां विस्तरेल प्रस्तुत पत्र श्री**विजयरत्नसूरिजी** उपर **वृद्धिविजयजी**ए लखेल काव्यमय विज्ञप्तिरूप छे.

अन्य विज्ञप्तिपत्रोनी जेम प्रस्तुत विज्ञप्तिपत्र पण विज्ञप्तिपत्रनी लेखन-परिपाटीने सम्पूर्णपणे अनुसरे छे. जिननमस्कार (श्लोक १ थी १७), **वागड**-देशवर्णन (श्लोक १८ थी २४), **वांसवाडा**नगरवर्णन (श्लोक २५ थी ४४), **उदयपुर**नगरवर्णन (श्लोक ४५ थी ६०), सूर्योदय-प्रभातवर्णन (श्लोक ६७ थी ७३), व्याख्यानसभा-श्रावक-श्राविकावर्णन (श्लोक ७४ थी ७७), गुरुवर्णन (श्लोक ८९ थी ११२). कृतिनो टूंक परिचय आटलो कही शकाय. कविए शब्दालङ्कार अने अर्थालङ्कारनो आश्रय लइ उपरनां वर्णनोने खूब रोचक-भाववाही बनाव्यां छे. कल्पना-वैभवनी दृष्टिए पण कृतिना केटलांक पद्यो बहु मजानां छे. जगत्प्रसिद्ध - 'हेमथी रत्न वधु (मूल्यवान) छे' ए लोकोक्तिनो प्रयोग करी कर्त्ताए पोताना गुरुने हेमचन्द्राचार्यजीथी पण अधिक दर्शाव्या छे. वस्तुतः गुरु प्रत्येना आदरभावनी द्योतक प्रस्तुत कल्पना पण आपणे माटे तो कल्पनातीत ज छे. असामान्य गुरुसमर्पणभाव होय त्यां आवी कल्पना जन्मे.

ऐतिहासिक दृष्टिए जोवा जईए तो (१) **वागडदेश-वंशपालनपुर ( वांसवाडा )**मां राजमान्य व्यक्ति कोठारी **कपूरचन्द्र**नुं नाम, (२) **उदयपुर**मां श्रावक **सुजाणसिंह**, श्राविका **साहिमती**, तेमना भाट-सेवक **दीप-अचल**नां नामो, (३) **उदयपुर**मां चातुर्मास दरम्यान श्री**भगवतीसूत्र**-सटीकवाचननी नोंध, (४) **उदयपुर**मां श्री**शीतल**जिन-श्री**सुपार्श्व**जिन-श्री**पार्श्वजिन**(चैत्य?)नी नोंध, (५) **वागडदेश** माटे प्रयोजेल '**वटपद्र**' अपर नाम, (६) सहवर्त्ती साधुओनां नाम-आटली विगतो विशेष जाणवा मळे छे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कृतिकारे कृतिमां प्रयोजेल छन्दोनुं वैविध्य ध्यानार्ह छे.

प्रस्तुत पत्रनी नकल अमने सुरत-श्री नेमि-विज्ञान-कस्तूरसूरि ज्ञानमंदिरमांथी प्राप्त थयेल छे. नकल मेळवी आपवा बदल संस्थाना कार्यवाहकोनो खूब-खूब आभार ।

-----

॥ ८०॥

स्वस्तिश्रीव्रततितिस्थिरस्थितिकृतिस्कन्धप्रबन्धोद्धुरः;
सच्छायः सरसामृतोत्तमफलप्राप्त्यै जयत्यद्भुतः ।
तापव्यापनिवारणैकपटुतासत्यापितस्वाभिधो,
यः **श्रीशीतल**तीर्थनायकवरः कल्पद्रुकल्पोऽवनौ ॥१॥
स्वस्तिश्रीमधुराधरामृतरसास्वादैकलीनश्चिरं,
सद्रत्नत्रयसंयुतां शुभधियं सञ्चार्य दूतीं पटुम् ।
भुङ्क्ते सौख्यमनारतं स्थिररतिर्यः स्थायिभावोद्भवं,
प्राप्तानन्दपदः, सदा सहृदयस्तोतव्यसंस्थास्थितिः ॥२॥
स्वस्तिश्रीर्यदुदारपादकमलं प्राप्य प्रमोमुद्यते,
राजद्राजमरालबालपटलीक्रीडागृहं सस्पृहम् ।
प्रीतिप्रह्वसुपर्वसर्वमधुपैः पेपीयमानं पुन-
श्चित्रं यत् कुट(क)टुकण्टकैर्विरहितं युक्तं जडापाततः ॥३॥
स्वस्तिश्रीर्यदुपासनप्रणयिनामङ्कं श्रयत्यञ्जसा,
नृत्यं वारविलासिनीव तनुते देवी सरस्वत्यपि ।
सत्कीर्तिर्जगतां त्रयेऽपि पथगेवोच्चैः पुनीतेतरां,
विद्विड्हृत्तटपाटनैकपटुधीः स स्तादभीष्टश्रिये ॥४॥
स्वस्तिश्रीस्तनतुङ्गशैलशिखरे हारस्फुरन्निर्झरे,
रोमालीधनशाद्वलाञ्चितलसन्नाभीह्रदोद्भासिते ।
प्रोन्मादिप्रतिवादिसिन्धुरघटाव्यापाटनप्रक्रमै-
र्यः श्रीमान् भुवनत्रये विजयते शार्दूलविक्रीडितैः ॥५॥

इति संस्कृतभाषा ॥

१. 'अन्वर्थीकृतः' इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्थिसिरीरइभवणं, भुवणत्तयभासणुग्गभाणुनिहं ।
निव्वाविअभवदाहं, **सीअलनाहं** पणिवयामो ॥६॥
तिहुअणलोअणकुमुआ-करसारयपुण्णिमाकुमुअबन्धू ।
देसिअसिवसुहलाहो, सीअलनाहो जए जयइ ॥७॥
सीअकरसीअलेहिं, करुणकडक्खेहिं पिक्खिओ जेण ।
हवइ सया सुकयत्थो, स पसत्थो सीअलो जयउ ॥८॥
अतणुतणुकंतितज्जिअ-मयणमओ संथुओ सुरगणेहिं ।
भुवणोवयारनिउणो दिढरहतणओ जए जयउ ॥९॥
परउवयारपरेसुं, रेहं पत्तो समत्तसुहचित्तो ।
मित्तो भविपउमाणं, जिणराओ रायए लोए ॥१०॥ इति प्राकृतभाषा ॥
मोहमहीरुहबंधुर-सिंधुरकरणिं सुसिद्धिकरचरणं ।
करुणामयमहिममहा-गेहं संदेहतिमिरहरं ॥११॥
गुणमणिनिवहकरंडं, भवपारावारतारणतरंडं ।
तरुणतरतरणिभासं, वंदे देवं दयावासं ॥१२॥ युग्मम् ॥

॥ इति समसंस्कृतभाषया श्री **सुपार्श्व**(शीतल?)प्रणामः ॥

स्वस्तिश्रियां निरवधिर्निधिरेव साक्षाद्,
विश्वत्रये प्रतिनिधिः प्रतिभासते यः ।
कल्लाणकंतिभरतज्जणरूववं वि,
कल्लाणकोडिजणओ जणओवयारी ॥१३॥
**पार्श्वप्रभु**र्भूरिविभूतिसूति-र्भूयात् प्रसन्नः सुकृतैरखिन्नः ।
फणावली रेहइ जस्स सीसे, किं चित्तवल्ली सुरसाहिरूढा? ॥१४॥
रूपस्वरूपमिदमप्रतिरूपमेव, मन्यामहेऽङ्घ्रिमहनीयतमस्य यस्य ।
मोहप्परोहदलनिद्दलणं वि तं जं, मोहं जणेइ भुवणत्तयलोअणाणं ॥१५॥

॥ इत्यर्द्धसंस्कृत-प्राकृतभाषासाटकेन श्री**पार्श्व**जिनप्रणामः ॥

इति नुतिमुपनीय श्रीजिनेन्द्रानतन्द्रा-**नुदयपुर**वरस्थान् स्थैर्यधैर्यातिसुस्थान् ।
अभिमतफलसिद्धयै कामकुम्भप्रभावां-स्त्रिभुवनमहनीयान् भक्त्यभिव्यक्तियुक्त्या
॥१६॥ ॥ इति श्रीजिनवर्णनम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ श्रीपरमगुरुराजचरणकमलपवित्रीकृतदेश-नगरवर्णनम् ॥

देशः स एवाऽस्तु शुभप्रदेशः, श्रेयःश्रियो(यः) सुस्थिरसन्निवेशः ।
यस्मिन् गणोत्तंसगुरुप्रवेश-प्रभावतो नास्त्यशुभस्य लेशः ॥१७॥
भूसुभ्रुवः केचन यत्र तुङ्ग-स्तनेन्दिरामाकलयन्ति शैलाः ।
नितम्बबिम्बश्रियमाश्रयन्ते, केपि स्फुरन्निर्जरमेखलाङ्काः ॥१८॥
यत्राऽस्खलन्तः सरिताप्रवाहा, गतावगाहाः परितः स्फुरन्ति ।
गिरां प्रवाहा इव **रत्नसूरे**-र्हारानुकाराः क्षितिनाय(यि)कायाः ॥१९॥
नृजन्मपावित्र्यकृतौ समर्था-न्यनेकतीर्थानि जयन्ति यत्र ।
यान्यैहिकामुष्मिकसाध्यसिद्ध्यो-र्योगात् प्रयान्ति प्रियमेलकत्वम् ॥२०॥
अनेकरम्भाः सुतिलोत्तमाश्च, निश्छद्मपद्माप्सरसोऽतिशस्याः ।
सश्रीफलाश्चारुहलिप्रियाश्च, वृषोपगच्छद्घननीलकण्ठाः ॥२१॥
स्फूर्जद्धरिस्फालकृतार्जुनीय-पक्षाः शिवाभिर्भयाभिरुग्राः ।
यस्मिन् वनान्ता मदनातिमुक्त-बाणाः प्रदेशा इव देवपुर्याः ॥२२॥ युगलम् ॥
लूनाऽलकासीदलकातिगूढा, राजगृहं राजगृहं न चाऽपि ।
न वा विशालाऽपि गुणैर्विशाला, पुरी सुराणामपि भासुरा न ॥२३॥
चम्पानुकम्पाकुलचित्तवृत्ति-र्लङ्का तु शङ्कातुरतां गतैव ।
येषां पुरस्तान्नगराणि यत्रा-ऽनेकानि तादृंशि दृशां सुखाय ॥२३(२४)॥

तेषु च—

जगत्त्रयीनायकराजधानी-सर्वस्वसारैरिव निर्मिता या ।
दिदृक्षुचक्षुःकृतभूरिलोभा, यत्राऽतुला सा **वटपद्र**शोभा ॥२४(२५)॥
वित्तैः कुबेरा अपि ये सुबेरा, दानप्रवाहार्द्रकरा इवेभाः ।
श्राद्धा विशुद्धाशयधर्मसक्ता, गुणानुरक्ता गुरुपट्टभक्ताः ॥२५(२६)॥
श्यामाश्च गौर्यश्च तथाऽतिरक्ता, मुग्धाच्छवत्सैरनुगम्यमानाः ।
यत्राऽऽस्तिकाः पीनपयोधराग्र-शृङ्ग्यो[1] मुनीनां किल कामगव्यः ॥२६(२७)॥

तत्र च देशे –

सौवर्द्धिसंस्पर्द्धितनाकलोकं, लोकम्पृणोदारवचस्विलोकम् ।
सर्वोत्तमं वंशपुरं ह्यशोकं, दृष्टं प्रहृष्टं प्रकरोति नो कम्? ॥२७(२८)॥

१. 'शृङ्गा' पाठां. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मयि स्थिता वासववासपूस्तु, क्षोण्यां तथा राउलराजधानी ।
श्रेष्ठाऽनयोः केति यदीक्षितुं किं, सत्तारकाक्षीणि वियद् दधार ॥२८(२९)॥
चौरः परं यत्र च पौरनारी-सौरभ्यहारी पवनैस्तथा च ।
यूनोर्मनोभूरणभूरतेषु, द्विजाभिघाताः करजक्षतानि ॥२९(३०)॥
सर्वापहारः क्विपि शब्दशास्त्रे, निर्स्त्रिशता चोद्भटयोधशस्त्रे ।
पयोधरत्वेऽपि कठोरता स्त्री-वक्षोजयोस्तद्भुवि वक्रिमा च ॥३०(३१)॥
मेघोदये वै मलिनाम्बरत्वं, गुणच्युतिः कार्मुकमुक्तबाणे ।
बाणप्रयोगः स्मरतश्च यूनां, नाऽन्यत्र कुत्राऽपि तु यत्र लोके ॥३१(३२)॥
॥ त्रिभिरेकोऽर्थसम्बन्धः ॥

लोलेक्षणानां निशितैः कटाक्षै-ररुन्तुदैर्यत्र जनैरतर्कि ।
न पुष्पबाणः खलु पञ्चबाणो, जगज्जिघांसुः शतकोटिबाणः ॥३२(३३)॥

रूपश्रीसागरीभूता, दृष्ट्वा यत्रत्यनागरी ।
रागरीतिक्रमः कोऽपि, हा! गरीयान् भवेन्नृणाम् ॥३३(३४)॥

मन्दाकिनीसत्सिकताततताच्छ-कर्पूरपूरेषु चतुष्पथेषु ।
यत्रेन्द्रनीलैर्व्यवहारिपुत्रा, दीव्यन्ति दिव्यैरिव काचगोलैः ॥३४(३५)॥

कस्तूरिका-चन्दन-चन्द्र-कश्मी-रजापणैर्यत्र दिशो दशाऽपि ।
उच्चैरवास्यन्त सदावदातैः, **श्रीरत्नसूरे**रिव सद्यशोभिः ॥३५(३६)॥

भवन्ति यस्मिन् गृहमागतेभ्यो, महेभ्ययोषा हि वनीपकेभ्यः ।
मन्दादरा धान्यकणान् प्रदातुं, सुव्यक्तमुक्ताप्रसृतिप्रदात्र्यः ॥३६(३७)॥

स्फुरद्राजमार्गे चतुष्कानि यस्मि-श्चतुष्के चतुष्केऽतितुङ्गा निकायाः ।
निकाये निकाये मनोज्ञा गवाक्षा, गवाक्षे गवाक्षेऽतिवीक्ष्या मृगाक्ष्यः ॥३७(३८)॥

मृगाक्ष्यां मृगाक्ष्यां वलक्षाः कटाक्षाः, कटाक्षे कटाक्षे च लक्षं विलासाः ।
विलासे विलासे कलं तत्सुगीतं, सुगीते सुगीते यशः श्रीगुरूणाम् ॥३८(३९)॥

**कर्पूरचन्द्रः** क्षितिचन्द्रमान्यः, **कोष्ठारिको** निर्मलकोष्टबुद्धिः ।
यत्राऽर्थिसार्थेप्सितदानवर्षै-रमन्दमानन्दभरं तनोति ॥३९(४०)॥

---

२. 'समि(मी)र' इति टि. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बुद्धिप्रपञ्चैरभयस्मयघ्न-श्चाणक्यचातुर्यमदापहारी ।
साम्राज्यलक्ष्मीकरिणीस्थिरत्व-सम्पादनालानसमानशौर्यः ॥४०(४१)॥ युग्मम् ॥
आजन्ममूलात् फलदं प्रियं स्वं, बाढं परिष्वज्य रसाभिषिक्ताः ।
अप्याप्ततारुण्यभराः कृशाङ्ग्यो, रङ्गद्दुकूलोद्गतपल्लविन्यः ॥४१(४२)॥
पवित्रपत्रालिविचित्रगात्र्यः, पुष्पप्रकाशार्पितसत्फलाशाः ।
श्राद्धयः सुराणां लतिका इवाऽति-कामप्रदा यत्र मनो हरन्ति ॥४२(४३)॥
युग्मम् ॥

तत्र श्रीमति **वंशपालनपुरे** गर्जन्नृपेभोद्धुरे,
चञ्चच्चैत्यविचित्रकेतुललितैः स्वर्गर्द्धिसन्तर्जकै(:) ।
शत्रुक्षत्रकलत्रनेत्रसलिलप्रक्षालितांह्रिद्वय-
श्रीमद्राउलसेवनीयचरणश्रीपूज्यसम्भाविते ॥४५(४४)॥

॥ इति श्रीवागडदेश-वांसवालानगरवर्णनम् ॥

सम्भूय भूयोऽपि हि राजपार्श्वात्, सप्तर्षिभिर्नैकमृगोऽप्यमोचि ।
साधोस्तुलां याति ततो न यस्याः, श्रद्धालुनिर्मोचित[1]नैकजन्तोः ॥४४(४५)॥
सौरभ्यगर्भाच्छसहस्रपत्रा-ऽऽतपत्रशोभां परितो दधानाः ।
वलक्षपक्षाण्डजधूतपक्षैः, संवीज्यमाना व्यजनैरिवेशाः ॥४५(४६)॥
पातालमूलामृतकुम्भमध्या-पतच्छिरौघैरिव पूर्णकण्ठाः ।
तडागभागा रचयन्त्यकुण्ठा-मुत्कण्ठतां यत्र विचित्रलक्ष्म्या[:] ॥४६(४७)॥युग्मम्॥
स्नात्वाऽथ यत्तीरमभिव्रजन्त्यः, प्रदीप्तचामीकरचारुकान्त्यः ।
विभान्ति रामा नयनाभिरामा, रम्भाः पयोधेरिव निस्सरन्त्यः ॥४७(४८)॥
अभ्रंलिहैः शुभ्रतरैरदभ्रैः, शिरोविराजत्कलधौतकुम्भैः ।
महीशगेहैः क्रियते विभाते, यत्रोदितार्कस्फुटकोटिशङ्का ॥४८(४९)॥
मौग्ध्येन सन्दिग्धमुपेयुषोः स्वं, वीक्ष्याऽनुबिम्बं मुकुरालयेषु ।
यूनोर्भवेद् यत्र यथार्थबुद्धि-र्हस्तग्रहान्नूपुरसिञ्जिताच्च ॥४९(५०)॥
छिन्ना किमेषा मम मौक्तिकस्रग्, व्यापारयन्तीति करं भ्रमेण ।
नक्षत्रबिम्बे स्फटिकाङ्गणेषु, यत्रोपहासाय न कस्य मुग्धाः ॥५०(५१)॥

---

१. ०'चितजन्तुराशेः' पाठां. ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवेद् यदीया सुषमा द्युगर्व-सर्वस्वसर्वङ्कषकान्तिकान्ता ।
केनोपमेया न यदारकूटं, सुवर्णकूटस्य तुलां लभेत ॥५१(५२)॥
सभ्या महेभ्याश्च वसन्ति यत्र, महौजसो मानधनाश्च केचित् ।
यशोऽर्थमर्थिष्वथ कल्पवृक्ष-सदृक्षपक्षप्रतिबद्धकक्षाः ॥५२(५३)॥
कदाग्रहग्रस्ततयाऽतिमूढा व्यूढाभिमानाश्च महत्तमत्वात् ।
केचित् पुनर्भूमिपतेः प्रसादा-दाप्तप्रतिष्ठा अपि शिष्टभावाः ॥५३(५४)॥ युगलम् ॥
विचित्रशास्त्रार्थविचारसार-पयोधिपारीकृतधीतरण्डाः ।
स्फुरन्ति यत्राऽर्हतधर्मधुर्याः, सम्यक्त्वरत्नस्थितिसत्करण्डाः ॥५४(५५)॥
संवेगरङ्गोल्लसदन्तरङ्गो-त्कर्षप्रकर्षैरिव कीलिताङ्ग्यः ।
काश्चित् तु सर्वर्षिजने समस्या-मात्रादपि प्रोज्झितसन्नमस्याः ॥५५(५६)॥
अन्यास्तु सन्न्यायपथानुषक्ताः, परम्परासर्षिजनानुरक्ताः ।
सदा सदाचारविधिप्रसक्ताः, श्राद्ध्यः समग्रा गुरुपट्टभक्ताः ॥५६(५७)॥
॥ त्रिभिरेकोऽर्थसम्बन्धः ॥

तत्र च –

श्रद्धालुमुख्यस्तु **सुजाणसिंहः**, श्राद्धीष्वथो **साहिमती** प्रतीता ।
आप्तौ तयोरत्यधिकारिभृत्यौ, **दीपा-ऽचलाख्यौ बलिभोक्तृभाटौ** ॥५७(५८)॥
यस्मिन्नयं सङ्घतरुश्चतुर्भि-र्मूलैर्मुनीनां प्रति पूर्वकूलैः ।
मानोच्चचूलैः फलवद्दलैश्च, चलैर्दुकूलैरिव वैजयन्तः ॥५८(५९)॥
मुक्तामय-गुणशालि-प्रवरस्त्रीपुंसरत्नरुचिरुचिरात् ।
**भारतभूश्रीहृदया-भरणात् तस्मादुदयपुरतः** ॥५९(६०)॥
विनयावनम्रकायः, प्रणयसहायश्च भक्तिनिरपायः ।
प्रायः प्रोज्झितमायः, प्राप्तश्रीजित्पदच्छायः ॥६०(६१)॥
सकलविधेयजनौघ-किञ्चित्करकिङ्करप्रकरमुख्यः ।
अप्यात्मीयतया श्री-गुरुभिरनुग्रहदृशा स्पृष्टः ॥६१(६२)॥
उल्लसितपुलकशोभा-सम्भावितवपुःप्रपुष्टिसंसृष्टिः ।
हृष्टमना घृष्टाद्भुत-गुरुगोत्रपवित्रवाग्वक्त्रः ॥६२(६३)॥
भालस्थलभूषायित-संयोजितपाणिविलसदरविन्दः ।
श्रीजिद्ध्यानविधाना-वधानमेदुरतरानन्दः ॥६४(६४)॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तरणिप्रमितावर्त्त-प्रवर्त्तितानिन्द्यवन्दनन्यासैः ।
विनयनयगर्भसूत्रित-विधिक्रियाप्रक्रियाभ्यासैः ॥६४(६५)॥
भूयो भूयोऽभिनमन्मौलिः, शीलितगुरुस्तुतिः सततम् ।
**वृद्धिविजयो** विनेयो, विज्ञप्तिं विरचयत्येवम् ॥६५(६६)॥
प्रयोजनं चाऽत्र यथा प्रथावत्-प्रभाप्रसारादरुणेन तावत् ।
पर्युल्लसत्त्विड्घृसुणाङ्गरागो, प्रकल्पिते वासवदिग्विभागे ॥६६(६७)॥
शूच्यन्तभेद्यप्रसृतान्धकार-प्रकारविस्तारनिकारकारी ।
किमेष निश्शेषविशेषदर्शी, जगत्प्रदीपः प्रकटीबभूव? ॥६७(६८)॥
करप्रसङ्गात् किमु पद्मिनीनां, निद्रापनोदी कमिता विनोदी? ।
किं वा तमःकोलकुलैककालः, प्रोत्तालफालोद्यतसिंहबालः? ॥६८(६९)॥
रथाङ्गरामानयनामृतद्युत्-सहस्रधारः किमु हेमकुम्भः? ।
तमीतमीनायककामकेली-हरं तृतीयं नु हरस्य चक्षुः ॥६९(७०)॥
किं वोदयाद्रेः कनकातपत्रं, शचीशदिक्कुण्डलमण्डनं वा ।
अह्नोऽथवा विश्वविभूषणस्य, [१]रात्नं समुत्तेजनशाणचक्रम् ॥७०(७१)॥
राजीवराजीवरकोशमध्य-प्रबद्धलुब्धालिविमोचकौजाः ।
विश्वोपकारी करुणैकसिन्धुः, किमुद्गतो बालसरोजबन्धुः? ॥७१(७२)॥
इत्थं वितर्कावतरं कवीनां, प्राप्नोति यत्राऽतितरां विवस्वान् ।
तत्र प्रभाते सुकृतानुयाते, श्रीजित्प्रसादाद् बहुसातजाते ॥७२(७३)॥
विमुक्ततन्द्रैर्व्यवहारिचन्द्रैः, शास्त्रश्रुतिप्रेमरसातिसान्द्रैः ।
भोगोपभोगीकृतशालिभद्रै-रमुद्रमद्रैर्हृदयेषु भद्रैः ॥७३(७४)॥
लक्ष्मीकुलागारतया समुद्रैः, कराङ्गुलिभ्राजिहिरण्यमुद्रैः ।
महेभ्यसभ्यप्रवरप्रभायां, शुश्रूषुलोकोत्करसत्सभायाम् ॥७४(७५)॥
सञ्चारिणीभिः स्मरदैवतस्य, साक्षाद्दिवाऽऽरात्रिकदीपिकाभिः ।
कुम्भस्तनीभिर्हर्यणुकोदरीभिः, श्रिया रति-प्रीतिसहोदरीभिः ॥७५(७६)॥
लोलेक्षणाभिर्ललिताङ्गनत्या, सत्यापितस्वस्तिकमण्डनायाम् ।
पिकानुकारिस्वरशालिनीभिः, प्रणीतगीतप्रवरक्रियायाम् ॥७६(७७)॥

---

१. मणीमयोत्तेजन० पाठां. ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाध्यायतः **पञ्चममङ्ग**मञ्चत्-प्रपञ्चटीकोपगतं क्षणेऽपि ।
तदेव सूत्रं परिवाच्यमानं[1]-ममानमानन्दपदप्रदायि ॥७७(७८)॥
विशुद्धसिद्धान्तवितर्कयुक्ति-प्रत्युक्तिकृत्कर्कशतर्कविद्या ।
हृद्याऽनवद्याऽद्भुतगद्यपद्या, पद्याऽच्छसाहित्यसुधैकनद्याः ॥७८(७९)॥
अधीतिबोधाचरणप्रचारै-रुपाधिभेदैः परिभाव्यमाना ।
नानार्थसम्पत्तिसमर्थनेन, विभाव्यते कामगवी प्रवीणैः ॥७९(८०)॥
छन्दांस्यलङ्कारविचारसार-शब्दानुशक्तिप्रमुखागमाश्च ।
विद्यार्थिसार्थेषु निवेद्यमाना, मानातिगज्ञानकृतो भवन्ति ॥८०(८१)॥
योगप्रयोगादिकसाधुसाध्य-क्रियाविशेषाः खलु तेऽप्यशेषाः ।
विधीयमाना भगवत्प्रसादाद्, भूता भवन्त्येव च निर्विवादाः ॥८१(८२)॥
सञ्जायमानेष्वथ धर्मकर्म-स्वेवं समग्रेषु समाजगाम ।
सांवत्सरं पर्व सुपर्वरत्न-कल्पं मनःकल्पितदानदक्षम् ॥८२(८३)॥
तत्राऽर्हदर्चार्चनधर्मचर्चा-प्रभावनाभिः श्रुतभावनाभिः ।
प्रभावितं सत्क्षणलक्षणीय-क्षणैरवाच्युत्तम**कल्पसूत्रम्** ॥८३(८४)॥
अष्टाहिकालक्षितपक्ष-मासो-पवासमुख्यैः प्रचुरैस्तपोभिः ।
प्रदीपितं **लम्भनिका**धिकाभि-र्विभूषितं **मोदकपारणा**भिः ॥८४(८५)॥
गर्ज्जद्घनध्यान-गजेन्द्रशोभा-ऽक्षोभाऽश्वभास्वत्प्रकरैः पुरोगैः ।
विचित्रवादित्रविशेषनादै-र्मृगेक्षणागीतनिबद्धवादैः ॥८५(८६)॥
परिस्फुरद्भूरिपताकिकाभि-र्विभ्राजिते भूमिनभोविभागे ।
**चैत्यप्रपाटी**रचनाऽतिचारु-चर्या चकास्ति स्म सुविस्मयाय ॥८६(८७)॥
इत्यादिकातुच्छमहोत्सवाच्छं, प्रवर्त्तत प्रास्तसमस्तविघ्नम् ।
प्रवर्त्तते चाऽनुदिनं सशर्म, सद्धर्मकर्माऽथ गुरुप्रसत्तेः ॥८७(८८)॥
अथ श्रीगुरुराजवर्णनम्-

सूरिर्दूरीकृताराति-र्भूरिपूरितकामिनः ।
ऊरीकृतोपदेशो यो हारहूरीभवद्गिरा (?) ॥८८(८९)॥
काव्यं यशो द्विषद्गर्वं, सर्वसूरिशिरोमणिः ।
चरीकर्त्ति बरीभर्त्ति, सञ्जरीहर्त्ति यः क्रमात् ॥८९(९०)॥

---

१. ०नं, सन्देहसन्दोह विषापनोदि - पाठां० ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विश्वोपकारप्रवणस्य यस्य, सूरेर्विनिर्माणविधौ च्युता ये ।
क्लृप्ता विधात्रा परमाणुभिस्तैः, कल्पद्रु-चिन्तामणि-कामकुम्भाः ॥९०(९१)॥
विद्वेषिणां मूर्द्धनि वज्रतेजाः, शिरोमणिः सर्वगणाधिपानाम् ।
मुक्तामयाङ्गश्च बभस्ति योऽत्र, **श्रीरत्नसूरिः** किल रत्नमूर्त्तिः ॥९१(९२)॥
प्रपूरयन्निष्टमनिष्टहन्ता, सन्तापहृत् पुण्यफलोपपन्नः ।
सुस्कन्धबन्धः सुकृतैकमूलो, यत्पञ्चशाखः खलु कल्पशाखी ॥९२(९३)॥
वर्णस्तनोश्चम्पककम्पकारी, स्वरश्च येषाममृतानुहारी ।
हितोपदेशश्च जनोपकारी, भाग्योदयस्तीर्थकरानुसारी ॥९३(९४)॥
लावण्यलीलालहरीविहारि-सौभाग्यमुच्चैर्वचनातिचारि ।
रूपं च पञ्चेषुमदापहारि, परं मनस्तु प्रमदाविकारि ॥९४(९५)॥
पुष्पायुधं मामजयद् यदेष, भूयोऽपि योद्धुं तदनेन कामः ।
रोषादिवाऽऽसीद् विषमायुधोऽसौ, तथाऽप्यनङ्गो न जयी सदङ्गात् ॥९५(९६)॥
समस्तशास्त्रार्णवपारदृश्वा, मत्तोऽपि मत्तो मतिमानितीव ।
विभाव्य भूयोऽभ्यसनाय देवी, न पुस्तकं मुञ्चति हस्ततो गीः ॥९६(९७)॥
कुशाग्रबुद्धेरिति यस्य जाने, सरस्वतीयं सहजानुजाता ।
बृहस्पतिर्मङ्गलपाठको ज्ञः, कविः कलावांश्च गृहाम्बुदासाः ॥९७(९८)॥
यदाननाग्रे प्रतिवादिनोऽपि, न शब्दमात्रोच्चरणे समर्थाः ।
झरन्मदोग्रा अपि कुम्भिनः किं, पञ्चाननाग्रे प्रथयन्ति गर्जिम्? ॥९८(९९)॥
सर्वेषु शास्त्रेषु यदीयबुद्धिः, क्वचिन्न चस्खाल सुदुर्गमेषु ।
सान्द्रद्रुमद्रोणिवनेषु नूनं, तरङ्गभङ्गीव समीरणस्य ॥९९(१००)॥
यदी॰ मेधाविषयेऽखिलोऽपि, स्वान्यागमोऽमादिति नाऽत्र चित्रम् ।
यादोद्रिपूर्णोऽपि न किं प्रयातः, पीताम्बुराशेश्चुलुकत्वमब्धिः? ॥१००(१०१)॥
**कुमारपाला**भिधभूमिपालं, यथा प्रथावान् गुरु**हेमसूरिः** ।
प्राबोधयत् तद्वदिहा**ऽमरेशं, राणं** सुरत्राणमिव प्रभुर्यः ॥१०१(१०२)॥

अथवा-

**कुमारपाल**प्रतिबोधकत्वात् श्री**हेमसूरि**र्न तथा जनेषु ।
यथा**ऽमरेश**प्रतिबोधनेन, **श्रीरत्नसूरि**र्हि चमत्करोति ॥
आबाल-गोपालमिति प्रसिद्धि-र्हेम्नोऽधिकं रत्नमतोऽस्ति सत्या ॥
॥१०२(१०३)॥ षट्पदी ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदीयवाक्यामृतपूरपाना-न्नरेश्वरोऽभूदमरेश्वरोऽयम् ।
तत्त्वावबोधाद् बहुसत्त्वरक्षाद्, दक्षः **प्रदेशीव सुकेशि**सङ्गात् ॥१०३(१०४)॥
न चन्दनस्यन्दिनि तत्समीरे, सुधासमुद्रस्य न चाऽपि तीरे ।
हिमद्युतौ नो हिमवालुकायां, यच्छैत्यमास्ते गिरि यस्य सूरेः ॥१०४(१०५)॥
मुग्धं न दुग्धं सितयाऽप्युपेतं, न माधुरी खण्डगताऽपि खण्डा ।
यद्वाग्विलासैस्तुलनामुपेतुं, द्राक्षाऽपि कक्षीकुरुते न पक्षम् ॥१०४(१०६)॥
सकर्णवर्ण्योग्रसुवर्णपुण्या-लङ्कारसारा सुरसार्थकाम्या ।
सद्वत्सतोषाश्रयमञ्जुघोषा, यदीय गीः कामदुघैव साक्षात् ॥१०६(१०७)॥
मन्यामहे यस्य गिरां तरङ्गै-र्जितान्तरङ्गाऽभवदभ्रगङ्गा ।
तस्मात् त्रपातोऽत्र पपात भूमौ, तदादि तस्याः खलु निम्नगात्वम् ॥१०७(१०८)॥
जानीमहे यद्वदनेन्दुमध्य-मध्यासिताऽऽकण्ठमवाप तृप्तिम् ।
पीयूषयूषैः श्रुतदेवता तद्-वचश्छलादुद्गिरणं तनोति ॥१०८(१०९)

तेजः-

महस्विनोऽपि प्रतिपक्षलक्षाः, प्राप्ता यदध्यक्षमलक्षभासः ।
स्युर्नाऽत्र चित्रं हि रवेः पुरः किं, खद्योतपोतद्युतिडम्बरोऽपि ॥१०९(११०)॥
बाढं समुत्तेजितवाग्विलासा, आसन् खलौघा खलु यस्य दासाः ।
दर्पोद्धुरा लोलकराः किराताः, किं चक्रिणः किङ्करतां न यान्ति? ॥११०(१११)॥
क्रुधैधमानं मुनिदुर्दुरूह-कूटं पटुश्रीर्निनिषेध रोषात् ।
यः सूरिशक्रोऽतिमदैरवन्ध्यं, वातापितापीव मुनिः सुविन्ध्यम् ॥१११(११२)॥

अथ यशः-

यस्य प्रभोर्भूरितरोदयस्य, सरिद्गिरिग्रावसमुद्रमुद्राम् ।
प्रयान्त्यतिक्रम्य यशांसि दूरं, तत्स्पर्द्धयैव प्रतिवादिनोऽपि ॥११२(११३)॥
आशाः समापूरयतः समेषां, यशोऽपि ताः पूरयति स्म यस्य ।
न तत्र चित्रं विबुधा यदाहुः, कार्ये गुणाः कारणतो भवन्ति ॥११३(११४)॥

अथ कीर्त्तिः-

रूपं च विद्या च यशो महश्च, चतुष्टयीयं शुभमङ्गलानाम् ।
यदीयकीर्त्तेर्दशदिग्जयार्थे, कृतोद्यमा याः पुरतश्चकास्ति ॥११४(११५)॥

---

१. '०भृतो मृषा न' - पाठां. ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जितेन्द्रियं संयमिनं सभासु, स्वैरं समाश्लिष्यति ते सुता श्रीः ।
इत्यौचिती सा किमु यस्य कीर्त्ति-र्ययावुपालब्धुमिवाऽब्धितीरम् ॥११५(११६)॥

गुणानुबद्धोन्नतवंशमेन-मासाद्य यं शीर्षधृतेन्दुकुम्भा ।
कीर्त्तिर्नटीव प्रकटीभविष्णु-र्मनोविनोदाय भवेन्न केषाम्? ॥११६(११७)॥

यथा यथा यस्य गुणाधिभर्तुः, कीर्त्तिर्धरित्रीं धवलीकरोति ।
तथा तथा शत्रुजनाननानि मालिन्यमायान्त्यतिचित्रमेतत् ॥११७(११८)॥

एषा क्षितिश्चन्दनजै रसौघै-रालिप्यते वा परिपूर्यते वा ।
क्षोदैः सुसूक्ष्मैः शुचिमौक्तिकानां, तथा प्रथावद् घनसारसारैः ॥११८(११९)॥

किं प्लाव्यते दुग्धपयोधिना वा? किं भूष्यते वा कुमुदैः सकुन्दैः? ।
यस्याऽच्छकीर्त्तिं जगति स्फुरन्तीं, समीक्ष्य दक्षा इति तर्कयन्ति ॥११९(१२०)॥
युग्मम् ॥

चैत्रीयचन्द्रातपजित्वरी यत्-कीर्त्तिर्भ्रमन्ती भुवनत्रयेऽपि ।
रात्रिंदिवं स्त्रीत्वसहोद्भवं यद्, भयं क्वचित् प्राप न चित्रमेतत् ॥१२०(१२१)॥

तैस्तातपादैर्गणशीतपादै-र्गतावसादैर्विजितोग्रवादैः ।
नतिस्त्रिसायं विगतप्रमादै-र्ममाऽवधार्या विहितप्रसादैः ॥१२१(१२२)॥

तथा-

सौजन्यसर्वस्वनिधिस्वभावा, भावावबोधानुगता गुरूणाम् ।
सुधामुधाकारिवचोविलासाः **श्रीदेवपूर्वा विजयाः** सुधीशाः ॥१२२(१२३)॥

श्रीजिन्नियोगाधिकृताभियोग-प्रयोगदक्षा अपि धर्मपक्षाः ।
श्रीजित्प्रसत्तिं प्रति लब्धकक्षाः, क्षमाः **क्षमाद्याविजयाः** सदक्षाः ॥१२३(१२४)॥

श्रीपूज्यपादाब्जरसैकलीन-पीनप्रमोदोदयिचित्तभृङ्गाः ।
गङ्गातरङ्गामलशीललीलाः **श्रीमेघपूर्वा विजया** बुधेन्द्राः ॥१२४(१२५)॥

गभीरिमग्रस्तसमुद्रमुद्राः, सद्धीरिमध्वस्तधराधराभाः ।
विद्वद्वरा **वीरमसागराह्वाः**, प्रह्वा गणाधीश्वरसेवनेषु ॥१२५(१२६)॥

वाक्चातुरीरञ्जितभूरिनागरा, गीतार्थपार्थाश्च **विनीतसागराः** ।
सुधाप्रपासन्निभसूरिराट्कृपा-रसप्रसङ्गाधिगतप्रसत्तयः ॥१२६(१२७)॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्यसौजन्यगुणाभिरामा, मोदप्रमोदामृतसागराभाः ।
श्रीजित्पदोपासनवासनाढ्या, **आमोदयुक्सागर**संज्ञिता ज्ञाः ॥१२७(१२८)॥
अमन्दरागा अपि मन्दरागा-नुसारिधैर्याः सुकृतैकधुर्याः ।
श्रीजिद्धुजिष्या **जयसुन्दरा**ख्या-स्तपस्विनो विज्ञपुरन्दराश्च ॥१२८(१२९)॥
श्रीजित्सपर्यैकलसत्समीहाः, **सीहा**भिधाना **विजयो**पपन्नाः ।
नियोगिवीथीतिलकोपमाना, नानार्थभाज**स्तिलका**भिधानाः ॥
**प्रेमो**पयुक्ता **विमला** द्विधाऽपि, क्रियाविधौ श्रीगुरुदुर्गपालाः ॥१२९(१३०)॥
॥ षट्पदी ॥

इत्यादयः श्रीगुरुराजराजत्-पदाम्बुजोपासनराजहंसाः ।
तेभ्यो मदीयाऽनुनतिर्नतिर्वा, प्रसादनीया क्रमतः समेभ्यः ॥१३०(१३१)॥
किञ्च – **इन्द्रविजया**ख्यविबुधाः, सुमेधसो मेध्यशीलसम्पन्नाः ।
**लालविजया**भिधाना, ज्ञानाभ्यासप्रवणहृदयाः ॥१३१(१३२)॥
बुद्धिविशुद्धनिसर्गा बुधवर्या **ऋद्धिविजय**नामानः ।
विबुधाः **सुखविजया**ख्याः, सुधियः सुखदा विनयविधितः ॥१३२(१३३)॥
**ज्ञानविजया**ख्यगणयो, गणयोऽपि च **रूपविजय**नामानः ।
अतियतिमतिरतिगतयो, मुनयो **मतिविजय**सञ्ज्ञाश्च ॥१३३(१३४)॥
सुस्था ज्येष्ठस्थित्या-मित्याद्याः साधवोऽत्र गुरुचरणान् ।
उपवैणवं स्तुवन्तो, नमन्ति तत्प्रणतिरवधार्या ॥१३४(१३५)॥
अत्रत्यः सङ्घोऽपि च, भक्तिव्यक्तिप्रयुक्तसद्युक्त्या ।
नमतितरां नितरामिति, विज्ञप्तिं चाऽपि वितनोति ॥१३५(१३६)॥
धन्यः स एव दिवसः, समयोऽपि स एव रसमयो भविता ।
भवितारकगुरुराज-क्रमकमलस्पर्शनं यत्र ॥१३६(१३७)॥
पादावधारणा त-त्करुणावरुणालयैर्गणाधीशैः ।
फलवत्ता बलवत्ता-तिथित्वमानी सतामेषा[1] ॥१३७(१३८)॥
ऊनमनूनं नूनं, यल्लेखेऽलेखि मुग्धबुद्ध्या तत् ।
क्षन्तव्यमेव सर्वं, सहायतः सूरयः प्रोक्ताः ॥१३८(१३९)॥

१. विज्ञप्तिः इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किञ्च -

कृतापराधोऽपि जनो निजोऽयं, कृपाकटाक्षैरवलोकनीयः ।
पाल्यो भवेद् वस्तुविदूषकोऽपि, न मूषकः किं गणनायकस्य ॥१३९(१४०)॥

॥ इति विज्ञप्तिरहस्यम् ॥

भृत्योचितहितकृत्य-प्रकाशि पत्रं प्रसादनीयं द्राक् ।
एषोऽनुचरश्चाऽऽर्हद्-ध्याने स्मृतिमात्रमानेयः ॥१४०(१४१)॥
सरसा सालङ्कारा, सुललितपदपद्धतिर्घना(न?)श्लेषा ।
श्रीजिष्णुसम्मतिसुखं, कलयतु विज्ञप्तिकमलाक्षी ॥१४१(१४२)॥

संवत १७६७ विजयदशम्यामिति श्रेयः ॥

इति श्रीगुरुविज्ञप्तिलेखः ॥ प्रथमादर्शोऽयं लिखितः पण्डित**लालविजय**गणिभिः श्री**उदयपुरे** ॥

—*—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(७)

# श्रीधर्मविजयविरचितं

# विज्ञप्तिपत्रम्

**– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय**

११ पत्रनी प्रस्तुत रचना विज्ञप्तिपत्र छे के लेखपद्धति – ए कहेवुं मुश्केल छे. शरुना ४ पत्रमां ८६ श्लोकप्रमाण मूळ कृति छे. पछी शेष पत्रोमां जिनस्तुति के जिनगुणवर्णन नामना ओछा-वत्ता श्लोकना ९ अधिकारो, नगरवर्णननो ३४ श्लोकनो १ अधिकार अने गुरुवर्णनना अनुक्रमे २६ अने १८ श्लोकना २ अधिकारो छे. पूर्वपत्रना ते ते अधिकारोने बदली उपरना अधिकारो जोडवाथी नवो पत्र तैयार थतो हशे? जो एम होय तो आ कृति लेखपद्धति गणाय ।

कृतिना अन्ते क्यांय कर्त्ता-रचनाकाळ वगेरेनी नोंध नथी. मूळ कृतिना ५२मा श्लोकमां 'धर्मविजय' ए नाम अने श्लोक ५०मां रचना स्थळ 'दीवबंदर' ए नोंध अगत्यनी छे. एज रीते पाछळना एक नगरवर्णनमां 'चारित्रविजय' अने 'नागपुर' ए नामनो उल्लेख छे. कदाच ए कर्त्ताना नामनो उल्लेख होय अने कदाच प्रतीक नामो पण होय.

प्रस्तुत कृति लेखनदोषने कारणे घणे स्थाने अशुद्ध छे. वळी अमने पण घणे स्थाने पाठ समजायो नथी. तेथी अमे कृतिने बरोबर उकेली शक्या नथी.

अमने आ कृतिनी हस्तप्रत श्रीकैलाससागरसूरि ज्ञानमन्दिर-कोबामांथी प्राप्त थयेल छे. सहकार आपवा बदल ज्ञानमन्दिरना कार्यवाहकोनो खूब खूब आभार ।

* * *

॥ ॐ॥ श्रीजिनाय नमः ॥

स्वस्तिश्रीमानजस्रं तिमिरविदलनाद् वासवाद्वैतकारी,
दिग्नारीकण्ठहाराभवदनणुगुणः शुद्धमार्गानुसारी ।
**पार्श्वः** पुष्णातु नित्यं निजभजनकृतां सप्तविश्वाधिपत्या-
सूचानूचानभास्वद्भुजगपतिफणारत्नरश्मिप्रचारी ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्तिश्रीप्रणयप्रकर्षविनमद्वन्दारुवास्तोष्पतिः(ति)-
श्रेणीना(नां) मुकुटाः स्वकोटिविलसद्वैडूर्यरत्नत्विषाम् ।
व्याजाद् यस्य पदाभिषेकमुदकैः श्रेयोर्थिनः कुर्वते,
स श्रेयांसि यशांसि यच्छतुतमां श्रीपार्श्वतीर्थेश्वरः ॥२॥
स्वस्तिश्रीशतपत्रपत्रनयनासम्भोगलीलाविधिः,
श्रीपार्श्वप्रभुरस्तु कौशलसुधासिन्धौ सुधादीधितिः ।
यस्याऽद्याप्यखिलेषु नाकिषु जगज्जङ्घालमुज्जृम्भते,
विश्वोद्योतिशय(यश)स्सुधाकरसमा सिद्धापगा पाण्डुरम् ॥३॥
स्वस्तिश्रीललनाविलासविलसत्पङ्केरुहस्येशितु-
दृ(र्दृ)ष्ट्वा यस्य वितर्कयन्ति विबुधाश्चित्तान्तरेवं स्फटान् ।
श्रेयोऽर्थं शिरसि स्फुटं विनिहिता एते सुदूर्वाङ्कुरा-
स्त्रैलोक्यप्रभुणा महोदयपुरीप्रस्थातुकामेन किम् ॥४॥
स्वस्तिश्रियः केलिनिकेतनस्य, स्फूर्जत्फणौघाः फलकन्ति यस्य ।
रत्नप्रभाद्यन्धुमुखानि भव्य-नृणां पिधातुं सुविसङ्कटानि ॥५॥
बभार यः स्फारफटाच्छलेन, दीर्घाग्रहान् नूनमनन्तवीर्यः ।
न्यस्तुं जगद्वेश्मशिरस्सु सप्त-भीध्वंसनोद्भूतयशःपताकाः ॥६॥
मान्यः सदापीह सदोपकारी, सतामिति ज्ञापयितुं ध्रुवं यः ।
वहत्यहीशं शिरसा सहिष्णुं, स्वनिर्मितायाः कमठव्यथायाः ॥७॥
क्षमाभरोद्धृत्युपकारभूत-प्रभूतपुण्यप्रचयातिरेकात् ।
यन्मूर्ध्नि लेभे भुजगाधिनाथः, पदं द्विजिह्वस्य कुतोऽन्यथा तत् ॥८॥
अप्रत्नरत्नद्युतिदीप्यमाना-श्चकासते सप्त फणा यदीयाः ।
अन्तःस्थसद्ध्यानपवित्रसप्ता-र्चिषः शिखाः सप्त बहिर्गताः किम् ॥९॥
बभूव भोगी भुजगोऽङ्गभाजां, भूयिष्ठभीतिप्रददर्शनोऽपि ।
विधाय सेवां सफलां यदीया-मनारतं हारिफणामिषेण ॥१०॥
दैत्याधमोन्मुक्तकरालधारा-धराम्बुपातैः प्रशशात् स (प्रशशाम) युक्तम् ।
कोपानलश्चित्रमिदं तु यस्य, ध्यानानलः प्रत्युत वर्धते स्म ॥११॥
नाम्नाऽपि येन समवाञ्छितदायकेना-ऽनभ्यर्थितेन विधुरीकृतकल्पशाखी ।
अभ्यर्थितैहिकफलप्रददर्शनः किं, झम्पां प्रदातुमचलं त्रपया रुरोह ॥१२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कषायदण्डात्मकसप्ततालकै-र्नियन्त्रितायाः शिवपूःप्रतोल्याः ।
प्रोद्घाटने यस्य फणाकलापः, श्रियं दधाति स्फुटकुञ्चिकानाम् ॥१३॥
यः सप्तविश्वाङ्गिसमूहपुण्य-क्षेत्रेषु सप्तस्वपि बोधिबीजम् ।
उ(व)प्तुं बिभर्ति स्म फणोपधेः किं, हलानि यो दुष्कृतकर्त्तकोऽस्मिन्(?)॥१४॥
यस्य स्फटा भाति शिरःप्रदेशे, साटोपनो(तो?)ऽमी किमु दीर्घपृष्टाः? ।
अन्तस्थितात्यद्भुततत्त्वसप्त-पीयूषकुण्डावनबद्धकक्षाः ॥१५॥
कल्याणामृतशेवधि(धे)र्भगवतो यस्य क्षणालोकतः;
प्राप्तप्रौढतरप्रसादगुणतो व्यालोऽपि देवेन्द्रताम् ।
लेभे विघ्नतमोवितानतरणिः सम्पल्लतावारिदः,
**श्रीवामेय**जिनाधिपोऽस्तु भविनां श्रेयस्करस्तीर्थकृत् ॥१६॥
प्रोद्दामः(म)प्रशमं सुरासुरनरैः संसेवितं निर्मलं,
**श्रीमत्पार्श्वजिनं** - - यतिपतिं कल्याणवल्लीघनम् ।
तीर्थेशं सुरराजवन्दितपदं लोकत्रयीपावनं,
वन्देऽहं गुणसागरं सुखकरं विश्वैकचिन्तामणिम् ॥१७॥
भास्वद्देवविनिर्मिते वरतरे सिंहासने संश्रितं,
चञ्चच्चामरवीज्यमानमनिशं छत्रत्रयीराजितम् ।
रूप्यस्वर्णमणिप्रभासितवरैः वप्रत्रयीभूषितं;
वन्देऽहं **जिनपार्श्व**देवविमलं भानूयमानोदयम् ॥१८॥
प्रणम्य श्रीजिनराजपार्श्वं, व्यापल्लतोन्मूलननव्यपार्श्वम् ।
सदा भुजङ्गाधिपसेव्यपार्श्वं, भव्याङ्गभृत्कामदयक्षपार्श्वम् ॥१९॥

॥ इति जिनस्तुतिः ॥

अथ नगरवर्णनम् –

सङ्कीर्णमन्तः पुरुषोत्तमैः सः(स)-श्रीकैरनेकैश्च सतीसमूहैः ।
दृग्गोचरीकृत्य यदद्भुतं किं, स्वप्नेऽपि सन्तः स्पृहयन्ति नाकम्? ॥२०॥
यस्यां समां वीक्ष्य समृद्धिमुच्चै-र्मेदस्वि-मन्दाक्षविषि(ष)ण्णचेताः ।
निवासमाधाय मनुष्यजाते-रदृश्यदेशे सुरपूः स्थितेव ॥२१॥
कुबेरलोकैः कलिताऽलका किं, कदाऽपि साम्यं समुपैति यस्य ।
श्रीनन्दनोद्यत्तनुसुन्दरत्वं, विराजि भूयो जनतान्वितस्य ॥२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदीयविस्फारिविहारिवारै-स्तिरस्कृतौन्नत्यमनोहरश्रीः ।
क्षु(क्ष)रत्तुषारद्रवकैतवेन, प्रालेयभूभृत् किमु रौति खिन्नः? ॥२३॥
शिरःप्रदेशस्थसुवर्णकुम्भ-भ्राजिष्णवः सद्गतयोऽपि तुङ्गाः ।
गलन्मदश्रेण्यभिवादनीया, यस्मिन् विहाराः सुरवारणन्ति ॥२४॥
शंशन्ति यस्मिन् जिनमन्दिराल्यो, मूर्द्धाभिषिक्ता त्विह हेमकुम्भाः ।
यथा नरेन्द्रस्य शिरोपरिस्था, विभाति कोटीरधृतच्छलेन ॥२५॥
प्रासादवृन्दैरवदातदीप्तिभि-र्मित्रं स्वकीयं मिलितुं सितत्विष[म्] ।
प्रेङ्खत्पताकापटपल्लवच्छला-दूर्ध्वीकृताः किं निजबाहुदण्डाः? ॥२६॥
निष्पादितानेकसिताम्बरश्री-र्जिनाधिराजः स्वप(?म?)तिप्रभावात् ।
स्वरोचिषोच्चामलिनाम्बरं सितां-वरं विहारा अपि यत्र कुर्वते ॥२७॥
यत्रोच्चभावस्थितिशालिनि श्री-गुरौ वरे सूरिषु दोषमुक्ते ।
कदाऽपि नो कुग्रहदृष्टिदोषा, मर्माविधो भव्यजनान् व्यथन्ते ॥२८॥
यस्मिन् जनानां हृदयान्तराले, कलिद्विषां कालकलिर्भयेन ।
दानादि सर्वस्वमिव स्वकीय-मादाय धर्मो नितरां निलीनः ॥२९॥
महेश्वरान् यत्र निभाल्य भूरीन्, गौर्यश्च सत्यश्च कुरङ्गनेत्राः ।
किं दम्पती व्यत्यत(य?)भीतितः स्थितौ, सम्पृक्तरूपौ गिरिजा-गिरीशौ?॥३०॥
बहुश(श)स्तनयेन मोदिताः, वरराजाननदीनतान्विताः ।
कमलाजनकाः सतेजसो, नीरेशा इव यत्र नागराः ॥३१॥
निस्सीमसौन्दर्यरमातिरेकं, यत्सुन्दरीणां नितरां निरीक्ष्य ।
झम्पां ददौ वारिनिधौ सुराणां, सरोजनेत्राः किमिव त्रपातः? ॥३२॥
गृहे गृहे यत्र विभाति(न्ति?) सुव्रताः, सुवासिनीसन्ततयश्च गोगणाः ।
गोपप्रमोदातिशयं ददाना-स्तन्याऽतिपीनस्तनभारनम्राः ॥३३॥
विमानवद् यत्र विभाति काम-मुपाश्रयः श्रीगुरुपादपूतः ।
समुद्भवद्भूरिसुपर्वशोभा(भः), सदा सुधर्मास्पदमुन्नतश्च ॥३४॥
सञ्जायमानमहनीयसुपर्ववृन्दं, सन्नन्दनं विबुधपुङ्गवसेव्यमानम् ।
दुःप्रापमल्पसुकृतेन नृभिः सुचन्द्रो-दयादिना---[विमल?]मौक्तिकजालयुक्तैः ॥३५॥
व्याख्यानशाला प्रवरा विशाला, स्तम्भावली तत्र विराजते च ।
चातुर्यसङ्घेन सुसेविता याः(या), पवित्रिता सा गणराजमुख्यैः ॥३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भयान्विता अप्यभया सदामा-श्लिष्टा अपि ध्वस्तसमामयाश्च ।
सुशीलभावाश्च सदानशीला, भावाभिरामा सदुपासकौघाः ॥३७॥
श्रद्धावान्(वत्?) पुरुषोत्तमा भुवि वराः पुण्याकराः पावनाः,
शुद्धाचारविचारसारमतयः सिद्धान्तशास्त्रे रताः ।
साधूनां सुखकारका[:] श्रुतिपरा[:] श्रीदोपमास्सर्वदा,
राजन्ते रविमण्डलाभवपुषो द्रव्येश्वराः कोविदाः ॥३८॥
अकिञ्चनत्वं शमिनां समूहे, सव्याजता [भ]क्तिभरप्रयोगे ।
पानीयपूरेऽपि च नीचमार्ग-मुपायिता यत्र तु नैव लोके ॥३९॥
तत्राऽस्ति व्रतिपुङ्गवो गणपतिः शक्रेन्द्रदेवोपमः;
वैयावृत्त्यविधायका मुनिवरास्ते सन्ति सामानिकाः ।
धर्मध्यानरतास्सदा सुखकराः श्रद्धालवो देवताः,
सर्वज्ञोदितकारिका व्रतपराः(रा) देवाङ्गनाः श्राविकाः ॥४०॥
विश्वत्रयाख्यातवराभिधाने, मनुष्यसम्पूर्णरमाभिधाने ।
श्रीतातपादाम्बुजसन्निधाने श्रीराज(जि)ते तत्र पुरे प्रधाने ॥४१॥

अथाऽत्र नगरवर्णनम् –

अनपरधनदां वदान्यमान्य-स्थितिशुचिवैश्रमणै[:] श्रितस्य नैकैः ।
कथमिव न पुरो वदन्ति यस्य, स्फुटमलकामलकायमानलक्ष्मीम् ॥४२॥
सुरपतिनगरी विमानलक्ष्म्या, भुजगपुरी सुभगैश्च भोगिवृन्दैः ।
स्फुटमिह नरलोकसारसीमा, त्रिभुवनसारमयं ततो यदस्ति ॥४३॥
जलधिरमितशङ्खसु(शु)क्तिरत्नै-र्गिरिरिव सारतराभिरौषधीभिः ।
वनमिव कुसुमोत्करैः स्फुरद्भि-र्भुवनमिवेहितसर्वलाभतो यत् ॥४४॥
न भुजगपुरी नगरी गरीयसीयं, न खलु तथाऽस्ति पुरं पुरन्दरस्य ।
नवनवविभवैर्यथा प्रथाव-द्यदिह विलासमयं स्वयं चकास्ति ॥४५॥
प्रियगृहपदवी दवीयसीव, स्तनजघनोद्धृतभारमन्थराणाम् ।
भवति च मणिकुट्टिमेषु यस्मिन्, मृदुचरणन्यसनैर्मृगेक्षणानाम् ॥४६॥
किं नुप(पू)रं? किमुत सारसनं वरेण्यं?, किं मौलिरत्नमुत कुण्डलमण्डलं वा? ।
किं दाम मौक्तिकमुत? क्षितिचञ्चलाक्ष्याः संवीक्ष(क्ष्य) वप्रमिति यत्र
वितर्कयन्ति ॥४७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विलसति परिखापरिस्कृतं यत्, [स-]परिवेषमिवाऽमृतांशुबिम्बम् ।
मरकतमणिवेश्मरूपलक्ष्म-स्फुरत(द्)मणी(णि)गृहदीध(धि)तिप्रसारम्(?) ॥४८॥

विशेषनगरे वर्णनमेतत् । सामान्य(त)स्त्वेवम्-

यत्राऽऽस्तिकाः श्रीगुरुभक्तिरागै-र्मात्रातिगै रञ्जितचित्तवस्त्राः ।
धान्यैर्धनैश्चाऽतितरां समृद्धाः, बुद्धाः सुशीलाः सततं वदान्याः ॥४९॥
श्रीतातपाददर्शन-मनोरथापूरिताङ्गिगणचङ्गात् ।
**श्रीद्वीपपुर**द्रङ्गात्, तस्मादहितैरकृतभङ्गात् ॥५०॥
भूरिभक्तिभराक्रान्तं, स्वान्तः कान्तप्रमोदभाक् ।
प्रेमोद्रेकोद्भवद्रोम-विकाराङ्कूरभृत्तनुः ॥५१॥
अकण्ठोत्कण्ठया भूमि-पीठसण्टङ्किमस्तकः ।
विनयावनम्रसर्वाङ्ग[:], सुभगंभावुकाशयः ॥५२॥
शिष्याश्रवाणुदेशीय-**धर्मादिविजयः** शिशुः ।
निवेदयति विज्ञप्तिं, कार्यमत्र यथा पुनः ॥५३॥
प्रीणाति(प्रीणन्ति) प्रमदाद् यत्र, जाते मित्रोदये ध्रुवम् ।
द्विरेफद्विजसङ्घातं, सरोजानि स्त्रवद्रसैः ॥५४॥
तत्र प्रभाते प्रध्वस्त-समस्ततिमिरेंऽशुना ।
सदसि स्फारनैपथ्य-श्राद्ध-श्राद्धीजनाश्रिते ॥५५॥
श्रीमच्छान्तरसाधीश-राजधानीसधर्मणः ।
**भगवत्यङ्गसूत्रस्य**, व्याख्यानादिककर्मणि ॥५६॥
जायमाने च सञ्जाते, परिपाट्या गतं तथा ।
श्रीमद् वार्षिकपर्वाऽपि, पर्वकृत्यं यथाविधि ॥५७॥
भावनाभिः पावनाभि-स्तथाऽभूवन् प्रभावनाः ।
निधयोऽप्यौत्सुकायन्त, यथा भवितुमर्थिसात् ॥५८॥
साधर्मिकाणां सत्तोषात्, पुष्णाति स्म जनो यशः ।
कुर्वाणो भगवत्पूजां, फलतः स्वमपूपुजत् ॥५९॥
तप्यते स्म तपश्चित्रं, विचित्रं यत् तपस्विभिः ।
दह्यते कर्मभिस्तेन, चातुरीयमलौकिकी ॥६०॥
अभवद् विघ्नसङ्घात-वियुतं संयुतं महैः ।
श्रीतातनामनिस्तुल्य-मन्त्रस्मृत्यनुभावतः ॥६१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ श्रीगुरुराजदृग्वर्णनम् –

सरस्वती चेद् विदधाति वासं, मदीयवक्त्रे धिषणां गुरुश्चेत् ।
ददाति काव्यश्च कवित्वशक्तिं, तथाऽपि न स्तोतुमलं दृशौ ते ॥६२॥
प्रपेदिवांसौ शरणीयमीशं, सारङ्गपोतौ सततं भवन्तम् ।
चक्षुर्मिषाल्लुब्धकभीतभीतौ, नभोऽङ्गणे नूनमिलातले च ॥६३॥
ध्वनिर्मृगाणामपि मोदकस्ते, संस्तूयते तैर्ननु युक्तमेतत् ।
दृक्कृष्णसारौ कथमन्यथा ते, सदाऽपि सेवां कुरुतः शमीन्दो! ॥६४॥
जगत्त्रयाभ्यर्च्य! तवाऽक्षियुग्म-द्वयेन सान्द्रं विरचय्य मैत्रीम् ।
राज्ञः प्रसादः कुमुदां समूहैः, सम्प्राप्यते किं जडजैरपीह? ॥६५॥
विनीलराजीव-चकोर-कैरव-श्रियं समादाय विनिर्मितं तव ।
जाने विधात्रा नयनद्वयं दिने, निःश्रीकते(तै)षां किमिवेक्ष्यतेऽन्यथा? ॥६६॥
कृत्वेव नेत्रद्वितयेन साकं, स्पर्द्धा(र्द्धां) शुभं(भां?) ते महनीयमूर्ते! ।
चिन्वन्ति दीप्ताग्निकणा(णां)श्चकोरा, जिहासवोऽसून् ननु तापभाजः ॥६७॥
जगत्त्रयीमङ्गलहेतुतावके-क्षणद्वयेनाऽऽप्तसमानभावतः ।
बिसारयुग्मं शुचि मङ्गलाष्टके-ऽन्तःपात्यभूत् सौच(व)कुलाश्यपीह किम्? ॥६८॥
शुभेतरार्थप्रथनप्रवीणा, त्वदृ(द्दृ?)ष्टिरेखा श्रुतिपारमाप्ता ।
मन्ये मुनीशान्तरदृष्ट्यसूया-वशेन नैर्मल्यवती च जज्ञे ॥६९॥
नाऽम्भोभरैर्नाऽपि च चन्दनद्रवै-र्न पार्वणेन्दोः किरणैः समीरणैः ।
यः शाम्यते पातकतापविप्लवः, त्वत्सौम्यदृष्ट्या ननु भक्तभूस्पृशाम् ॥७०॥
कूर्मीदृगौपम्यजुषौ(षो)स्त्वदक्ष्णोः, प्रसादपीयूषरसानुविद्धैः ।
या वीक्षणे मे भवतीह तुष्टि-र्निधानलाभेऽपि हि सा कुतस्त्या ॥७१॥
जडाश्रयादर्णवतः प्रसूते-रुक्तिर्वृथैव ध्रुवमिन्दिरायाः ।
त्वत्सौम्यदृष्टिप्रभवा तु साऽत्र, परैः सहस्रैरनुभूयते ज्ञैः ॥७२॥
त्वल्लोचनस्फूर्तिमतीव रम्यां, मुहुर्मुहुः श्रीमुनिराज! द्रष्टुम् ।
शतानि नूनं नयनाम्बुजानां, दध्रे दशेन्द्रः सततस्मितानाम् ॥७३॥
सः श्लाघनीयः समय स एव, सुवासरः सोऽवसरो वरीयान् ।
यस्मिन् भविष्यत्यनगारराट्! ते, प्रसन्नदृग्दर्शनजं सुखं मे ॥७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गुरुः कल्पवृक्षो गुरुः कामधेनुः, गुरु कामकुम्भो गुरुर्देवरत्नम् ।
गुरुश्चित्रवल्ली गुरुः कल्पवल्ली, गुरुर्दक्षिणावर्तशङ्खः पुनर्यः ॥७५॥
गुरुर्यो निशेशो गुरुर्यो महेशो, गुरुर्यः सुराद्रिः गुरुर्यो हिमाद्रिः ।
गुरुश्चक्रपाणिर्गुरुर्वज्रपाणिः, गुरुः पुष्करावर्तधाराधा(ध)रो यः ॥७७॥
गुरुः क्षीरसिन्धुर्गुरुः सिद्धसिन्धुः, गुरु(ः) पद्मबन्धुर्गुरुर्वेदगर्भः ।
गुरुर्वेश्मरत्नं गुरुर्गन्धहस्ती, गुरुः केशरी यो गुरुस्सार्वभौमः ॥७८॥
तुभ्यं नमः सकलजन्तुसुरक्षकाय, तुभ्यं नमः सुखदकल्पमहीरुहाय ।
तुभ्यं नमः शिवदधर्मसुसञ्चिताय, तुभ्यं नभः प्रवरपण्डितपूजिताय ॥७९॥
तुभ्यं नमो मुनिपमण्डलमण्डनाय, तुभ्यं नमो वरवपुर्धु(र्धर!)शर्मदाय ।
तुभ्यं नमो विशदशास्त्रविधायकाय, तुभ्यं नमो नयविदे गणनायकाय ॥८०॥
मिथ्यानिशाटे रवितुल्यतापो, धैर्येषु मेरूपमगौतमाभः ।
शीलेन जम्बू(म्बुः) सुखदः सुरागः, पाथोधिगाम्भीर्यगुणैर्गणेशः ॥८१॥
भ्रान्त्यारेकादुरितविमुक्तः, चातुर्यज्ञो वरमतियुक्तः ।
श्रीमति(मान्) साधु[ः] सुमतिसमुद्रः, सारङ्गास्यः शुभतरमुद्रः ॥८२॥
साधुभवृन्दे चन्द्रसमानो, गर्जितनादस्तर्जितमानो(नः) ।
दुःखदवाग्नौ शीतलपाथा(थो), यच्छतु सौख्यं मे गणनाथः ॥८३॥
इत्याद्यनेककोविद-परम्परावर्ण्यजाग्रदवातैः ।
स्फूर्जद्यशोऽवदातैः, श्रीतातैर्विहितजनसातैः ॥८४॥
स्वशरीरसारपरिकर-निरामयत्वाद्युदन्तसंयुक्तम् ।
तुष्ट्यै प्रसादनीयं, प्रसादपत्रं प्रसद्य शिशोः ॥८५॥
किञ्च श्रीप्रभुपादै-र्विहितानेकप्रवादिदुर्वादैः ।
नतिरवधार्या स्वशिशोः, सानुप्रणतिः प्रसाद्या च ॥८६॥

॥ इति श्रीलेखविधिः ॥

स्वस्तिश्रीप्रमदा विनम्रदिविषद्वृन्दैः पदाब्जस्थिता,
प्रल्हादादभिषिच्यते स्म नितमां प्रोद्यत्किरीटैर्घटैः ।
निर्यद्रत्नमयूखमञ्जरिजलभ्राजिष्णुभिः किं जगद्-
भर्त्तुर्यस्य पदोन(नं)खांशुकुसुमश्रेणीमनोहारिभिः ॥१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्तिश्रीमुकुरस्थलान्यनुदिनं यत्पादकामाङ्कुशान्,
नम्रानेक नरा-ऽमरा-ऽसुरवराः प्रोत्तेजयन्ति ध्रुवम् ।
भूयिष्ठैर्मुकुटोपटङ्किविलसन्माणिक्यशाणोपलै-
र्मालिन्यभ्रममालिनः प्रसृमरैर्मौलीन्द्रनीलांशुभिः ॥२॥
स्वस्त्यब्धिजा यद्वदनारविन्द-सरस्वतीमन्दिरमाप्य मोदम् ।
दधावसाधारणमात्मशत्रु-स्थानोपलब्ध्येव सदालिसेव्यम् ॥३॥
स्वस्त्यब्धिजा यमधिपं भजति स्म मोदान्-नम्राऽमरा-ऽसुर-नरावलिसेव्यमानम् ।
बद्ध्वा(ह्वाः)दरं निजसुतस्य जनार्त्तिदस्य, प्रध्वंसने किमुत सान्त्वयितुं स्मरस्य ॥४॥
स्वस्त्यब्धिजा सौवपतिभ्रमाद् यं, शिश्राय सच्चक्रविराजमानम् ।
तथा जगन्नाथमदिष्टकूट-विघट्टकं व्यूढबहुक्षमाभरम् ॥५॥
विनिर्मिमाणः परपङ्कजा तेऽरतिं वलक्षोभयपक्षशाली ।
सन्मानसे स्वं रचयन्निवासं, यो हंसवद् भाति युतो मराल्या ॥६॥
समीरणे गन्धगुणस्य सत्ता-मसाधयत् स्वश्वसितानिलेन यः ।
घ्राणेन्द्रियाध्यक्षसुमाद्युपाधि-व्यपेतसौगन्ध्यभृता जगन्नृणाम् ॥७॥
प्रोद्भूतसान्द्रतरपापभरं स्मरा(रः?)स्त्री-भूयःप्रभूतभवभृत्परिपीडनेन ।
मन्ये निवेदयितुमाश्रितवान् मुनीशं, किङ्केल्लिवेषविगलद्वृजिनं जिनं यम् ॥८॥
यद्देशनावनितले त्रिदशैर्विकीर्ण-श्चञ्चत्प्रसूननिकरः परितो व्यराजत् ।
श्रीमज्जिनाननविधोर्विलसत्सदस्या-ऽऽनन्दोदधेः किमुदितोज्ज्वलमौक्तिकाली ॥९॥
आकण्ठपीतनवयद्वचनामृतेन, तृप्तं निकाम[म]भरप्रकरं निरीक्ष्य ।
जानन् सुधां करभवैर्ननु भारकल्पां, चन्द्रः क्षितौ क्षिपति तस्य करे धृतां स्वाम् ॥१०॥
यस्य प्रभोरुभयतः शरदभ्रशुभ्र-भ्राजिष्णुभाभरधरौ वररोमप(षि)च्छौ ।
सद्दण्डमण्डलत_पतियुग्मपिण्डी-भूतांशुपल्लवचयाविह रेजतुः किम् ॥११॥
शश्वत्त्रिकालविदुपासनसादराणां, स्वःसद्मनां सुरगिरिः स्वनिवासभाजाम् ।
आगाद् विधातुमिह शुद्धमिभारिपीठे, यस्मिन् विभौ स्थितवतीति वितर्कयन्ते ॥१२॥
अण्वादिसूक्ष्मतमभावविकाशनेऽपि, सर्वज्ञा(ज्ञ)राट्! घटय मां यदुशक्तियुक्तम् ।
विज्ञप्तुमित्युपगतस्तमसामराति-र्भामण्डलस्थ(च्छ)लधरः किल यत्समीपम् ॥१३॥
दिव्यध्वनिर्दैवतदुन्दुभिर्यत्-पुरस्तथा व्योमनि दंध्वनीति ।
यथा स्थिरीभावमुपैति शब्दा-द्वैतप्रवादिप्रकरप्रतिज्ञा ॥१४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यस्याऽनुमौलिविलसद्रविजालभाञ्जि, प्रोद्भ्रान्त्यतीवविशदातपवारणानि ।
किं ज्ञान-दर्शन-चरित्रहरिप्रियाणां, केल्यम्बुजानि तिलकान्युत चन्दनानि ॥१५॥
यस्येशितुः श्वसितनित्यगतिः प्रकामं, सौगन्ध्यबन्धुरतरः सततं विभाति ।
वक्त्रान्तरस्थरदनाङ्कुरकुञ्जराजी-रोचिष्णुभूरितरसौरभसन्निधेः किम्? ॥१६॥
देहः श्रीजिनभास्वतो निरुपमः कान्त्याऽपि सौरभ्यतः,
स्वेदेनाऽपि मलेन वर्जिततया धत्ते श्रियं काञ्चनीम् ।
स्वर्णं तेन कषोपलेन नितरां संघृष्यते वह्निषु,
स्वात्मानं च जुहोति लज्जितमिव ब्रूते कदाचिन्न वा ॥१७॥
तं श्रीमन्तममेयगेयमहिमामुक्तौघमुक्ताकरं,
नृणां कामितपूरणे सुरमणिं मर्त्यौघभद्रङ्करम् ।
श्रीमद्**योधपुराव**नीसुनयनीसद्भालभूप्राकरं,
नत्वा श्रीधरणेन्द्रसेवितपद**श्रीपार्श्व**तीर्थङ्करम् ॥१८॥

*॥ इति श्रीसाधारणजिनद्वादशगुणवर्णनम् ॥१॥*

अथ तदेव देवजिन(जिनदेव)गुणस्तुति[:] पाठान्तरे लिख्यते-

स्वस्तिश्रीसदनं विनम्रदिविषत्कोटीरकोटीघट-
ज्योत्स्नाम्बुस्नपितोल्लसत्पदपयोजन्मद्वयश्रीर्जिनः ।
निर्जित्य त्रिजगत्समक्षमसुमदुःखाकरं यः स्मरं,
द्वैष्यं लक्ष्मिषाद् बिभर्त्ति मकरं केतुं तदीय(यं) ध्रुवम् ॥१॥
जगत्प्रतीक्ष(क्ष्य)स्त्वमहं तु पामरी-पादाभिघाताधिसहः किमेयम्? ।
अशोकभावे सदृशेऽपि चाऽऽवयो-र्यमित्युपेतो गदितुं त्वशोकः ॥२॥
यद्देशनासद्मनि सूनवारैः(रः), सुरैर्विकीर्णः परितो व्यराजत् ।
श्रीमज्जिनेन्दोर्विलसत्सदस्या-नन्दाम्बुधेरुद्गतमौक्तिकाः किम्? ॥३॥
सुधातिरस्कारगिरा यदीयया, तापापनोदे विहिते जगन्नृणाम् ।
तापः पदं किं क्वचिदप्यनाप्नुवन्, पपात वार्द्धौ वडवानलच्छलात् ॥४॥
यत्पार्श्वयोर्वैबुधवीज्यमाना, विभाति वालव्यजनावली सिता ।
पलायमानस्य विधुन्तुदाद् विधोः, स्रस्तांशुकानां ननु धोरणीव ॥५॥
ददद् बुधानाममृतं सिताभ्र-भ्राजद्वपुःश्रीरजनिप्रियश्च ।
योऽभान्मृगेन्द्रासनसंनिविष्टः सुमेरुसानाविव पूर्णिमेन्दुः ॥६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मितार्थदर्शी मितितीतवस्तु-प्रकाशिनः श्रीजगदीश्वरस्य ।
पृष्टेऽविशद् यस्य सहस्ररश्मि-स्त्रपातिरेकादिव भाभरच्छलात् ॥७॥
यस्याऽभिरामं सुरदुन्दुभिर्ध्वनन्, पुनः प्रभोम(र्म)ङ्गलपाठकायते ।
भूयिष्ठमोहप्रबलप्रमीला-विलुप्तचैतन्यनृणां प्रबोधने ॥८॥
समागतानां जगदीशरूप-प्रेक्षाकृते त्रैधजगद्गमाणाम् ।
विभान्ति नूनं तिलकानि चान्दना-नीवाऽऽतपत्राणि यदीय मौले(लौ) ॥९॥
यस्य त्रिलोक्यप्रतिरूपरूपा-भ्यसूयिनं चेतसि चिन्तयित्वा ।
किमङ्गजं भूरि रुषा भवानी-पतिः स्वभालानलगोचरं व्यधात् ॥१०॥
हृदाननाम्भोरुह-दन्तकुन्द-प्रसूनसौरभ्यभराभिसङ्गात् ।
सौगन्ध्यसारः श्वसितानिलः किं, संसक्तमाभाततरां यदीयः ॥११॥
अन्तःस्फुरत्सर्वगसारशुक्ल-ध्यानप्रसारिप्रभयेव नित्यम् ।
गोक्षीरवत् पाण्डुरमामिषं तथा रक्तं यदीयं किमु भाति देहे ॥१२॥
आहार-नीहारविधिर्यदीया, पश्यन्ति नो कर्ह्यपि चर्मचक्षुषः ।
चित्रं महद् वा तनुदुष्टगन्धा-दिकस्वकार्याजनकत्वतो ह्रिया ॥१३॥
वप्रैस्त्रिभिर्मणि-सुवर्ण-सुरूप्यजातैः, श्रीमान् विभाति नितमां शरणागतैर्यः ।
भीतैर्भृशं शिखरिपक्षभिदः सुरेन्द्रात्, किं रोहणार्जुनगिरि(रि)स्फटिकावनीध्रैः ॥१४॥
यस्येश्वरस्य परमाप्रतिरूपपुण्य-प्राग्भाररञ्जितमनाः क्षितिकामिनी किम्? ।
सन्दर्शयत्यनुपदं नवकं निधीनां, सौवर्णवर्णकमलच्छलतो विहारे ॥१५॥
यः पापनभ्राड्हृतिदैत्यदेवः, स्मरस्मयध्वंसनवामदेवः ।
नमन्मनुष्यामरपूर्वदेवः, कैवल्यमाक्रीडनवामदेवः ॥१६॥
निरस्तरोषादिकदुर्विकारः, विनिर्मिताशेषजनोपकारः ।
प्रणीतनिर्बाधनयः(य)प्रकारः, स्वधीरतामेरुकृतानुकारः ॥१७॥ युग्मम् ॥
निःस्सीमसौन्दर्यमहो! यदीया-ना(न)नारविन्दस्य विभाति निस्तुलम् ।
यन्मोहिते यत्र (तत्र) मिथो विरोधा-न्विते स्थिते श्रीश्रुतदेवतेऽपि ॥१८॥
यद्वागप्रतिस्पर्द्धिनमम्बुजन्मा-सनः समन्तुं समवेत्य रज्जुभिः ।
किं चन्दनद्रुं भुजगैर्नियम्य, क्रुधाऽक्षिपद् रोहणकन्दरीषु ॥१९॥
यत्पादयोर्नम्रसुरासुराणां, भ्राजिष्णुकोटीरततिच्छलेन ।
यदास्यसौन्दर्यरमातिरस्कृता(ताः?), पतन्ति नूनं कमलिन्यधीशाः ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनोवनान्तेऽशुभवारणानां, दुष्कर्मणां भीर्न भवेत् तदीये ।
स श्रीजिनेन्द्रो मृगराट्(ड्)निवासं, करोति यस्मिन्नुरुविक्रमाढ्यः ॥२१॥
सदाऽमरालीप्रमदं ददाना(नः), सन्मानसान्तर्विहितस्थितिश्च ।
मनोज्ञयानः शुचिपक्षशाली, यः श्रीजिनो भाति सितच्छदाभः ॥२२॥
प्रणम्य तं प्रीणितचित्तरामं, विपद्यमीनिर्दलनैकरामम् ।
जिनाधिपं मुक्तसमग्ररामं, **श्रीपुष्पदन्तं** सुगुणाभिरामम् ॥२३॥

*॥ इति श्रीजिनमूलद्वादशगुणकलितसाधारणस्तुतिः ॥*

स्वस्तिश्रियो यत्पदपद्मकेली-निवासमासाद्य मुदं लभन्ते ।
स्थानाधिवासाधिगमान्न को वा, प्रमोदमासादयति प्रतीतम्? ॥१॥
स्वस्तिश्रियो तत्पदपङ्कजस्यो-पचारकाणामुपलब्धिरिष्टः ।
एवोद्ध्वरेखाकृतिरत्नराशि-र्न्यासीकृते वासवती यदस्मिन् ॥२॥
स्वस्तिश्रियः चारुनिवासयोग्यं, पदद्वयं नीरजमेव यस्य ।
दिवानिशं स्मेरमपङ्कजस्य, निष्कण्टकं चाऽत्र यदेतदेव ॥३॥
स्वस्तिश्रियश्चारुपदं यदंह्री, धाता विधानादित एव मेने ।
यत्पद्मवासाभिधया च तस्याः, तयोश्च पद्मव्यु(व्य)पदेशिताया: ॥४॥
स्वस्तिश्रियः शोणिमरम्यहेम-कूर्माविव क्रीडनकामनायाः ।
भातः प्रभोर्यस्य पदावुदारौ, जिनः स वः पापमपाकरोतु ॥५॥
स्वस्तिश्रिया पङ्कजदीर्घवासाद्, विरक्तया प्राप्य पदावमोदि ।
विरागिणी पल्व[ल]तो मराली, स्ववापिकामाप्य यथैव दृप्येत् ॥६॥
स्वस्तिश्रियश्चारुविचारिताहो, स्त्रियोऽपि यत्(द्) यत् पदमाददाति ।
पद्मं न किञ्चित् पदलक्ष्मिरूपं, निरुक्तिबाधादवधारितार्था ॥७॥
स्वस्तिश्रिया राजति यत्क्रमाम्बुजे, रेखाऽतिदीर्घा विदुरेण वेधसा ।
चक्रे विचिन्त्येति पुमानतः परं, कोऽप्यस्ति **विश्वत्रितये**ऽपि नोत्तमः ॥८॥
स्वस्तिश्रीतटिनी प्रादु-र्भूता यस्मात् क्षमाता(?) ।
दा(आ)नन्दयति सत्त्वानां, तृष्णाकुलितचेतसाम् ॥९॥
स्वस्तिश्रीभुजगस्याऽपि, यस्य विश्वातिशायिनी ।
ब्रह्मचारी(रि)धुरीणेषु, कीर्त्तिः कामं विजृम्भते ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्तिश्रीताम्रपर्णीनां, मणीव किल यः प्रभुः ।
युक्तं मुक्तावलेर्मध्य-भागेऽस्य श्लाघ्यते स्थितिः ॥११॥
स्वस्तिश्रीश्रेणिकर्त्तारं, धर्त्तारं सर्वसम्पदाम् ।
लोकत्रितयभर्त्तारं, पार्श्वनाथजिनं स्तुमः ॥१२॥
स्वस्तिश्रियं सदा पुष्या-दसङ्ख्यातगुणोदधिः ।
पद्मा-नागेन्द्रसंसेव्यः, **श्रीपार्श्व**जिनपुङ्गवः ॥१३॥

स्वस्तिश्रीमति तीर्थपे मतिरसावस्मादृशां खेलतु,
प्रोच्चैः प्रीणितमेव_ _मधुलिट्सीमन्तिनीपङ्कजे ।
योऽरक्षच्छरणागतां भवभराद्भीतां शरण्याग्रणीं(णीः?),
संस्थाप्य स्वपदे प्रसन्नवदनां राजीमतीं सर्वदा ॥१॥
त्यक्त्वा राजीमतीं यः स्वनिहितहृदयामेकपत्नींसुरूपां,
सिद्धिस्त्रीं भूरिरक्तामपि बहु चकमेऽनेकपत्नीमपा(पी?)शः(?) ।
लोके ख्यातस्तथाऽपि स्फुरदतिशप्यान(?) ब्रह्मचारीति नाम्ना
स श्री**नेमि**र्जिनेन्द्रो विशतु शिवसुखं सात्वतां योगिनाथः ॥२॥
नेमिं जियं (जिनेन्द्रं) प्रणमन्ति देवाः, सेन्द्रा नरेन्द्रा अपि सिद्धिसंस्थम् ।
साक्षाददृश्यं प्रतिमानिवेशा-दादर्शवासादिव नेत्रवक्त्रम् ॥३॥
सुरयुतरजताद्रिः पर्वतश्चाऽऽञ्जनः किं, विमलसुरनिवासा कृष्णराजिश्च नूनम् ।
विशदवनयुतः किं राजते रत्नसानुः(नु)-स्तदुपमपुरपार्श्वे **रैवतः** शृङ्गिनाथः ॥४॥
स्वस्तिश्रियः पदमदः पदपुण्डरीकं, श्रीकण्ठहासयशसः शशभृन्मुखस्य ।
श्री**त्रैशलेय**जिनपस्य निपस्य शान्तेः,
शान्ते(श्रान्ति?)च्छिदे भवतु वो भवतापजायाः ॥१॥
स्वस्तिश्रियं श्रीजिनवर्द्धमानः, पुष्णात्वनुष्णांशुयशा[:] प्रशस्याम् ।
विश्वत्रयं स्वच्छरसा पुनाति, यदीयगीः स्वर्गतरङ्गिणीव ॥२॥
श्रीमद्वीरजिनं जनैकशरणं सिद्धिश्रिया(यः) कारणं,
श्रीसिद्धार्थनरेन्द्रनन्दनवनं तीर्थङ्करं तारणम् ।
शास्तारं त्रिशलोदराभ्रशशिनं सौवर्णवर्णं स्तुवे,
पूज्यं सम्प्रति शासनेश! सुखद(दं) देवेन्द्रवन्द्यक्रमम् ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सान्द्रानन्दनमन्नरेन्द्रविबुधाधीशालिमौलिप्रभा-
भास्वत्(द्)यत्प्रतिबिम्बदम्भित इवाऽनेकस्वरूपो विभुः ।
उद्धर्तुं जगदेव [यो] भवमहापङ्कात् कृपावारिभिः,
श्रीमच्छांवान(च्छासन)नायकः स तनुतां श्रीवर्द्धमानः श्रियम् ॥४॥
श्रीवर्द्धमानस्य जिनस्य यस्या-ऽप्यासाद्य विद्यां हृदि वर्द्धमानाम् ।
भवन्त्यनेके भुवि वर्द्धमानो-दयास्तदाराधनसाधनस्था(स्थाः) ॥५॥
क्षमावतामीश! मम प्रदेहि, क्षमागुणं येन भवाम्यनर्घ्यः ।
हस्तीव विज्ञप्तुमनाः किमेवं, लक्ष्मच्छलाद् यं मृगराट् समेतः ॥६॥
यस्मादनन्तेन बलेन शालिनः, स्फूर्जद्बलं याचितुमाजगाम ।
विजेतुकामः शरभं स्वशत्रुं, कण्ठीरवोऽङ्कव्यपदेशतः किम्? ॥७॥
स्वप्नेऽपि सर्वेष्वपि मुख्यनो(ता) मे, माताऽमुमेव प्रविशन्ति(न्त)मास्ये ।
अपश्यदस्थापयदात्मपार्श्व-मतः किमङ्काङ्गगजद्विषं यः ॥८॥
मृगारिनाम्नाऽपशदेन मेऽलं, गजारिनामैव सदस्तु देव! ।
सुगोत्रदायिन्नितु(ति) वक्तुमागात्, सिंहो यदभ्यर्णमिवाऽङ्कलक्षात् ॥९॥
स्वस्तिश्रियां परं धाम, काममक्षयकामितम् ।
अतुच्छं यच्छतान् (यच्छता)च्छ्रीमत्-त्रैशलेयक्रमद्वयम् ॥१०॥

*॥ इति वीरस्तुतिः ॥*

स्वस्ति[श्री]सदनं विनम्रदिविषत्कोटीरकोटीघट-
ज्योत्स्नाम्बुस्नपितोल्लसत्पदपयोजन्मद्वयश्रीर्जिनः ।
निर्जित्य त्रिजगत्समक्षसुमहद्दुःखाकरं यः स्मरं,
द्वैष्यं लक्ष्मामिषाद् बिभर्त्ति मकरं केतुं तदीयं ध्रुवम् ॥१॥
स्वस्तिश्रीभवनस्य यस्य जगतीभर्तुः द्विपादीपुरः-
क्रीडन्नाकिनिकायनायकशिरःस्रस्ता(स्त)प्रसूनव्रजैः ।
व्याख्यापर्षदि निर्विशेषमुदयत्तत्सङ्गरङ्गच्छलात्(द्),
जायन्ते स्वरसेन भोगिसुभगाः सर्वेऽपि वन्दारवः ॥२॥
**पुष्पदन्त**मभिनम्य विनिद्रा, नन्दताऽऽप्य नवमं नवमं तम् ।
वीतरागमथअवेतमनन्तं(?), ब्रह्मवीर्यसुखदर्शनरूपम् ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्तिश्रीनिलयं भेजे, चा(वा)सवो यं सनातनम् ।
**पार्श्वः** पुनातु वः श्रीमान्, नितरां हितकारकः ॥१॥
लेभे यत्करुणादृशैव धरणो नागाधिपत्यं फणी,
शुश्रूषा-प्रणति-स्मृति-स्तुतिफलं वक्तुं समर्थः कथम्? ।
योगिध्येयपदावधिं निरवधिं ध्यायामि शुद्धाशयः,
सान्निध्यं विदधानमुद्यमवती स्वाभीष्टकृत्यैरपि ॥२॥
पार्श्वमीश्वरमुपास्तकषाया-द्यन्तरङ्गरिपुवर्गमसङ्गम् ।
अश्वसेननृपवंशदिनेशं, तं प्रणामपदवीमधिरोप्य ॥३॥
स्वस्तिस्वस्तटिनीतटीश्रितरतिस्सर्वज्ञहंसोत्तमः
श्रेयःश्रीनलिनी(नीं) विभूषयतु वः सोऽच्छच्छविः सन्नतम्(तः) ।
यद्वाणी सुभगा पवित्रचरिता सद्दर्शनानन्दिनी,
सद्वर्णा वरवर्णिनीव रमते भव्यांशुभाजां हृदि ॥१॥
निर्मातुं किल यस्य मूर्त्तिमतुलां चक्रे पयोजन्मभूः,
प्राक् पीयूषमयूखमुख्यनिवहानभ्यासहेतुर्भुवि ।
नो चेत् तत्र समानवस्तुकरणे को हेतुरास्ते यतः,
स्यान्न क्वाऽपि कदाचिदेव महतां प्रायः प्रवृत्तिर्वृथा ॥२॥
रणरणककदम्बप्रोल्लसद्रोमराजी, प्रणमति पदयुग्मं प्राञ्जलिर्निर्जराली ।
नयनपुटनिपेयं दर्शनं युष्मदीयं, सृजति च सुरवर्गात् तं पुरोगं प्रतीमः ॥३॥
वदनविजितचन्द्रः सर्वदा पूर्णभद्रः, प्रविगलदघनिद्रः पुण्यकर्मापतन्द्रः ।
नमदमरमहेन्द्रः क्षुद्रभेदी समुद्रः, मदनमथनरुद्रः शर्मसम्पत्समुद्रः ॥४॥
यन्नामधेयस्मृतिमात्रतोऽपि, क्षणेन दुष्टाष्टमहाभयानि ।
नश्यन्ति भव्याङ्गभृतां नितान्तं, वारीन्द्रनादादिव दन्तिपूगाः ॥५॥
जिनो **द्वितीयो** जगदद्वितीयो, योऽदाज्जयं मातुरुदग्रशक्तिः ।
मणिर्न तेजः किमु मुद्रिकायाः, गर्भे स्थिते श्लाघ्यतम(मं) प्रदत्ते ॥६॥
ददाति यः **सुमतिर्म**तिः(तिं) सतां, स्वकीयनामग्रहणोद्यतानाम् ।
अन्वर्थनामा सुरवृक्ष-चिन्ता-रत्नाधिकेभ्योऽप्यधिकप्रभावः ॥१॥
एतान् जिनान् कामितकामकुम्भान्, विश्वत्रयीशान् गतसर्वदम्भान् ।
कल्याणवल्लीवरवारिवाहान्, प्रमादहर्यक्षितिहव्यवाहान् ॥२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तान् श्रीजिनान् नाभितनूज-शान्ति-वामेय-सिंहाङ्कजिनाधिनाथान् ।
नीत्वा नुतेर्मार्गममेयमोद-कृत्प्रातिहार्यप्रभुतासनाथान् ॥३॥
स्वस्तिश्रीसुखदं सदा गतमदा(द:) **श्रीशान्तिनाथं** मुदा,
वन्देऽहं विबुधावलीनतपदं श्रीवि[वै?]श्वसेनं सदा ।
कल्याणावलिवल्लिपल्लवकरं कारुण्यकेलीगृहं,
विश्वानन्दपदं सदोदयमयं मोहान्धकारे रवि:(विम्) ॥१॥
य: स्वस्तिलक्ष्मिललनामधुपीपरीतं,
मातङ्गराजगतिमङ्ग समीक्ष्य हर्षात् ।
मेध्यं सदा कविवरा प्रवदन्त्यहो द्राक्,
श्रीमान् स शान्तिरचिराततनुज: सुखाय ॥२॥
स्वस्तिश्रियं दिशतु वो जिनभानुमाली, श्रीवैश्वसेनिरनिशं शिवकृन्नराणाम् ।
अप्युल्लसत्सकलभूतिभराभिराम:, चित्रं सदा भव इहाऽभवदीश्वरो य: ॥३॥
भीतिर्ममाऽत्र गगने वसतस्तमोजा, भूमौ च केसरिभवा प्रबला सदोग्रा:(ग्रा) ।
सञ्चिन्त्य चेतसि निजे हरिणोऽयमीशं, लक्ष्मच्छलादविरतं भजतेऽपनेतुम् ॥४॥
नित्यं वनाश्रयनिर्वासमनङ्ग! येऽमी, निघ्नन्ति शुष्कतृणनिर्झरनीरखल्व(वृत्तिम्?) ।
तेषां गति: परभवे भविता मृगांक:(ग: का), प्रष्णुं(ष्टुं) यमीशमिति लक्ष्ममिषात्
किमे(मै)त ॥५॥
दोषाकराच्छशधराद् घनजाड्यभाजो, नित्यं कलङ्कमलिनान्नमृ(नृ)जुत्वदुष्टात् ।
मुक्तिर्ममाऽऽशु मुनिराज! विधेह्यमुष्मात्(द्), विज्ञप्तुमेणमिह(मेण इह)
लक्ष्ममिषात् किमे(मै)त ॥६॥
गवां विलासैरमृतद्रवैक:, सम्प्रीणयन् विश्वविशेषमप्यलम् ।
कलाभि..... तमस्तति, योऽभून्मृगाङ्क: किल साम्प्रतं तत् ॥६॥
गवां विलासैरमृतद्रवैक:, प्रीणाति विश्वावलयं समस्तम् ।
तमस्ततिध्वंसनबद्धकक्षो, युक्तं जिनेन्दुर्ननु यो मृगाङ्क: ॥७॥ पाठान्तरम् ॥
दृग्गोचरीकृत्य सुदृग्समूहै:, सर्वैरहंपूर्विकयाऽर्चनीयम् ।
सद्दृष्टिषु प्राग्रहर: कुरङ्ग:, किं पर्युपास्तेऽङ्कनिभाद् यमीशम् ॥८॥
अह्नाय मातङ्गपदापहारिणी(णं), तथा महानादपराक्रमाद्यम् ।
विलोक्य यं सौवपतिं मृगोऽङ्क-व्याजादुपेत: किमु सेवनाय ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निरागसं मामपि केन नाथ!, दुष्कर्मणा घ्नन्ति नृपादयोऽपि ।
प्रष्टु(ष्टुं) किमित्यागतवान् यदीय-समीपमेणोऽङ्कमिषात्तमूर्त्तिः ॥१०॥
नोल्लासकारी कुमुदां न दोषा-करश्च नित्योदयदीप्यमानः ।
न पक्षपाती क्षयभाग्वपुर्नो, तथाऽपि चित्रं मृगलाञ्छनो यः ॥११॥
दैवज्ञशास्त्रेषु न केष्वपि श्रुतः, कुरङ्गभृच्छान्तिकरश्च षोडशः ।
योऽर्हन् पुनर्दृश्यत एव साक्षा-च्चित्रं मृगाङ्कः शिवदोऽपि षोडशः ॥१२॥
शान्तं शिवं शिवकरं करुणानिधानं, निस्सीमसत्त्वसदनं कृतदेवमानम् ।
श्रीविश्वसेननृपवंशवियद्न(ग)भस्ति(स्ति-न)र्नत्वा जिनं विनयतः प्रणत-
भूर्वर्गम् ॥१३॥

निःसीमसौभाग्यमनोरमां यद्-विलोचनद्वन्द्वरमां निभाल्य ।
त्रपातिरेकात् कुवलयावली ध्रुवं, निजाननं दर्शयति स्म रात्रौ ॥१३(१४)॥
॥ इति जिनस्तुतिः ॥

अथ नगरवर्णनम् –

विराजमानं सुमनस्ततीना-मधीश्वरैर्भूरिजयावदातैः ।
महेश्वरैर्नैकशिवाभिरामै-र्निभाल्य यत् किं स्पृहयन्ति नाकम्? ॥१॥
निरीक्ष्य निःशेषपुरीगरीयः-सौन्दर्यसर्वस्वहरस्वरूपम् ।
यदीयमाशङ्कितमानसा किं, स्वःसत्पुरी मेरुगिरौ निलीना ॥२॥
असन्निभेन स्वकवैभवेन, नीता पराभूतिमतीव लङ्का ।
तज्जैत्रमन्त्रं लहरीनिनादै-र्नूनं जपन्तीत्यम्बु वगाह्य भूयः ॥३॥
कुबेरलोकैः कलिताऽलका किं, कदापि साम्यं समुपैति यस्य ।
श्रीनन्दनोद्यत्तनुसुन्दरत्व-विराजि भूयो जनतान्वितस्य ॥४॥
सुवर्णगेहं भरतावनीप-प्रियं वी(वि)नीताख्यपुरोपमं यत् ।
सुमङ्गलोद्भूतसुताभिरामं, सत्सुन्दरीकं प्रविराजतीह ॥५॥
श्रीवर्द्धमानप्रभुराजधानी-लसद्गुणश्रेणिकलोककान्तम् ।
धत्ते तुलां राजगृहाभिधस्य, द्रङ्गस्य यद् विश्रुतचैत्ययुक्तम् ॥६॥
भयङ्करैर्भोगिभिरावृताङ्गा, सद्वल्लभैर्भोगिभिरावृतेन ।
येनाऽभ्यसूयाघटनोत्थपापात्(द्), भोगावती श्वभ्रतले पपात ॥७॥
परःसहस्रैस्तुरगैः समृद्धं, दृष्ट्वा परोलक्षवसुप्रभुं च ।
यं नव्यसूरं त्रपयाऽब्धिपातं, करोति सूरोऽल्पतुरङ्गमा – ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यच्छास्ति निर्विघ्नमनेकभूभृ-न्निषेव्यमानांह्रिसरोजयुग्मः ।
यथार्थनामाऽसहनद्विपेन्द्र-वित्रासकृत् **श्रीगजसिंहराड्** सः ॥९॥
यत्राऽर्हतालङ्कृतिसिंहमल्लः, श्रीमान्नमात्यद्विप**हस्तिमल्लः** ।
श्रीजैनराज्यं जनयत्युदार-मेकातपात्रं निजदेशमध्ये ॥१०॥
किं नूपुरं कुण्डलमण्डलं वा? किं मौलिरत्नं क्षितिचञ्चलाक्ष्याः? ।
किं वा कटीसूत्रमिति प्रबुद्धा, यद्वप्रमालोक्य वितर्कयन्ति ॥११॥
प्रासादवृन्दैर्विशदैर्यदीयै-र्गृहीततुङ्गत्वरमाः प्रकामम् ।
रुदन्ति गौरीगुरुमुख्यशैलाः, किमु श्रवन्निर्झरकैतवेन? ॥१२॥
यदुच्चचैत्यैः सह शत्रुभावः, शिलोच्चयैर्यद् रचितोऽतिमात्रम् ।
तत्पक्षभङ्गः किमिव व्यधायि?, क्रोधादमीषां दिविषद्वरेण ॥१३॥
समीरसङ्गप्रचलत्पताका-करैः किमाह्वानविधिं सृजन्ति ।
दिग्वारणानां सुहृदां यदीय-प्रासादराज्यः कमनीयरूपाः ॥१४॥
अनेकसत्त्वोपकृतिं क्षमायाः, प्रभूतभारोद्धरणेन नित्यम् ।
कुलाचलाः सप्त वितन्वते यत्-प्रासादसादृश्यगुणाप्तये किम्? ॥१५॥
प्रवीज्यमानः सुरचामराली, प्रोक्षिप्तधूमोद्भवधूमलेखा ।
विराजते सूर्यसुता सुरेश-स्रोतस्विनीसङ्गममुत्सुकेव ॥१६॥
चैत्योच्छलन्निर्मलधूपधूम-स्तोमान्नतुच्छान्नभितः समीक्ष्य ।
अभ्रंलिहान्नभ्रततिभ्रमेण, शब्दायते चातकचक्रवालम् ॥१७॥
सुधोज्ज्वलस्वल्पनिवासभास्वत्-प्रासादसौवर्णनिपांशुजालैः ।
न स्वैरिणीलोकसमक्षपक्ष-क्षणः कदापीक्ष्यत एव यत्र ॥१८॥
सच्चन्द्रशालासु विलासिनीनां, निशामुखे खेलनकारिकाणाम् ।
वक्त्राणि यस्मिन् गगनारविन्द-भ्रान्तिं वितन्वन्त्यपि तार्किकाणाम् ॥१९॥
कैलासवद् यत्र विभाति साध्वा-लयः स्फुटं वै श्रमणेन युक्तः ।
भृतस्तथा पुण्यजनैस्तु चित्रं, न षण्ढ-गौरी-पशुक्लृप्तवासः ॥२०॥
निःसीमसौन्दर्यरमातिरेकं, यत्सुन्दरीणां नितरां निरीक्ष्य ।
झम्पा ददुर्वारिनिधौ सुराणां, सरोजनेत्राः किमिव त्रपातः ॥२१॥
आदर्शसङ्क्रान्ततदाकृतिर्य-न्मृगीदृशां नूनमुपैति साम्यम् ।
वक्त्रस्य नैवेन्दुसरोजमुख्याः, कलङ्कितामुद्भटदोषदुष्टाः ॥२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदङ्गनानामसरूपरूपं, दृष्ट्वाऽन्यरूपश्रियमाददानम् ।
कामः सकान्तः शरणीचकार, ता एव तूर्णं ननु भीतभीतः ॥२३॥

श्रीमद्गुरूपासनबद्धरङ्गा, सुरा इव श्राद्धवरा यदीयाः ।
सदामृतेहाः क्षितिमस्पृशन्त-स्तथा पदात्यद्भुतसौख्यलीनाः ॥२४॥

जनांश्च यस्मिन् विपिनः(न)प्रदेशान्, व्यालोक्य सन्पुण्यफलोदयाद्यान् ।
प्रमोदमेदस्विलता भजन्तो, केषां न चेतांसि सुमाभिरामाः ॥२५॥

अकिञ्चनत्वं शमिनां समूहे, सव्याजता भक्तिभरप्रयोगे ।
पानीयपूरेऽपि च नीचमार्गा-नुयायिता यत्र तु नैव लोके ॥२६॥

विश्वत्रयाख्यातवराभिधाने, मनुष्यसम्पूर्णरमाभिधाने ।
श्रीतातपादाम्बुजसन्निधाने, श्रीराजिते तत्र पुरे प्रधाने ॥२७॥

यत्राऽऽस्तिका श्रीगुरुभक्तिरागै-र्मात्रातिगै रञ्जितचित्तवस्त्राः ।
धनैश्च धान्यैर्नितरां समृद्धाः, शुद्धाः सुशीलाः सततं वदान्याः ॥२८॥

श्रीतातपाददर्शन-मनोरथाऽपूरिताङ्गिगणचङ्गात् ।
**श्रीनागपुरद्रङ्गात्**, तस्मादहितैरकृतसङ्गात् ॥२९॥

सद्भक्तिभराक्रान्त-स्वान्तः प्रादुर्भवत्प्रणयकान्तः ।
विनयावनम्रमौलि-र्मौलीकृतचारुकरयमलः ॥३०॥

विधिवत्तरणिप्रमिता-वर्तैरभिवन्दनैः समभिवन्द्य ।
**चारित्रविजयः** शिष्यो, विज्ञपयति कृत्यमिह च यथा ॥३१॥

प्राचीदिग्भालस्थल-कौङ्कुमतिलकाभभानुमत्युषसि ।
सुमहेभ्यसभ्यभविजन-राजिभ्राजिष्णुतरसदसि ॥३२॥

श्रीमच्छन्तरा(र)साधीश-राजधानीसधर्मणः ।
श्रीअमुकाङ्गसूत्रस्य, व्याख्यानादिककर्मणि ॥३३॥

जायमाने च सञ्जाते, परिपाट्यागतं तथा ।
श्रीमद्वार्षिकपर्वाऽपि, पर्वकृत्यपुरस्सरम् ॥३४॥

अभवद् विघ्नसङ्घात-वियुतं संयुतं महैः ।
श्रीतातनामनिस्तुल्य-मन्त्रस्मृत्यनुभावतः ॥३५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ गुरुवर्णनम् –

दत्ते पतिश्चेद् रसनाः फणीना-मायुर्विधिर्वा धिषणश्च मेधाम् ।
काव्यस्य शक्तिं दितिजन्मसूरि-स्त्वां स्तोतुमीशस्तदपीह किं स्याम्?॥१॥
पदोस्तले ते भजते च रागः(गो), विज्ञप्तुकामोऽरुणिमच्छलेन ।
मा(मेऽ)नादिकालीनमदास्पदानि, प्रणाशयाऽरागपदप्रदेहा(ह!) ॥२॥
समुल्लसन्त्यप्रतिमप्रभाभिः, प्रभासुराः पादपुनर्भवास्ते ।
जाने दशा - सुमतां समूह-तमोविनाशे दश दीप्रदीपाः ॥३॥
दशप्रकारव्रतिधर्ममाणा(?)-मादर्शकामाङ्कुशसश्रयानाम् ।
उद्दण्डदण्डाः शमिमण्डलीना-मीशं स्फुरन्त्यङ्गुलयस्त्वदंह्र्योः ॥४॥
जगत्त्रयात्यद्भुत! तावकीन-गुप्तेन्द्रियत्वस्य हि शिक्षणाय ।
अत्युन्नतांह्रिव्यपदेशतः किं, कूर्मद्वयं नाथ! निषेवते त्वाम् ॥५॥
अदृश्यभावं समुपाश्रितास्ता[:], कुग्रन्थयः कर्ममया अपि श्राक् ।
त्वयि प्रभो! याः किमु तत्र चित्रं, गूढाः पदग्रन्थिगणा बभूवुः ॥६॥
वृत्तानुपूर्वे(र्वं) सरले(लं) च जङ्घा-युग्मं गताघं भवतो विभाति ।
निभाल्य यं नूनमिभेन्द्रशुण्डा(ण्डा)-दण्डा श्रवन्ति स्वमदातिरेकम् ॥७॥
तवोरुयुग्मं मुनिराज! रम्भा-स्तम्भद्वयीसन्निभतां दधाति ।
श्रीधर्मभूजानिमतल्लिकायाः, साम्राज्यमङ्गल्यनिमित्तमुच्चैः ॥८॥
अतीव गुप्ते नितमां सुवृत्ते, अपि स्थिते मञ्जुलजानुनी ते ।
कथं कथं संयमिनामधीशा-ऽऽश्चर्यं मदीये महदेतदन्तः ॥९॥
कटीविलासं जनकोटिकोटी-दृष्टिप्रमोदप्रदमद्भुतं ते ।
ध्रुवं विभाव्य व्रतभूमिभर्तः!, सिंहो वनान्तर्भ्रमति त्रपातः ॥१०॥
त्वन्मध्यदेशः कृशतां बिभर्ति, प्रकाममित्येवमवेत्य नूनम् ।
मत्तोऽप्यधःस्थस्य सदा पदादे-र्न मध्यमत्वं मम तत्कुतस्तु ॥११॥
नाभीनदे निम्नतरे निशंस-ल्लावण्यनिस्तुल्यजलप्रपूर्णे ।
पालीवनालीतुलनां प्रयाति, रोमावली स्थि(स्नि?)ग्धतमा तवेश! ॥१२॥
वक्षःस्थली ते कथयत्यभिख्या-मास्थानभूमिर्विपुलेव रम्या ।
श्रीधर्मभूमीरमणस्य भास्वत्-सौवान्वयाम्भोरुहभास्कराभ! ॥१३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भव्यासुमत्कामितकल्पवृक्षे, सन्मण्डलाखण्डल! बाहुवल्ली ।
भातस्त्वयीवाऽङ्गुलिपल्लवाढ्ये, स्फूर्जन्नखांशुप्रसवाभिरामे ॥१४॥
कूर्मत्रिरेखानिमिषाः क्षमीश!, त्वामाश्रिताः पाणिपयोजयुग्मे ।
इतीव विज्ञापयितुं सुरेखा-लक्षात् कथं नोऽत्र जडाङ्किताऽभूत् ॥१५॥
सद्रोपतेः पुण्यभरोद्वहस्य, भद्रस्य राजद्गमनस्य नेतः! ।
अत्युन्नतौ पीनतमौ तवांऽशौ, धत्तः श्रियं मौक्तिकमेव चैतत् ॥१६॥
कृतप्रयाणासुमदावलीनां, निर्वाणपुर्याः सरणौ शरण्य! ।
मञ्जुध्वनिस्ते गलकन्दलः किं, शङ्खः स्वनन् मङ्गलकृद्वचांसि ॥१७॥
उल्लासकारी कमलोत्कराणां, मित्रोदयश्रीप्रविधायकश्च ।
भवस्य वैरी भवदाननेन्दु-र्देदीप्यते नूतन एव नेतः! ॥१८॥
चिद्रूपदुग्धाम्बुनिधे! हृदन्तः, प्रोल्लासिनस्ते प्रकटत्वमेतौ ।
किं रक्तकन्दौ दशनच्छदौ श्री-सूरीन्द्र! लोकस्पृहणीयरूपौ ॥१९॥
विश्वप्रतीक्षास्यसहस्रपत्र-स्थाष्णोस्तव श्रीश्रुतदेवतायाः ।
मुक्तावलीव द्विजधोरणीयं, विभ्राजते भङ्गुरभाग्यसिन्धोः ॥२०॥
वक्त्रं कपोलद्वितयं च वीक्ष्य, श्रीजैनसिद्धान्तरहस्यविज्ञाः ।
विचारयन्तीति कथं नु जम्बू-द्वीपेऽपि चन्द्रत्रितयं चकास्ति ॥२१॥
नासोपमानं भवतः स लेभे, सच्छिद्रवंशोऽपि दुरापमुच्चैः ।
तेनाऽभवन् मौक्तिकभूतिपात्र-मेषः क्षमायां किमिव क्षमीश! ॥२२॥
मिथ्यात्वमोहोद्धुरयोधदर्प-ध्वंसे शरौ किं भवताऽक्षिरूपौ ।
सज्जीकृतौ वीरपुरन्दरेण, स्फूर्जद्गुणभ्रूद्वयधन्वयुक्तौ ॥२३॥
नाऽहं क्षमस्तावकभालपट्टं, श्रीवीरपट्टाम्बरपद्मपाणे! ।
तं स्तोतुमक्ष्णोर्विषयीकृतेऽपि, यस्मिन् सका सिद्धशिलाऽपि दृष्टा ॥२४॥
वक्त्रश्रियः केलिकृते विधात्रा, दोलाद्वयी ते श्रवणस्वरूपा ।
मन्ये विधाप्य प्रतिमा तनूभृ-च्चित्तेहितार्थप्रथने सुरेन्द्रौ(सुरद्रो!?) ॥२५॥
मूर्द्धारविन्दं पदमिन्दिराया, आघ्रातुकामाः किमुपागतास्ते ।
जात्याञ्जनश्यामलकुन्तलाली-लक्षादलीनां निवहाः शमीश! ॥२६॥

*इति गुरुस्तुतिः ॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बालार्कबिम्बं प्रविलोक्य दीप्रं, लीलारसोत्को भवतीति कोषः ।
त्वद्दर्शनं वीक्ष्य मुमुक्षुराज!, मनो मदीयं प्रमदप्रफुल्लम् ॥१॥
आकर्ण्य मेघस्तनितं शिखण्डी, विनिर्मिमीते किल ताण्डवं मुदा ।
निपीय भावत्कगुणोत्करोऽहं, हर्षप्रकर्षात् किल हृष्टचित्त[:] ॥२॥
ग्रहपतिरसौ रात्रौ हृत्वा भवद्वदनश्रियं, विमलतरसत्कान्ति भीतो जगत्यपवादतः ।
तविषसरणौ दिव्यं तप्तोऽसृजन् घनगोलकं, निजशयतलेऽधात् किं दग्धः
कलङ्कमिषात् ततः ॥३॥
त्वदङ्गसौन्दर्यभरं विचिन्त्य, जितोऽहमेतेन रतेश्च पत्या ।
स्वाङ्गं त्रिनेत्राक्षिहुताशकाले, हुतं ततोऽनङ्ग इति प्रसिद्धिः ॥४॥
**श्रीमत्तपागच्छ**परम्परागग्र्या र्वाद्या(?)वलीनन्दनकल्पवृक्षः ।
शाखावृतस्त्वं फलदोऽसि भूरे(सूरे!), सच्छाययुक्तो जय वाञ्छितप्रदः ॥५॥
कैलाशतुल्यः खलु नाकिभूध्रः, सुधांशुकल्पं किल कुङ्कुमं हि ।
बभूव कीर्त्या भुवने सितीकृते, सूरीश! ते **श्रीविजयप्रभा**भिधः ॥६॥
अन्ये तु कूपा इह सूरयस्ते, त्वं सागरोऽपारगुणावलम्बी ।
किं तारकाः सन्ति नभेऽप्यनन्ताः, सहस्रपादः कतमस्तुला हि ॥७॥
विभो! त्वदीयप्रवरप्रतापो-ऽपूर्वप्रवृद्धानल एष रेजे ।
जक्ष्यन् कुवादिप्रकरार्जुनानि, केषां न सन्तापकरोऽतिचित्रम्? ॥८॥
ऊरीकृतं यद्वदनेन पद्मं, गन्धाकृतिभ्यां च निजोपमायाम् ।
षडंह्रिझङ्कारगिरा समीर-प्रेङ्खोलितैर्मुच्छदनैस्तनोति ॥९॥
असङ्ख्यवारीश्वरमेघपुष्प-सुबिन्दवस्ते गणितुं हि शक्या ।
विदा भवन्तीति भवद्गुणौघो, विभो! गणेयो न कदाऽपि केन ॥१०॥
यदीयपादारुणतां विलोक्य, संत्यक्तुकामः स्वखरत्वदूषणम् ।
संसेवते रोहितनोपधेश्च(?), निलीनबालारुणसारथी पदौ ॥११॥
भवत्पदाम्भोजजुषा मयाऽव-कीर्णानि रत्नानि नखालिलक्षात् ।
इमा विमानस्य पदौ गदित्वा, तस्मै ददे यः स न तं निखे(षे)वते ॥१२॥
पश्यन् स्वबिम्बादि(नि) यदीयपाद-कामाङ्कुशेषु प्रतिरूपितानि ।
नैवामुमिन्द्रो विरतिं भवेत् प्रभु, साश्चर्यचित्तः प्रणतेः विधाना(न)म् ॥१३॥
तवोपदेशः किल कोऽप्यऽपूर्वो, दीपोऽस्ति दीप्रो जगति प्रवर्त्तते ।
एकोऽप्यनेकस्य जनस्य चेतो-ऽगारस्य चित्तं मलिनं निबर्हते ॥१४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रसूतवान् यं हि सहस्रपादः, पादेन पङ्गुः स कथं शनैश्चरः ।
प्राप्नोति पुत्रो जनकस्य साम्य-मत्रोत्तरं नोऽजनि चित्रभानुः ॥१५॥
भवत्प्रतापक्रमणे स्फुटीभवन्, सहस्रसङ्ख्यैरपि पङ्गुरंह्रिभिः ।
सूरीश! लोकस्पृहणीयरूपा-तिरेकसन्दोहनिवासभूमो(?) ॥१६॥
चेतांसि चात्यन्तचलानि लोके, प्रसिद्धिरेषा मरुतान्(त्) प्रवर्त्तते ।
भवद्गुणालीस्तवने ध्रुवीभवेत्, तामेव चेतो हरतीति मामकम् ॥१७॥
जगत्त्रये द्यौम(र्म)हती च तस्यां, देवास्ततस्तेषु महान् महेन्द्रः ।
त्वदीयदेहातिमनोहरश्रीं, द्रष्टुं स जातोऽपि सहस्रनेत्रः ॥१८॥ इति गुरुस्तुतिः ॥

—*—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(८-९-१०)

# त्रण पत्रो

**– शी.**

मुनि-मित्र श्रीधुरन्धरविजयजी तरफथी मळेल जूना पानांनी जेरोक्समां विभिन्न त्रण पत्रो लखायेला छे. पत्रो लखनार व्यक्तिओ अलगअलग छे के एक ज ते स्पष्ट थतुं नथी. सम्भवतः आ पत्रो नकलरूप अथवा तो खरडारूप होय तेम जणाय छे. मोटी साइजना छ पत्रोमां मोटा अक्षरे लखायेला पत्रोना हस्ताक्षर एक ज व्यक्तिना जणाय छे. प्रथम पत्रना मथाळे **पं.सु.ग.मि.** एवो नामोल्लेख छअेक वार थयो छे, तेथी एम अनुमान थई शके के आ बधा पत्रो ते एक व्यक्तिने उद्देशीने होय.

पत्रोनी भाषा चमत्कृतिपूर्ण, छटादार अने विद्वत्ताथी छलकाती छे. प्रथम पत्रमां, पत्रना (पानाना तेमज पत्रना) मथाळे **पं.सु.ग.** एवो नामोल्लेख छे, अने तेमने माटे लेखकने अत्यन्त लगाव के मैत्रीभाव होय ते रीतनो ते उल्लेख छे. आ नाम 'पं. सुरचन्द्रगणि'नुं हशे? ते 'पण्डित' पदस्थ हशे, लेखकना परममित्र पण हशे तेम समजी शकाय छे.

१

पत्रना प्रारम्भे विद्वत्ताथी छलकाती शैलीथी ऋषभदेवनुं स्मरण थयुं छे, तेमां ऋषभदेव माटे '**सौरभेयध्वज**' एवो शब्द प्रयोजायो छे. **सौरभेय** एटले वृषभ-बळद, ते जेनो ध्वज एटले चिह्न ते सौरभेयध्वज-आदिनाथ.

पत्र '**नीं. नग.तः**' कोई 'नीं'थी शरु थता नगरथी लखायो छे. लखनार पोतानुं नाम '**दे.विमलः**' एम नोंध्युं छे, एनो अर्थ **देवविमल** एवो थई शके छे. ते अटकळ योग्य होय तो आ पत्र तेमणे लख्यानो निश्चय थई शके. जेमना पर पत्र लखायो ते (पं.सु.ग.मि.) ते वर्षे '**सोमधरी**' नगरमां बिराजता हशे ते पत्रमां ते क्षेत्र-नामना उल्लेखथी नक्की थई शके छे.

पत्रलेखक साथेना अने पत्रप्रापक साथेना साधुओनां नामो साव टूंकाक्षरमां नोंधायां छे : गणि विजयविमल, गणि जस, मुनि विनयविमल, मुनि अमृत विमल, तेमज मुनि अमृतकुशल, मुनि रविकुशल – आम ते उकेली शकाय छे.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हरिविक्रमचरित्रनी प्रत विशे चर्चा पत्रमां जोवा मळे छे. ते प्रतनां पानांना गुंचवाडा उकेलवा माटे तेमां पत्राङ्क लखवानी वात लागे छे. उत्तराध्ययनसूत्र-वृत्तिनी वाचना, अध्ययन-अध्यापन, सांवत्सरिक पर्वाराधना - इत्यादि विशे नोंध जोई शकाय छे.

२

बीजो पत्र साव नानो छे. लखनार लावण्यविजय छे, श्रीधलो. नगरथी लखेल छे. आ कयुं नगर हशे? ते ख्याल नथी आव्यो. धोलका, धोलेरा के तेवुं कोई नगर होई शके.

आमां पण टूंकाक्षरी नामो जोवा मळे छे. भ.कु. एटले भक्तिकुशल, ग.ह. एटले गणि हर्षकुशल एम लागे छे, अहीं वन्दारुवृत्तिवाचननो निर्देश छे.

३

त्रीजो पत्र पण **ला.वि.यो** एटले के लावण्यविजयजीए ज लखेल छे. प्रारम्भनां ५ पद्यो तेमज पत्रनो भाषावैभव लेखकना पाण्डित्य प्रत्ये माथुं झुकाववा प्रेरे छे. आ पत्रमां समयवायाङ्गसूत्रनुं व्याख्यान सूचवायुं छे. साध्वादिना पाठ उपरांत उपधानवहननो उल्लेख पण थयो छे. पर्युषणनां सुकृत्योनुं वर्णन नोंधपात्र छे, तेमज तेमां क्यांय स्वप्नदर्शन-उछामणी विशे अक्षर पण नथी ते ध्यानपात्र बाबत छे. साधुओनां टूंकां नामो छे त्यां साध्वीओनां नामो पण छे ते आ पत्रनो विशेष छे. ५७ बोलना पट्टा साथेनो विज्ञप्तिपत्र पोते लखेलो तेनो उल्लेख पण ध्यानार्ह छे.

एकंदरे त्रणे लघुपत्रो तेमना लालित्यने कारणे आपणुं ध्यान खेंचे तेवा छे. पत्रोनो समय १८मो शतक होय तेम अनुमान थाय छे.

*   *   *

## त्रण पत्रो

सकलसकलकोविदकोटिकोटीरहीरायमान पं. श्रीसु.ग. शचीरुच्यानाम् । पण्डितजनचित्तमानसमरालबालायमान पं. श्री५श्रीसु.ग. परममित्राणाम् । पण्डितप्रकरसार्वभौमपण्डित श्री५ श्रीसु.ग. मिश्राणाम् । पण्डितसदोऽलङ्कार पं. श्रीसु.ग.मि. । विद्वज्जनसदोऽलङ्कार पं. श्रीसु.ग.मि. । सकलप्राज्ञपुङ्गव पं. श्रीसु.ग.मि. ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

( १ )

स्वस्तिक्षीरधिनन्दनां प्रदिशतु श्रीमन्महोक्षध्वज-
स्त्रैलोक्याद्भुतवैभवः स्फुरति यत्कण्ठस्त्रिरेखाङ्कितः ।
वक्त्रेन्दूदयतोल्लसत्किततमध्यानामृताम्भोनिधे-
स्तस्थौ कम्बुरुपेत्य सैकततटे किं दक्षिणावर्तकः? ॥१॥

तं श्रीमन्नाभिभूमीमण्डलाखण्डलाकुलकुवलयकाननविकाशननिशाकरं, निचिततमतमःस्तोमतिरस्करणार्णवार्णस्सम्पूर्णातूर्णतराम्बरतलचलनमन्थरपाथोधरोद्धुर-धोरणीरोधापगमनप्रसरत्करनिकरविभाकरं, त्रिभुवनभवनजनमनःकमनीयकामित-सन्ततिसम्पूरणगीर्वाणसार्वभौमकारस्करं, संसारासारापारदुरुत्तारकान्तारपारवर्तिस्फूर्त्ति-मत्तरदुर्गापवर्गपत्तनपथसंप्रस्थितानेकभविकसार्थश्रेयस्करं, दशदिग्वशावासवासन-प्रगुणीभवत्स्वाभाविकगन्धबन्धुरगन्धफलीविकचमणीचकचक्रवालचारिमावहेलन-प्रगल्भीभविष्णुस्वभूघनभूमपीतिमावगणितविलीनचारुचामीकरं, श्रीमत्**सौरभेय-ध्वजा**भिधानतीर्थकरं प्रणतिपद्मिनीमधुकरं विधाय

**नीं.नग.तः** श्रीमन्मित्रक्रमकमलयामलोत्तंसितभूतले श्रीमति **सोमधरी**नगरे, **दे. विमल**स्सानन्दं सोल्लासं सरणरणकं समादिशति । यथाकृत्यं चाऽत्र -

पूर्वपर्वतोच्चचूला(लां) चुम्बति भगवति भानुमति हर्षोत्कर्षवत्पर्षदि **श्रीमदुत्तराध्ययनसूत्रवृत्ति**वाचन-श्राद्धसाधुसाध्वीजनपठनपाठनादि धर्मकृत्यं समजायत संजायते च । क्रमागतं श्रीमदाब्दिकपर्वाऽपि निर्विघ्नतया महामहमबी-भवत् । किंच श्रीमद्देवगुरुनामधेयध्येयमहामन्त्रस्मरणासाधारणकारणतः, तथा श्रीमत्सुहृत्सौम्यनयननिभालनानुभावतश्च ।

किञ्च - भुवनाद्भुतभाग्यसौभाग्यगाम्भीर्यधैर्यौदार्यचातुर्याद्यगण्यपुण्य-वरेण्यगुणमणीगणसागराणां गगनतरङ्गिणीरङ्गत्तरङ्गसङ्गमावगणनप्रगुणवचनचातुरी-रञ्जितानेकनागराणां स्वकीयधीरिमावधीरितसुधाशनसार्वभौमभूधराणां न्यक्षप्रतिपक्ष-लक्षासह्यशौण्डीरिमावमानितवितानप्रत्यवसानाधीशसिन्धुराणां श्रीमतां श्रीमतां प्रीतिपत्रिका राजमरालिकेव मत्करकमलक्रोडमलङ्कृतवती । ज्ञातं च तदन्तर्गतं समस्तं प्रमेयं, परमा सन्तुष्टिरजनिष्ट ।

किञ्च - हरिविक्रमचरित्रं भवति तदा तदतः स्थाने स्थाने क्षिप्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदि तद् भवेत्तदा प्रेषणीयम् । तदन्तः साङ्कानि कृत्वा पत्राणि क्षिप्यन्ते । अन्यथा किं क्रियते ? यान्यधिकारेण एकीभूतानि तान्येकत्र कृतानि सन्तीत्यवधार्यम् । ममाऽनुनतिरवसातव्या । **ग.विज.विम. ग.ज. मु.विनयवि. मु.अमृतवि.** साध्वीनां च यथार्हं नत्यनुनती ज्ञेये, ज्ञाप्ये च निकटवर्ति **मु.अमृतकु. मु.रविकु.लानाम्** । मन्नाम्ना च श्रीमज्जिनजगतीकुमुद्वतीप्राणेश्वराः प्रणतिगोचरीकार्याः । किञ्च तत्रत्यसकलसङ्घस्याऽस्मद्धर्माशीर्वाच्येति मङ्गलम् ॥

( २ )

स्वस्तिश्रियं सृजतु नेमिजिनेन्द्रचन्द्रः प्राज्यप्रपञ्चितविभास्तवियोगितन्द्रः ।
कूर्मीकृतात्मरहितः सुधृतक्षमोऽपि चित्रं चकास्ति चतुराशयचेतसीदम् ॥१॥

तं श्रीमन्तं श्रीमन्तं निस्समानासमानमानवामेयमहिमानं गाम्भीर्याद्यनेक-गुणगणराजमानं पापव्यापतापसन्तापसन्तप्तजन्तुजातकायमानं श्री**समुद्रविजय**-भूपालतनुजन्मानं श्रीजिनसामजन्मानं मनोनर्मदातीरे रममाणं विधाय **श्रीधलो० नगरतः**, श्रीमति तत्र, **लावण्यविजय**स्सबहुमानमालापयति । यथाप्रयोजनं चाऽत्र –

प्रातर्महेभ्यसभ्यसदसि **श्रीवृन्दारुवृत्ति**वाचन-प्रस्तुतयतिजनाध्ययना-ध्यापनादि सुकृतकृत्यं सुकृतिकृतं – – – – – समजायत संजायते च । तथा क्रमागतं श्रीवार्षिकपर्वाऽपि निःप्रत्यूहव्यूहं महामहःपुरस्सरं च समजनि श्रीमद्देवगुरुपादप्रसत्तेः । अपरं – श्रीमतां धीमतां बहुदिनविलोक्यमानवर्त्मा लेखः प्राप्तः । समवसितं च तदन्तर्गतरुच्यवाच्यं हर्षप्रकर्षश्च समजनि । पुनरपि लेखाः प्रेष्या मन्मनोमोदसम्पत्तये । किञ्च – ममाऽनुनतिरवसेया । ज्ञाप्या चाऽन्येषाम् । अत्रत्य **ग. र.वि. मु. तत्त्ववि. मु. लालवि. मु. लक्ष्मीवि.या**दीनां नत्यनुनती ज्ञेये, ज्ञाप्ये च तत्रत्य **पं. भ.कु. ग. ह. मु. पद्मकुशल** प्रभृतियतीनाम् । तथा – तत्रत्यसकलसङ्घस्य धर्मलाभो वाच्यः । तथा श्रीपूज्यपादसत्को धरित्रीसत्कश्च कश्चिदप्युदन्तः समागतोऽद्यप्रभृति विशेषतो नास्ति । समागमने च यथावसरं ज्ञापयिष्यते । तथा ज्ञापनार्होदन्ता ज्ञापनीयाः । तथा मन्नाम्ना तत्रत्याः श्रीजिनरजनिजानयः प्रणमनीया इति भद्रम् । भाद्रपदसित १३ दिने ॥ अत्यौत्सुक्यात् पत्रीयं लिखिताऽस्तीति समवसेयम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३

स्वस्ति श्रीमतिमातनोतु जगतां गाङ्गेयगेयच्छवि-
च्छन्नाङ्गो भगवाननङ्गसुभगज्ञानप्रदीपोदयः ।
क्रीडा यस्य सुगन्धलुब्धमधुपैः प्रारम्भिरम्भासभा-
प्रोज्जृम्भाक्षिकटाक्षिलक्षत इव स्मेराननाम्भोरुहे ॥१॥
जीयान्मद्रसमुद्र इन्द्रसदृशः श्रीनाभिसर्वंसहा-
पर्जन्याभिजनाम्बुजन्मतपनः श्रीमारुदेवो जिनः ।
यस्याऽऽस्यस्य समीक्षणादपि सदा प्रह्लादमापद्यते,
बिम्बस्याऽपि मनः सतामिव सरित्कान्तः सितज्योतिषः ॥२॥
यस्य स्फारतरं निरीक्ष्य वदनं पद्मानि पद्माकरं,
गन्तुं लज्जितवन्ति सन्ति विजने पुर्या वने निर्ययुः ।
ते निर्वास्यवयस्यगौरमहसस्तत्राऽपि सन्दर्शना-
न्मन्ये सङ्कुचितानि तानि भगवद्भानुस्तनोतु श्रियम् ॥३॥
निश्शेषक्षितिपालभालफलकालङ्कारकारिक्रम-
द्वन्द्वाम्भोजरजा रजांसि हरतादर्हन्निशाधीशिता ।
यस्याऽऽस्येन निरस्यमानमहिमादाघज्वरीजातवा-
ञ्ज्ञानेऽब्जः कथमन्यथा प्रतिकृतिव्याजादसावम्भसि ॥४॥
यस्याऽम्भोजविराजमानवदनं विद्यावदानन्दनं,
पुण्याम्भोनिधिनन्दनं शमवचःपीयूषनिःस्यन्दनम् ।
- - - - - - - - - - - - - -
आमोदार्दितचन्दनं कुरु सदा दुष्कर्मनिष्कन्दनम् ॥५॥

तं श्रीमन्तं श्रीमन्तमनन्तदन्तिज्योतिःपश्यतोहरकीर्तिनिकरक्षीरपूर-प्रक्षालितत्रिभुवनभवनान्तरालं निर्मलशशिसकलकलविशालभालं विशदतमदेशना-कादम्बिनीजलविदलितसकलाकुशलकलिमलजम्बालजालं प्रणमद्भक्तिभरनिर्भर-विश्वविश्वम्भराशिखरिवैरिवारशिरःशेखरहीरनिस्सरत्करनिकरनीरधारानिचयसिच्यमान-चरणकल्पसालं श्रीमन्नाभिभूपालबालं श्रीभगवन्मरालं मनोमानसविलासिनं निर्माय श्रीमत्तत्रभवत्पादपादपद्मप्रसृमरमकरन्दसुरभीभूतभूतले श्रीमति तत्र,

**नवीननगरतो ला.वि.यो** विनयावनतशिरस्कं हर्षप्रकर्षसंभृतमनस्कं सप्रीतिवचस्कं सरणरणकं यमुनाजनक[१२]मितावर्तवन्दनेनाऽऽभिवन्द्य विधिवद्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विज्ञप्तिपत्रिकां** प्रपञ्चयति । यथा प्रयोजनं चाऽत्र - चित्रभानुभानुवितानविनिर्मित-निबिडतरतिमिरप्रमेये प्रभातसमये महेभ्यसभ्यसदसि **श्रीसमवायाङ्गसूत्रवृत्ति**वाचन-प्रस्तुतवाचंयमवाचंयमिनीजनाध्ययनाध्यापन-सश्रद्धश्राद्धश्राद्धीजनोपधानोद्वाहनादि सुकृतकृत्यं सुकृतिकृतं प्रावर्तत प्रवर्त्तते च । तथा क्रमागते सर्वपर्वाखर्वगर्वापहारिणि पापव्यापसन्तापनिवारणवारिणि सुकृतततिनर्तकीनर्तनशतपर्वणि **श्रीमदाब्दिक-पर्वणि** सक्षणनवक्षणप्राणिगणानल्पसंकल्पकल्पद्रुकल्प**श्रीकल्पसूत्र**वाचन-निष्प्रतिमप्रभावप्रभावनाभवन-सप्तदशप्रकारजिनवरार्चाविरचन-द्वादशदिवसामारि-पटुपटहोद्घोषणपुरःसरसर्वसत्त्वाभयदानप्रवर्तन-चाक्रिकतैलिकादिकुकर्मनिवर्त्तन-याचकजनदानप्रदान-साधर्म्मिकजनवात्सल्यविधान-दुष्टाष्टकर्मकाष्ठदहनदहनायमाना-ऽसमानानेकमासक्षपण-पक्षक्षपण-दशका-ष्टाहिका-बृहत्कल्पा-ष्टमादिदुस्तपतपस्त-पनादिपर्वधर्मकर्म सशर्म निरन्तरायं निरमायि । श्रीमद्देवगुरुध्येयतमनामधेयध्यान-विधानात् श्रीमदर्चनीयचरणसौम्यदृशा चाऽपरम् ।

अनवद्यविद्याविद्याधरं(?री?)परीरम्भविभूषितकरणानाम्, पुण्यप्रयोजन-परम्परोपार्जनकरणानाम्, स्फटिकविमलान्तष्करणानाम्, सहृदयहृदयाम्भोजवनविभा-सनसहस्रकिरणानाम्, धृतचतुरचेतश्चक्रवालचमत्कारकारणाचरणानाम्, विशदवृत्त-रमारमणशरणानाम्, शिष्यसमुदयप्रदेशितविद्याभरणानाम्, श्रीमत्कोविदकुलकैरव-विबोधनसुधाकिरणानाम्, श्रीमदर्चनीयचरणानां बहुदिनविलोक्यमानमार्गो लेखो ऽथैवाऽऽनन्दयिष्यति मन्मनः, तेन सौवङ्गारोग्यपरिच्छन्दवार्तवार्त्तापिशुनाः प्रसादलेखाः प्रसद्य सद्यः प्रसाद्या मन्मनोमोदसम्पत्तये ।

किञ्च- ममोपवैणवं प्रणतिरवधार्या । प्रसाद्ये च नत्यनुनती तत्रत्य **पं. ज.ल.ग. ग. लब्धिवि. ग. वृद्धिवि.** प्रभृतिनिकटवर्तिव्रतिवारणेन्द्राणाम् । अत्रत्य **पं. सिं.वि. मु. कम.वि.य**प्रभृतियतयः, तथा **साध्वीरू.ई. सा. ला.ई. सा. न.श्री सा. चांपां सा. राऊश्री सा. सहजश्री**प्रभृतिसाध्व्यश्चा-ऽत्रत्यसङ्घश्च श्रीमदर्चनीयचरणचरणान् प्रति प्रणमन्तितमाम् । तथा-

पूर्वमितः सप्तपञ्चाशज्जल्पपट्टसहितो विज्ञप्तिलेखः प्राभृतीकृत आसीत्, तत्प्राप्त्युदन्तपिशुनो वलमानप्रसत्तिलेखः प्रसाद्यः । तथा मदुचितं कृत्यं प्रसाद्यम् । तथा वलमाना हिताशीः प्रसाद्या । तथा श्रीमन्महनीयनाम्नाऽत्रत्याः श्रीजिनरज-निजानयः प्रणताः सन्तीति मङ्गलम् । भाद्रपदासिततृतीयायाम् । तथा कियन्त चा(श्चा)त्रत्योदन्ताः **पं. श्रीकु.स. ग.** लेखादवधार्याः श्रीआर्यवर्यैरिति दिग् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(११)

# उन्नतपुरात् श्रीविजयप्रभसूरिलिखितं पत्रम्

**– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय**

प्रस्तुत पत्र **श्रीविजयप्रभसूरिजी**ए **ऊना**नगरथी लख्यो छे. घणुं करीने आ प्रसादपत्र हशे. कोई मुनिराजना पत्रना उत्तररूपे लखायेल आ पत्र छे.

प्रारम्भनां ५ पद्योमां **श्रीनेमिनाथ**परमात्मानी स्तुति करी छे. शेष पत्र गद्यबद्ध छे. तेमां पूज्यश्रीए करेली 'सांवत्सरिकचतुर्थीकन्याकरग्रह'नी कल्पना ध्यानार्ह छे. अन्य पत्रोनी जेम चातुर्मास दरम्यान सभामां (प्रवचनमां) करेल **आवश्यकसूत्र** अने **उत्तराध्ययनसूत्रवृत्ति** वाचननी नोंध पण अगत्यनी गणाय.

पत्र अपूर्ण छे छतां मजानो छे. प्रस्तुत पत्रनी नकल अमने सुरत-श्री नेमि-विज्ञान-कस्तूरसूरि ज्ञानमन्दिरमांथी प्राप्त थई छे. ते आपवा बदल संस्थाना व्यवस्थापकोनो खूब-खूब आभार.

स्वस्तिश्रीसुभगोऽपि गोपललनालीलारसे सारसे,
यः पाणिग्रहसङ्ग्रहाग्रहवशात् तूष्णीमपुष्यात्(ज्) जिनः ।
स्वप्राचीननितम्बिनीभवभुवो मन्ये निदिध्यासया,
प्रज्ञैकप्रणिधिः कृतावधिविधिर्नूनं नियुक्तोऽमुना ॥१॥
स्वस्तिश्रीस्तिमितामितादरभरस्थिग्धोरसा यः प्रभु-
र्वीवाहव्यपदेशतः प्रियतमामाहूय राजीमतीम् ।
नित्यानन्दघने सुसिद्धिभवने तत्सङ्गरङ्गे चिरं,
शुद्धाभोगदशाभियोगरसिको योगीन्द्रमुख्योऽप्यभूत् ॥२॥
('योगाधिभूरप्यभूत्' इति पाठान्तरम् ।)
स्वस्तिश्रीवदनारविन्दमधुपस्सन्त्यज्य राज्यं जवात्(द्),
यः साम्राज्यमनन्तमुत्तरतरं निर्वाणपुर्या ललौ ।
दक्षाध्यक्ष! गजो रजोवदपरोऽप्याप्तुं परोत्कर्षितां,
को वा नोपनतामपि श्रियमहो! तुच्छां जहत्यच्छधीः ॥३॥
स्वस्तिश्रीमदनः परास्तमदनोऽप्यासीद् विलासीश्वरो,
यः श्यामोऽपि विशुद्धकीर्त्तिललितैर्विश्वं चकारोज्ज्वलम् ।
सन्त्यज्याऽपि पुरा सुरार्यविनतो यो नाम राजीमतीं,
स्वीचक्रे सुचिरं शिवाश्रयगतोऽप्युच्चैर्न मन्दाक्षवान् ॥४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्तिश्रीप्रणयाविभिन्नहृदयो नेमिर्धने भिन्नधी-
र्देयाद् वोऽभ्युदयं तदंह्रियुगलीरागाविभागात्मनाम् ।
येनाऽभाजि भुजोद्धृतेस्तुलयता शोणास्यविश्वम्भरं,
स्वःसद्बालतरोः प्रवालविलसच्छालस्य विस्फूर्जितम् ॥५॥

तं श्रीमन्तममन्दानन्दभ(क?)न्दसन्दोहदोहदफलदविशालप्रवालपुष्पकालं दुष्टाष्टकर्मविकर्मधर्मसमूलंकषज्ञप्तिकूलङ्कषाकूलानुकूलसंसर्पणपयोदजालं विमलतराभिवन्द्यानवद्ययदुकुलकमलमरालं **श्रीशिवाबालं** जिनेश्वरं प्रणामककुद्यन्तमारोप्य **श्रीउन्नतपुरात् श्रीविजयप्रभसूरिभि**स्ससन्मानममानस्निग्धतानैर्दिग्ध्यमादिश्यते यथा -

साधनाधीनात्मलाभं चाऽत्र, प्रतिप्रभातं च रोषितरुचिरुचिरराजीविनीजीवितेशसमागमप्रसृमरविहगनादनान्दीघोषपोषश्रवणसमुल्लसितसितकमलिनीवनीहासप्रकाशादिव समुज्ज्वलीभूतभूतले विशीर्णतारकमुक्ताहारमाश्लिष्यति श्रीतरणितरुणे रागारुणगगनलक्ष्म्या सश्रद्धास्तिक-सस्वस्तिकसदःपर्यस्तिकामध्ये **श्रीआव[श्यक]स्वाध्याय**शान्तिकमन्त्रोच्चारपूर्वं **श्रीउत्तराध्ययनसूत्र**कुमारं स्पत्ररवृत्तिशृङ्गारमध्यारोप्य चतुर्विधाभ्यसनसेनाङ्गसशोभं प्रभावनादिवितरणसंप्रीणितबन्दिवृन्दजेगीयमानगौरवपूर्वं विवाहाग्रमहे विधीयमाने प्रह्वीभूतक्रमलग्नदिने श्रीसांवत्सरपर्वयुवराजोऽपि श्रीसङ्कल्पकल्पद्रुमोपम**श्रीकल्पसूत्रवाचना**डिण्डिमोद्घोषपूर्वं विविधधर्मकर्मकेलिललितैः सांवत्सरिकचतुर्थीकन्याकरग्रहं सुखेनाऽकरोत् ।

तत्राऽन्तरायनिकायप्रतिबन्धस्तु श्रीपरमगुरुस्मरणानुबन्धप्रबन्ध एव भावनीयो(यः) । अपरम् - आयुष्मतां परमभक्तिभामिनीभ्रूविभ्रमावगृहीतमनसां पत्रसितपत्रीमानसप्रियः सुवर्णमुक्ताहारयो(?) सिद्ध इव सुगमो अत एव सचित्रचक्राङ्गोऽपि सुभगः सरस्वत्यावाहो विबुधानुसरणीयभावोऽस्मत्करकमलमलञ्चक्रे । तुष्टिवल्लीपल्लविनीव तद्वचःसुधासेकातिरेकादुल्ललास पौनःपुन्येन । तथैवाऽनुष्ठेयम् । किं चाऽस्माकं उ.श्री...

[एतावन्मात्रमेव पत्रमिदम् ।]

*(पत्रना पृष्ठभागमां-)*

पूज्याराध्य सकलभट्टारकसभाभामिनीभालस्थलतिलकायमान भट्टारक श्री१९श्री विजयप्रभसूरीश्वरचरणकमलानाम् ॥ ऊनाबन्दिरे ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(१२-१७)

# केटलाक पत्र-खरडा

– सं. मुनि सुयशचन्द्र-सुजसचन्द्रविजय

एक त्रण पत्रोनी प्रति छे, तेमां पत्र ३-४-७ ए क्रमाङ्कनां पत्रो छे. तेमां विज्ञप्तिपत्रोनो सङ्ग्रह होय तेम जणाय छे. तेमांना अमुक पत्रो त्रुटित के अधूरा छे. ते पत्रो खरडारूप होय तेम लागे छे. ते पत्रोना जेटला अंशो उकल्या ते अंशो अहीं आपेल छे.

**पत्र १ :** आमां २६ थी ४३ पद्यो छे. आर्याछन्द छे. ४१मा पद्यमां चेदिलपुर, उष्मापुर अने वजीलपुर एम ३ स्थळनामोनो उल्लेख छे, अने ४२मां बे गृहस्थ-नामो छे. पोताना गुरुने 'पितृचरण' तरीके निर्देश्या छे.

**पत्र २ :** आ पत्र २३ पद्यात्मक छे, पूर्ण छे. राजधन्यपुर-रांधनपुरमां विराजता वाचकवर्य (उपाध्यायजी) पर लखायेल पत्र छे. खरेखर तो आ पत्रात्मक खरडो छे, आ रीते पत्र लखी शकाय तेवुं सूचववा माटे हशे. एटले लेखकनुं, लेखनस्थान व.नुं नाम नथी.

**पत्र ३ :** आ पत्र पण पूर्ण छे, ३८ पद्यात्मक छे. आ पण खरडो होवाथी कोईनो नामोल्लेख नथी. श्लोकोनी रचना प्रासादिक छे.

**पत्र ४ :** आ खरडो पण पूर्ण छे, २५ पद्यात्मक छे. श्लोकरचना चमत्कृतिसभर छे. वसन्ततिलका आदि छन्दो पर कर्तानुं सारुं प्रभुत्व जणाय छे.

**पत्र ५ :** आ खरडामां २ ज पद्य सांपड्यां छे. बाकी प्रतिनां पत्रो नहि होवाथी उपलब्ध नथी.

**पत्र ६ :** आ त्रुटक-अधूरा पत्र-खरडामां त्रुटित ९ श्लोको मळे छे, जेना प्रान्ते 'इति लेखविधिः' एम लखेल छे.

आ पछी ते पत्रोमां १ थी २० पद्यो छे, जे कोई पत्रमां लखवायोग्य गुरुवर्णनना खरडास्वरूप पद्यो जणाय छे.

अनुमानतः १७मा सैकामां लखायेल आ पत्रो छे. त्रुटक के खण्डित होवा छतां काव्यरचनानी रीते उपयुक्त लागवाथी ते अत्रे प्रगट करीए छीए.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आ प्रतिनी जे. नकल आपवा माटे कोबा-आ.कैलाससागरसूरि ज्ञानभण्डारनो खूब आभार मानीए छीए.

-----

## पत्र खरडो नं. १

(अपूर्ण २६ थी ४३)

...........................................................

........................................................ नाम् ॥२६॥
रोचिष्णुरुचिररोचि-श्चामीकरकान्तिकान्तकरणानाम् ।
वरगुप्तियुक्तिरज्वा, नियन्त्रिताशेषकरणानाम् ॥२७॥
कम्रप्रणम्रपृथिवी-पुरन्दरै रचितसुपरिचरणानाम् ।
भावारिवारभीरुक-जगत्त्रयीजन्तुशरणानाम् ॥२८॥
त्रिभुवनभव[न]निरन्तर-दुरिततमस्तोमतिग्मकिरणानाम् ।
कल्याणकुवलयावलि-विकासनश्वेतकमलानाम् ॥२९॥
दुर्जेयजगत्त्रितयी-प्रसर्पिकन्दर्पदर्पहरणानाम् ।
पादप्रणतिप्रवण-प्राणिगणप्रणयकरणानाम् ॥३०॥
निःसारतरदुरुत्तर-संसारावारपारतरणानाम् ।
भुवनत्रयविद्रोहि-व्यामोहमहार्त्तिहरणानाम् ॥३१॥
चेतःप्रार्थितविलसत्-पदार्थसार्थप्रथावितरणानाम् ।
धैर्यस्थैर्यगभीरिम-प्रगुणगुणग्रामशरणानाम् ॥३२॥
दुःकर्मान्तरदुर्धर-तरद्विषद्धोरणीविशरणानाम् ।
दूरीकृतकन्दर्प-क्रूरतरशितप्रहरणानाम् ॥३३॥
विशदान्तःकरणानां, यशश्चयान्तर्हितेन्दुकिरणानाम् ।
कृतसुकृतिस्मरणानां, सुधियां श्रीतातचरणानाम् ॥३४॥
विशदानन्दनिदानं, प्रसादलेखं शिशुः समभिलषति ।
गर्जत्पर्जन्यागम-मुत्कण्ठी नीलकण्ठ इव ॥३५॥
तेन श्रीसौववपुः-परिकरनैरुज्यसूचनाचतुराः ।
सद्यः प्रसद्य हृद्याः, प्रसादलेखाः प्रसाद्या मे ॥३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा : शैशवी प्रणतिस्तात-चरणैरवधार्यताम् ।
श्रीमतां प्राज्ञपादानां, चाऽवधार्या च सा सदा ॥३७॥
सौभाग्यभाग्यनिधयः, सुक्त्युक्तिशुक्तिप्रधापयोनिधयः ।
श्री ........ विबुधाः, सुधाकरप्रवरकीर्त्तिभराः ॥३८॥
निरवद्यहृद्यविद्या-जलधिसमुल्लासने सुधाघृणयः ।
..................., सकलविपश्चिच्छिरोमणयः ॥३९॥
पितृपादनिकटवर्ती-त्यादिश्रीसाधुसाध्वीनाम् ।
नत्यनुनती प्रसाद्ये, श्रीपितृपादैः परमकृपया ॥४०॥
अत्रत्या मुनयोऽपि च, सङ्घः**श्रीदिलपुर**स्य सर्वोऽपि ।
**उष्मा**पुरस्य च तथा, **वजीलपुर**नामधेयस्य ॥४१॥
**वाघजी-सङ्घजी** चेति, प्रमुखाः श्रावकोत्तमाः ।
प्रणमन्ति परमभक्त्या, श्रीपितृचरणान् प्रमोदेन ॥४२॥
लेखे यत् स्यादनौचित्यं, क्षन्तव्यं पितृभिश्च तत् ।
अलेखि लेखो विजय-दशम्यामिति मङ्गलम् ॥४३॥

*॥ इति लेखविधिः ॥*

## पत्र खरडो नं. २

स्वस्तिश्रियं स शान्ति-र्दिशतु सतां यस्य दर्शनं नित्यम् ।
चिन्तामणिवच्चिन्तित-मर्थं सर्वं प्रसाधयति ॥१॥
ससुराः सुराधिपतयः, सुरगिरिशिखरे यदीयजन्ममहम् ।
हर्षाद् रचपयामासुः, स शान्तिदेवः शिवं तनुतात् ॥२॥
यः(ये?) प्रणमन्ति जिनेशं, दुस्तरभवसागरं सुराधीशाः ।
भक्त्या तितीर्षव इव, प्रमोदमर्हन् ददातु स वः ॥३॥
श्रीमन्तं श्रीमन्तं प्रणत्य(म्य) तं विश्वसेननृपपुत्रम् ।
केवलकमलाकमला-कान्तं शान्तिं जिनाधीशम् ॥४॥
तत्र श्रीमति लक्ष्मी-युक्ते **श्रीराजधन्यपुर**नगरे ।
श्रीमद्वाचकपादा-म्बुजरेणुपवित्रिते रम्ये ॥५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

............ ग्रामात्, प्रौढार्हच्चैत्यमण्डितताद्वर्यात् ।
सुश्रद्धश्राद्धभरा-न्मङ्गलमालारमोपेतात् ॥६॥
सद्विनयं सप्रणयं, संयोजितपाणिपङ्कजं भाले ।
सरणरणकं सहर्षं, वसुधासन्न्यस्तनिजशीर्षम् ॥७॥
अमृतव्रतगुरुकिरण-प्रमितावर्तैः सुवन्दनैर्हर्षात् ।
अभिवन्द्य..........., शिशुः करोति स्वविज्ञप्तिम् ॥८॥
प्रातर्यथात्र कार्यं, भगवति भानावुदीयमाने च ।
प्रध्वस्ततमोनिकरे, पूर्वाद्रिशिरःस्थिते रुचिरे ॥९॥
इभ्यजनाकीर्णायां, प्रौढसभायां निरस्ततन्द्रायाम् ।
**श्रीसप्तमाङ्गवाञ्च**(च?)न-मनन्तहर्षप्रकर्षवशात् ॥१०॥
व्रति-व्रतिनीनामध्यापनादि-कृत्ये प्रजायमाने च ।
श्रीमद्वार्षिकपर्वणि, समागतेऽनुक्रमाद् भव्ये ॥११॥
द्वादशदिवसान् याव-ज्जीवाभयदानघोषणं नगरे ।
सप्तदशभेदपूजा-रचनं निःशेषकष्टहरम् ॥१२॥
**श्रीकल्पसूत्रवाचन**-मभिरामं नव-नवक्षणैः सम्यग् ।
अष्टाह्निकादितपसां, तपनं दुष्टाष्टकर्मभिदाम् ॥१३॥
साधर्मिकजनपोषण-मतितोषणमर्थिनां कलापस्य ।
चैत्यानां परिपाटी-घटने सुखदायिभव्यानाम् ॥१४॥
इत्यादिधर्मकार्यं, समजनि समहोत्सवं निरातङ्कम् ।
श्रीवन्द्यपादपङ्कज-भवभूर्यनुभावतो रुचिरात् ॥१५॥
अपरं – सकलावदातगुणगण-परिकलितै रूपनिर्जितानङ्गैः ।
कामितपूरणकल्पै-र्निजदेहविभास्तकलधौतैः ॥१६॥
विद्याविभवविनिर्जित-सुरगुरुभिः प्रणतनाकिनरनाथैः ।
श्रीमद्वाचकपादैः, प्रमादमुक्तैः प्रमोदयुतैः ॥१७॥
आत्मीयकरणपरिकर-निरामयत्वाद्युदन्तसंयुक्ता ।
पत्री प्रसादनीया, सद्यो निजबालकस्य मुदे ॥१८॥
प्रणतिरवधारणीया, श्रीमद् (?) शिशोः स्वकीयस्य ।
श्रीअमुक... विदुषां, सा च मुदा प्राभृतीकार्या ॥१९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्येषां च मुनीनां, श्रीवन्द्यक्रमणसेवनपराणाम् ।
नत्यनुनती यथार्हं, प्रसादनीये शिशोः शिशुभिः ॥२०॥
अत्रत्या बुधमुख्या श्री.......................... ।
प्रणमन्ति वन्द्यचरणान्, प्रणतेन्द्रान् सकलसाधुयुताः ॥२१॥
कृत्यं प्रसादनीयं, शिशूचितं सत्कृपां विधाय शिशोः ।
श्रीसङ्घस्य [च] प्रणति-रवधार्या वाचकोत्तंसैः ॥२२॥
मन्नाम्ना नन्तव्याः, श्रीमद्वन्द्यैः सदा जिनाधीशाः ।
कार्त्तिकसितपञ्चम्यां, सहस्रभानाविति श्रेयः ॥२३॥

*॥ इति श्रीविज्ञप्तिः ॥श्री॥*

## पत्र खरडो नं. ३

स्वस्तिश्रीमरुदेवीयं, प्रासूत प्रथमं जिनम् ।
पद्मपाणिमिव प्राची, साधुचक्रसुखावहम् ॥१॥
स्वस्तिश्रीर्वृषभो यस्य, पदद्वन्द्वपयोरुहम् ।
सेवां कर्तुनि(मि)वाऽऽयासी-ल्लाञ्छनव्यपदेशतः ॥२॥
स्वस्तिश्रीः पर्यणैषीद् यं, श्रीनाभिनृपनन्दनम् ।
रोहिणीव निशानाथं, सत्तारानन्ददायिनम् ॥३॥
स्वस्तिश्रीः सेवतेऽर्हन्तं, प्रथमं नाभिराट् सुतम् ।
चाणूरसूदनमिव, सुता श्रोतस्विनीपतेः ॥४॥
प्रणिपत्य तमर्हन्तं, प्रथमं परमात्मनाम् ।
नमन्नरेन्द्रकोटीर-सङ्क्रान्तनखसञ्चयम् ॥५॥
संयता(ताः?) संयता यत्र, राजन्ते वारिदा इव ।
अपूर्वजडसाङ्गत्यं, बिभ्रतश्चाऽम्बरोन्नतिम् ॥६॥
विरताविरता यत्र, भासन्ते भ्रमरा इव ।
नालीकमधुसाङ्गत्य-धारिणः सुमनःस्पृहाः ॥७॥
अमर्त्य इव सुन्दर्यो, नार्यो यत्र विरेजिरे ।
पुरेऽनिमेषसंवीक्ष्या, स्फुरद्गोप्रीतचेतसः ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चन्द्रकान्तगृहज्योति-र्ध्वस्तरात्रितमा जनः ।
यत्रत्यो नाऽन्तरं वेत्ति, विशदेतरपक्षयोः ॥९॥
सार्वसौधशिरःप्राप्ताः, काञ्चनाः कलशा बभुः ।
स्वीयप्रभाभरस्पर्द्धि, सूर्यं जेतुमिवाऽचलन् ॥१०॥
तत्र श्रीमति सौवर्ण-चारूचैत्यविभूषिते ।
वन्द्यपादरजःपूते, साधुभक्तार्हतान्विते ॥११॥
श्री......................., नगराच्चैत्यभूषितात् ।
वन्द्यपादाभिधामन्त्र-सर्वदास्मृतिकृज्जनात् ॥१२॥
विनयी अमुक........, द्वादशावर्त्तवन्दनाम् ।
विदधानो मुदोदञ्च-द्रोमराजिविराजितः ॥१३॥
रुचिराक्षररोलम्ब-मुपमामकरन्दभृत् ।
राजहंसमनःप्रीण-द्रोस्वामिप्रमदोदयम्(?) ॥१४॥
वाचकव्रातमुख्यानां, श्रीवन्द्यानां महौजसाम् ।
विज्ञप्तिपत्रपाथोजं, प्राभृतीकुरुते शिशुः ॥१५॥
यथाप्रयोजनं चेह, पूर्वदिग्(क्)प्रौढयोषिति ।
चित्रं बोभुज्यमानायां, बालेनापि विवस्वता ॥१६॥
महेभ्यसभ्यसन्दोह-समलङ्कृतसंसदि ।
श्रीमद्विवाहप्रज्ञप्तेः, सवृत्तेर्वाचनाविधिः ॥१७॥
वाचंयमसमारब्ध-सिद्धान्तस्य तमश्छिदे ।
अध्यापनमधीतिश्च, सोद्यमं विधिपूर्वकम् ॥१८॥
सप्तदशभेदपूजा, प्रायः प्रतिरचनमाप्तगेहेषु ।
निजतनुपङ्कविनाशन-निरन्तरस्नात्रकरणविधिः ॥१९॥
भूतेष्टादिषु पर्वसु, कृतपौषधपारणासुकृतकृतये ।
इत्थं भव(वि)जनजनिते, श्रेयःकृत्ये सदा भवति ॥२०॥
तथा परम्पराप्राप्ते, सर्वपर्वशिरोमणौ ।
अगण्यपुण्यनिर्माण-श्रीमद्वार्षिकपर्वणि ॥२१॥
सर्वसम्पत्तिसम्प्राप्ति-निधानैरिव नूतनैः ।
*व्याख्यानैस्त्रिशलासूनु-जिनेन्द्रगण[९]सम्मितैः ॥२२॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनल्पकल्पनाकल्प-तरुकल्पस्य देहिनाम् ।
सवृत्तेः **कल्पसूत्रस्य**, वाचनं भव्यपर्षदि ॥२३॥
अर्धमासोपवासाष्टा-ह्निकादितपसां कृतिः ।
पटहोद्घोषणापूर्वं, सर्वत्राऽमारिनिर्मितिः ॥२४॥
निवर्त्तनं निर्वृतिदं, चाक्रिकादिकुकर्मणाम् ।
याचिताधिकवस्तूनां, याचकानां समर्पणम् ॥२५॥
सर्वसर्वज्ञचैत्यानां, परिपाटीप्रवर्तनात् ।
प्रणामपरया भक्त्या, महोत्सवपुरस्सरम् ॥२६॥
एवं सुकृतकृत्यौघः, प्रावर्त्तत प्रवर्त्तते ।
सर्ववाचकधौरेय-वन्द्यपादाभिधास्मृतेः ॥२७॥
विजिग्ये भवतः कीर्त्या, यतः पीयूषदीधितिः ।
त्वद्वक्त्रमित्रपद्मानि, सङ्कोचं नयतीति किम् ॥२८॥
तरङ्गा अपि गण्यन्ते, पारावारस्य पण्डितैः ।
परं न कैरपि गुणा-स्त्वदीया गुणिनां वर! ॥२९॥
स्वामिंस्तव यशोराशि-रपूर्वः क्षीरनीरधिः ।
महानपि परं मेयः, स्थैर्यभाग् जडतां दधत् ॥३०॥
त्वदीयकीर्त्तिकौमुद्या, विष्टपे धवलीकृते ।
मराली भजते काकं, पार्वती कृष्णमीहते ॥३१॥
काचिद्विलासिनी चक्षु(क्षू)-रञ्जनाय कृतस्पृहा ।
घनसारभ्रमवशात्, कज्जलामत्रमत्यजत् ॥३२॥
क्षीराम्भोधिरपि क्षीर-ह्रदिनीप्राणनाथति ।
केशेषु पलितभ्रान्त्या, युवाऽपि स्थविरीयति ॥३३॥ त्रिभिर्विशेषकम् ।
आवृत्ता दाडिमीबीज-पङ्क्तिर्विस्मृतविद्रुमैः ।
शिखा च गृहरत्नस्य, खञ्जरीटद्वयी पुनः ॥३४॥
एतानि यदि वस्तूनि, भवेयुः सरसीरुहे ।
लभते तन्मुनिस्वामिं-स्तदा त्वद्वदनोपमाम् ॥३५॥ युग्मम् ॥
वीक्ष्य स्वामिनि विद्वत्त्व-मामनन्तीति धीधनाः ।
नभोभ्रमिवशात् श्रान्तः, प्राप्तोऽत्रैव बृहस्पतिः ॥३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्थं मेधाविसन्दोह-गीयमानगुणोत्करैः ।
सद्यः प्रसादपत्रं मे, प्रसाद्यं साधुसिन्धुरैः ॥३७॥
श्रीवाचकशार्दूलां-स्त्रिसन्ध्यं भक्तिसंयुतः ।
विनयात् ......., प्रणत्यनुवासरम् ॥३८॥

तत्रत्य मुनीनामनुनतिं कुरुते च । अत्रत्याः श्रीवाचकपादान् प्रणमन्ति ।

*॥ इति लेखविधिः ॥श्रीः॥*

## पत्र खरडो नं. ४

मन्दारभासुरतरं द्विजराजराज-मानं विमानिपथवद् वृषमेषयुक्तम् ।
सूराश्रितं गुरुतरं गुरुसङ्गतं च, विभ्राजते पुरमिदं बुधबुध्यमानम् ॥१॥
यस्मिन् गवाक्षशिखरस्थितकामिनीनां, वक्त्राम्बुजैः सपदि तर्कविचारदक्षाः
पक्षं विधाय किममी गगनारविन्दं, वादं वदन्ति सुरभीति परस्परेण ॥२॥
उच्चैस्तरां सदनपङ्क्तिशिरःस्थिताना-मन्योन्यहास्यरुचिरोचितचन्द्रिकाणाम् ।
चन्द्रोदये मृगदृशां वदनैर्विशेषान्, मन्ये नभः शतशशाङ्कमयं किमत्र ॥३॥
श्रेयस्विनामतिशयोन्नतमन्दिराणां, वातायने मणिमयूखगतान्धकारे ।
विष्वग् विकीर्णकुसुमभ्रमदं स्थिताऽत्र, तारागणं स्पृशति काऽपि करेण मुग्धा ॥४॥
रम्भाभिरामसदना मदनानुरूपाः, सुस्वामिका गुरुगरिष्ठपरीष्टिमन्तः ।
सानन्दनन्दनमनोरमकेलिकान्ता, राजन्ति नाकिनिकरा इव यत्र पौराः ॥५॥
दोषामुखभ्रमकरं भ्रमरालिनीलं, यत्रेन्द्रनीलनिलयावलिशृङ्गसङ्गि ।
छाया-तमोविरहदं समवेक्ष्य दूरा-न्नित्यं दिवाऽपि किल चक्रकुलं बिभेति ॥६॥
यद्भोगिवासभुवनेषु लसत्प्रभेषु, नानामणिप्रकरकल्पितभित्तिकेषु ।
ध्वस्तान्धकारनिकरेषु विभावरीषु, दीपावलिर्भवति मङ्गलहेतुरेव ॥७॥
यत्राऽतिमात्रमणि-मौक्तिक-शुक्ति-शङ्ख-बालप्रवालपटलीसुविराटजौघान्(?) ।
व्यापारिणां विपणिगानिति वीक्ष्य दक्षाः, प्रोचुर्ध्रुवं जलनिधिर्जलमात्रशेषः ॥८॥
का वल्लभा मुररिपोस्त्वमिव स्वभर्तुः, कृत्यं त्वदास्यमिव धर्मधियां च कीदृग् ।
लज्जां त्वदीक्षणजितः श्रयते क एवं, प्रश्नोत्तरोक्तिकुशलामिह काऽप्यपृच्छत् ॥९॥
[सारङ्गः]

श्रीसूरिराजचरणद्वयपुण्डरीक-स्फूर्ज्जद्रजोव्रजपवित्रितमध्यदेशे ।
स्वःस्पर्द्धिऋद्धिभरभासुरभूमिभागे, श्रीमत्यशेषसुखसद्मनि तत्र चङ्गे ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सद्धर्मकर्मविधिनीरधिपीनमीन-सद्ब्रह्मचारिचरणस्तिकसन्निवेशात् ।
संशुद्धबुद्धिवरऋद्धिविवृद्धिवृद्ध-बुद्धप्रसिद्धतर**सिद्धपुर**प्रदेशात् ॥११॥
प्रादुर्भवद्विविधभक्तिभराभिजात-रोमाञ्चकञ्चुकितपेशलदेहदेशः ।
हर्षप्रकर्षकजिनीहृदयाधिनाथ-ज्योर्निरस्ततमसंतमसप्रवेशः ॥१२॥
पाथोजिनीप्रियतमप्रमितप्रमाणा-वर्त्तप्रमाणपरिवन्दितपूज्यपादः ।
विज्ञप्तिकां वितनुते बहुमूर्खमुख्यः, .....सनयं तथाहि ॥१३॥
यथाप्रयोजनं चात्र, निरपायतयाऽनिशम् ।
तर्कशास्त्रार्थदानादि-श्रेयःश्रेणीकुमुद्वती ॥१४॥
विकाशसम्पदं प्राप, प्राप्नोति च निरन्तरम् ।
श्रीतातचरणध्यान-कौमुदीनायकोदयात् ॥१५॥

॥ अथ गुरुवर्णनम् ॥

सदा पिनाकमाली यो(?), ब्रह्मचारी गणाधिपः ।
भवान्तकृज्जयत्येष, सूरीन्द्रः कमलापतिः ॥१६॥
अनन्यसौभाग्यपदं त्वदीयं, विधाय वेधा वदनं व्रतीश! ।
शिल्पश्रमे किं नियमं चकार, न चेत्कथं तत्प्रतिरूपमन्यत्? ॥१७॥
आस्यं त्वदीयं परिपूर्णपौर्ण-मासीशशाङ्कोपमितं निरीक्ष्य ।
सम्यग्दृशां चारुविलोचनानि, विचक्षणानां कुमुदन्ति नेतः! ॥१८॥
आदाय पीयूषरुचः _ _ सारं त्वदीयं वदनं व्यधायि ।
स्वयम्भुवा भूरिविभूतिभासि, न चेत् कृशाङ्गी कथमत्रिदृग्जः? ॥१९॥
यौष्माकवक्त्रं यदि चन्द्रमण्डलं, वयं चकोराश्चतुरा निरीक्षणे ।
सरोरुहं वा यदि तद् द्विरेफ-समानभावं वयकं श्रयामहे ॥२०॥
स्वस्तिश्रियां(याः) सद्मनि यस्य वक्त्र-सरोरुहे शीतरुचिश्चकार ।
किंवा समानन्दितसच्चकोरः, श्राक् स्पन्दते साधुवचोऽमृतं यत् ॥२१॥
तस्थौ मानससन्निधौ त्रिपथगां मूर्ध्ना दधानः शिवः,
पादस्थामपि तां वहन्मुररिपुः शेते स्म वारांनिधौ ।
मग्नो वारिरुहे कमण्डलुजलं धत्ते स्वयम्भूः स्वयं,
मत्वा त्वत्प्रबलप्रतापदहनं मन्यामहे भाविनम् ॥२२॥
एतैः सुपर्वपतिकीर्त्तितकीर्त्तिपुञ्ज-ज्योतिर्निरस्ततुहिनाचलशीतपादैः ।
प्रोन्मादिवादिकुमुदोत्करतोदनोद-प्राज्यप्रतापतपनाल्पितचण्डपादैः ॥२३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुक्तप्रमादनिचयैः प्रभुतातपादैः, प्रौढप्रसादनिपुणैर्विगतावसादैः ।
वार्त्तप्रवृत्तिसहितं प्रहितं हितं द्राग्, लेखं विशेषसुखवाचि(च)कमीहतेऽसौ ॥२४॥
श्रोतस्विनीशरसनानिहतोत्तमाङ्गः, संयोजितप्रवरपाणिपयोजयुग्मः ।
शिष्यस्त्रिसन्ध्यमनवद्यमनाः सदैव, श्रीतातपादचरणान्प्रति नंनमीति ॥२५॥

*इति वर्णनकाव्यानि ॥*

पूज्याराध्यध्येयतमसकलभट्टारकपरम्परापौलोमीप्राणप्रियसमानासमान-
भट्टारकप्रभुश्री १९ श्रीअमुकसूरीश्वरपत्कजानाम् ।

## पत्र खरडो नं. ५

स्वस्तिश्रीरमणी मणीदिनमणिः श्यामामणीमण्डले,
कर्णाभ्यर्णमणी विभूषय मम स्वःसद्मणीग्रामणीः ।
वक्तुं व्यक्तमिवेति संश्रितवती यत्पादयुग्मं सकः,
श्रीनेमी रमणीयविष्णुरमणी जीयाज्जिनाहर्मणिः ॥१॥

स्वस्तिश्रीरतिरागिणी समभजद् यत्पादपद्मद्वयी-
मङ्गन्नङ्गविगोपनं स गदता गोविन्दतासङ्गतेः ।
निन्द्योः वद्यवदेष मत्प्रियतमो मत्त्वे ..........
........................................................ ॥२॥

## पत्र खरडो नं. ६

........................................................ ।
........................ णमति प्रतिवासरं तैः ॥७३॥

येषां निष्प्रतिमानतां गतवतां, विद्याविलासाहतौ,
पातालालयताविषालयगुरू ह्रीणौ प्रवीणावपि ।
पातालद्युसदालयौ प्रविशतः स्माऽचार्यवर्याय यम्,
श्रीसूरीन् **विजयादिसिंहमुनिपान्**, वन्दे सदा तांस्तथा ॥७४॥

निर्दूषणा गुणविभूषणभूष्यमाणा, ...............
........................................................ ॥७५॥

इत्यादिव्रतिचन्द्राणां, तातसेवाविधायिनाम् ।
प्रसाद्याऽनुनतिस्तेषां, श्रीतातैर्मम सर्वदा ॥७६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्रत्याः शास्त्राध्यसनासक्ता, इत्यादियतयो(यः) ।
तत्रत्याः सङ्घश्चापि प्रमोदतः, श्रीतातपादपादाब्जान्नमन्ति प्रतिवासरम् ॥७७॥

किञ्चाऽत्र परिसरे - इत्यादि मुनिवरा ये, यत्र चतुर्मासकं स्थितास्तत्र ।
निरपायतया जाताब्दिकपर्वाणः सुखं सन्ति ॥७८॥

किञ्च - शुक्लापाङ्गशिशुर्घनाघनरवं बालो यथा मातरं,
चक्रः पङ्कजिनीपतिं हिमरुचेर्ज्योत्स्नाप्रियश्चन्द्रिकाम् ।
कान्तं प्रोषितभर्तृका च करटी विन्ध्याचलोपत्यकां,
श्रीमत्तातपदारविन्दयुगलं ध्यायामि चित्ते तथा ॥७९॥

अर्थौचित्यविमुक्तं, यदुक्तमिह मन्दबुद्धिवशतः स्यात् ।
तत् क्षन्तव्यं तातै-र्भवन्ति सर्वसहा गुरवः ॥८०॥

नानालङ्कृतिकलिता, सकर्णगणवर्णनीयवर्णवृता ।
सुललितपदविन्यासा, पत्री सुस्त्रीव शं दिशतु ॥८१॥

*॥ इति लेखविधिः ॥*

अथ भारतीवर्णनद्वारा श्रीमद्गुरुराजवर्णनप्रस्तावनाप्रपञ्चः ॥

अम्भोवाहमिवाऽम्बुवाहसुहृदः कोका इवाऽर्कोदयं,
माकन्दं पिकपुङ्गवा इव गजा विन्ध्याचलोर्वीमिव ।
प्रौढप्रीतिकदम्बका यदमभृद्धानो(?) भवद्भारतीं,
मन्यन्ते महते मुधाकृतसुधाधाराश्चिरं सज्जनाः ॥१॥

नो मुञ्चन्ति तदन्तिकं निजतनुच्छाया इवोग्रापदो,
नो पश्यन्ति तदाननं सुजनताः प्रेष्याः प्रनष्टा इव ।
श्रीवाचंयमवासरेश्वर! भवद्वाचां विना वन्दनं,
ये काले क्षिपयन्ति हन्त! पशुवत् सद्बोधशुद्ध्युज्झिताः ॥२॥

भव्यानां प्रकटीकृतातनुमुदि स्वामिन्! विलासे गवां,
सञ्जाते भवतस्तदत्ययकरः कश्चिज्जडस्तर्हि किम्(?) ।
भूमौ भूयसि वर्षति प्रविलसच्छस्यप्रशस्योद्गमे,
पाथोदे परितः किमर्कतरुणा श्रीः प्रापि कापि ध्रुवम् ॥३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लीलालापसमुत्थिताऽपि भवतो भिक्षुप्रभो! भारती,
जाग्रज्जाड्यमपाकरोति मनुजश्रेणेः प्रमोदप्रदा ।
रत्नानां निकरो निसर्गतट(टि)नीप्राणाधिनाथोच्छल-
ल्लोलोल्लोलबहिष्कृतो भवति किं नो सान्द्रदारिद्र्यभित्? ॥४॥
संसारद्रुममूलपाततटिनी वेगावली प्राणिनां,
त्वद्वाणी श्रुतिगोचरं यदि विभो! प्राप प्रतिष्ठास्पदम् ।
उग्रक्रोधविशालवाडवबृहद्भानुप्रकाशस्तदा,
किं निर्माति दुरन्तदुष्कृततत्श्रोतस्विनीवल्लभः ॥५॥
भारत्या भवतो भवभ्रममुखो(षो) माहात्म्यमत्यद्भुतं,
नो शक्यं कविकोटिभिर्निगदितुं शास्त्रार्थविस्तारिभिः ।
वल्ली स्वर्गसदामिव क्षितिरुहः स्वल्पाऽपि या मानसा-
भीष्टं शिष्टधियां नृणां घटयति स्पष्टं पटिष्ठोन्नतिः ॥६॥
व्याख्याते विशदे विविच्य विपुलग्रन्थार्थतत्त्वे त्वया,
भव्यानां पुरतः प्रयाति परमं सद्धर्ममार्गं न कः? ।
